
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

390

सारंगधरसंहिता

पृ- ३४

Acc. No. ~~406~~ M-1925

Title - शार्ङ्गधरसंहिता.

Author - सारंगधर

Date - A.D. 1824.

Subject - औषध (Medicine)

folio - 124.

Xerox - 250

१

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥श्रियंसदद्याद्भवतांपुरारिर्यदंगतेजःप्रसरैभवा
नी॥विराजतेनिर्मलचंद्रिकायांमहौषधीवज्ज्वलिनाहिमाद्रौ॥१॥प्रसिद्धयोगामुनिभिः
प्रदिष्टाश्चिकित्सकैर्यैबहुशोनुभूताः॥विधीयतेशार्ङ्गधरेणतेषांसुसंग्रहःसज्जनरंज
नाय॥२॥हेत्वादिरूपाकृतिसात्म्यजातिभेदैःसमीक्ष्यातुरसर्वरोगान्॥चिकित्सितंकर्ष
णबृंहणाख्यंकुर्वीतवैद्योविधिवत्सुयोगैः॥३॥दिव्यौषधीनांबहवःप्रभेदाःवृंदारका
णामिवविस्फुरंति॥ज्ञात्वेतिसंदेहमपास्यधीरैःसंभावनीयाविविधप्रभावाः॥४॥स्वा
भाविकागंतुककायिकांतरारोगाभवेयुःकिलकर्मदोषजाः॥तच्छेदनार्थंदुरितापहा
रिणःश्रेयोमयान्योगवरान्नियोजयेत्॥५॥प्रयोगानागमात्सिद्धान्प्रत्यक्षादनुमान
तः॥सर्व लोकहितार्थायवक्ष्याम्यनतिविस्तरात्॥६॥ ॥अथानुक्रमणिका॥ ॥

१

प्रथमं परिभाषास्याद्भैषज्याख्यानकं तथा ॥ नाडीपरिक्षादिविधिस्ततो दीपनपाचनं ॥ ७ ॥
ततः कालादिकाख्यानं आहारादिगतिस्ततः ॥ रोगाणां गणनाचैव पूर्वखंडोयमीरितः ॥ ८ ॥
स्वरसः क्काथफांटौ च हिमः कल्कश्च चूर्णकं ॥ तथैव गुटिकालेहौ स्नेहः संधानमेव च ॥ ९ ॥
धातुशुद्धिरसाश्चैव खंडोयं मध्यमः स्मृतः ॥ स्नेहपानं स्वेदविधिर्वमनं च विरेचनं ॥ १० ॥
ततस्तु स्नेहबस्तिस्यात्ततश्चापि निरूहणं ॥ ततश्चाप्युत्तरोबस्तिस्ततो नस्यविधिस्मृतः ॥ ११ ॥
धूमपानविधिश्चैव गंडूषादिविधिस्ततः ॥ लेपादीनां विधिख्यानस्ततः शोणितविश्रुतिः ॥ १२ ॥
नेत्रकर्णप्रकारश्च खंडः स्यादुत्तरस्त्वयं ॥ द्वात्रिंशत्संमिताध्यायैर्युक्तेयं संहितास्मृता ॥ १३ ॥
॥ अथ परिभाषा ॥ ॥ नमानेन विषड्विंशातिशतान्यत्र श्लोकानां गणितानि च ॥
नायुक्तिर्द्रव्याणां ज्ञापते क्कचित् ॥ अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥ १४ ॥ त्र

२

सरेणु बुधैः प्रोक्तस्त्रिंशता परमाणुभिः॥ त्रसरेणुस्तु पर्यायैर्नाम्ना वंशी निगद्यते॥१६॥ जाला
तरगतैः सूर्यः करैर्वंशी विलोक्यते॥ षड्वंशीभिर्मरीचिस्याताभिः षड्भिश्च राजिका॥१७॥ तिसृभि
राजिकाभिश्च सर्षपः प्रोच्यते बुधैः॥ यवोष्टसर्षपैः प्रोक्तो गुंजास्यात्तच्चतुष्टयं॥१८॥ षड्भिश्च
रक्तिकाभिस्यान्माषको हेमधानकौ॥ माषैश्चतुर्भिः शाणस्याद्धरणः स निगद्यते॥१९॥ टं
कः स एव कथितस्तद्द्वयं कोल उच्यते॥ क्षुद्रणो वटकश्चैव द्रंक्षणः स निगद्यते॥२०॥ कोलद्व
यं च कर्षस्यात्स प्रोक्तः पाणिमाणिका॥ अक्षः पिचुः पाणितलं किंचित्पाणिश्च तिंदुकं॥२१॥
बिडालपदकं चैव तथा षोडशिका मता॥ करमध्यो हंसपदं सुवर्णकवलग्रहः॥२२॥ उदुं
बरं च पर्यायैः कर्ष एव निगद्यते॥ स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा॥२३॥ शुक्ति
भ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका॥ प्रकुंचः षोडशी बिल्वं पलमेवात्र कीर्त्यते॥२४॥ प

२

लाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च निगद्यते॥ प्रसृतिभ्यामंजलिः स्यात्कुडवोर्द्धशरावकः॥२५॥
अष्टमानं च सा ज्ञेया कुडवाभ्यां च मानिका॥ शरावोष्टपलं तद्वत् ज्ञेयमत्र विचक्षणैः॥२६॥ श
रावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकः॥ भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः॥२७॥
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोर्मणः॥ उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञितः॥२८॥
द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिशरावकः॥ शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता
॥२९॥ द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः॥ चतुःसहस्रपलिका षण्णवत्यधिका
च सा॥३०॥ पलानां द्विसहस्रं तु भार एकः प्रकीर्तितः॥ तुलापलशतं ज्ञेया सर्वत्रैवैष नि
श्चयः॥३१॥ माषटंकाक्षबिल्वानि कुडवः प्रस्थमाढकं॥ राशिर्गोणी खारिकेति यथोत्तर
चतुर्गुणाः॥३२॥ गुंजादिमानमारभ्य यावत्स्यात्कुडवस्थितिः॥ द्रवार्द्रशुष्कद्रव्याणां ताव

२

न्मानंसमंमतं॥३३॥प्रस्थादिमानमारभ्यद्विगुणंतुद्रवार्द्रयोः॥मानंतथानुलायाश्चद्वि
गुणंनक्वचित्स्मृतं॥३४॥मृद्वृक्षवेणुलोहादेर्भांडंयच्चतुरंगुलं॥विस्तीर्णंचतथोच्चंच
तन्मानंकुडवंभवेत्॥३५॥यदौषधंतुप्रथमंयस्ययोगस्यकथ्यते॥तन्नाम्नैवसयोगो
हिकथ्यतेत्रविनिश्चयः॥३६॥ ॥इतिमागधपरिभाषा॥ ॥स्थितिर्नास्त्येवमात्रा
याःकालमग्निंबलंवयः॥प्रकृतिंदेशदोषौचदृष्ट्वामात्रांप्रयोजयेत्॥३७॥यतोमंदा
ग्नयोह्रस्वाहीनसत्वानराःकलौ॥अतस्तुमात्रातद्योग्याप्रोच्यतेसूत्तसंमता॥३८॥य
वोद्वादशभिर्गौरसर्षपैःप्रोच्यतेबुधैः॥यवद्वयेनगुंजास्यात्त्रिगुंजोवल्लउच्यते॥३९॥मा
षोगुंजाभिरष्टाभिःसप्तभिर्वाभवेत्क्वचित्॥स्याच्चतुर्माषिकैःशाणःसनिष्कष्टंकएवच
॥४०॥गद्याणोमाषकैःषड्भिःकर्षस्याद्दशमाषकः॥चतुःकर्षैःपलंप्रोक्तंदशशाणमितंबु

३

धैः॥४१॥ चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः॥ कालिंगं मागधं चेति द्विविधं मानमु
च्यते॥४२॥ कालिंगं मागधं श्रेष्ठं मानं मानविदो विदुः॥४३॥ ॥इति कालिंगपरिभाषा॥
नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु॥ विना विडंगकृष्णाभ्यां गुडधान्याज्यमाक्षि
कैः॥४४॥ गुडूचीकुटजोवासाकुष्मांडं च शतावरी॥ अश्वगंधा सहचरौ शतपुष्पाप्रसारि
णी॥४५॥ प्रयोक्तव्याः सदैवार्द्रा द्विगुणा नैव कारयेत्॥ शुष्कं नवीनं यद्द्रव्यं योज्यं सकलक
र्मसु॥४६॥ आर्द्रं प्रसिद्धं द्रव्यं तु यदा शुष्कं प्रयुज्यते॥ आर्द्रलाभक्रियाकाले द्विगुणं स्यान्न
थापुनः॥४७॥ आर्द्रं च द्विगुणं युंज्यादेष सर्वत्र निश्चयः॥४७॥ कालेनोक्ते प्रभातं स्यादंगे
नोक्ते जटा भवेत्॥ भागे नोक्ते च साम्यं स्यात्पात्रे नोक्ते च मृन्मयं॥४८॥ एकमप्यौषधं यो
गे यस्मिन्यत्पुनरुच्यते॥ मानतो द्विगुणं प्रोक्तं तद्द्रव्यं तत्त्वदर्शिभिः॥४९॥ गुणहीनं भवेद्

र्षादूर्ध्वंतद्रूपमौषधं॥मासद्वयात्तथा चूर्णंहीनवीर्यत्वमाप्नुयात्॥५०॥औषध्योलघुपाका
स्युर्निर्वीर्याविवत्सरात्परं॥पुराणास्युर्गुणैर्युक्ताआसवाधातवोरसाः॥५१॥हीनत्वंगुटिका
लेहौ लभेतेवत्सरात्परं॥हीनास्युर्घृततैलाद्याश्चतुर्मासाधिकास्तथा॥५२॥चूर्ण
स्नेहासवालेहाः प्रायशश्चंदनान्विताः॥कषायलेपयोः प्रायोयुज्यतेरक्तचंदनं॥५३॥व्या
धेरयुक्तंयद्द्रव्यंगणोक्तमपितत्त्यजेत्॥अनुक्तमपियुक्तंयद्योजयेत्तत्रतद्बुधः॥५४॥ ॥
॥इतियुक्तायुक्तविचारः॥ ॥आग्नेयाविंध्यशैलाद्यासौम्योहिमगिरिर्मतः॥अत
स्तदौषधानिस्युरनुरूपाणिहेतुभिः॥५५॥अन्येष्वपिप्ररोहंतिवनेषूपवनेषुच॥गृह्णी
यात्तानिसुमनाःशुचिःप्रातःसुवासरे॥५६॥आदित्यसन्मुखोमौनीनमस्कृत्यशिवंहृदि
॥साधारणधराद्द्रव्यंगृह्णीयादुत्तराश्रितं॥५७॥वल्मीककुत्सितानूपश्मशानोखरमा

गजाः॥जंतुवह्निहिमव्याप्तानोषध्यः कार्यसाधकाः॥५८॥सर्वलक्षणसंपन्नाभूमिः साधा
रणास्मृताः॥पुष्पाणिपत्रपत्रैवतद्गुणानिविशेषतः॥५९॥शरद्यखिलकार्यार्थंग्राह्यं
सरसमौषधं॥विरेकवमनार्थंचवसंतेचसमाहरेत्॥६०॥ग्रीष्मेमंजरिकाग्रेषुवर्षासु
दलचर्मणि॥वसंतेमूलमाश्रित्यवृक्षेषुरससंभवः॥६१॥अनिर्दिष्टाप्रसिद्धेषुमूलंग्रा
ह्यंत्वचादिषु॥अनिस्थूलाजटायास्युस्तासांग्राह्यांस्त्वचोबुधैः॥६२॥गृह्णीयात्सूक्ष्म
मूलानिसकलान्यपिबुद्धिमान्॥न्यग्रोधादेस्त्वचोग्राह्याः सारस्याद्बीजकादितः॥६३॥
तालीसादेश्चपत्राणिफलंस्यात्त्रिफलादितः॥धातक्यादेश्चपुष्पाणिस्नुह्यादेः क्षीरमाहृ
रेत्॥६४॥ ॥इतिश्रीदामोदरसूनुशार्ङ्गधरेणविरचितायांसंहितायांसूत्रस्थानेप
रिभाषाद्यौषधग्रहणाध्यायः प्रथमः॥ ॥भैषज्यमभ्यवहरेत्प्रभातेप्रायशोबुधः॥

५

कषायांश्च विशेषणतत्रभेदश्चदर्शितः॥१॥ ज्ञेयः पंचविधः कालोभैषज्यग्रहणेन्नृणां॥ किं
चित्सूर्योदयेजातेतथादिवसभोजने॥२॥ सायंभवेद्भोजनेचमुहुश्चापितथानिशि॥ प्रायः
पित्तकफोद्रेकेविरेकवमनार्थयोः॥३॥ लेखनार्थेचभैषज्यंप्रभातेनत्समाहरेत्॥ एवंस्या
त्प्रथमः कालोभैषज्यग्रहणेन्नृणां॥४॥ ॥इतिप्रथमः कालः॥ ॥भैषज्यंविगुणेपाने
भोजनाग्रेप्रशस्यते॥ अरुचौचित्रभोज्यैश्चमिश्रंरुच्चिरमाहरेत्॥५॥ समानवातेवि
गुणेमंदाग्नावग्निदीपनं॥ दद्याद्भोजनमध्येचभैषज्यंकुशलोभिषक्॥६॥ व्यानको
पेचभैषज्यंभोजनांतेसमाहरेत्॥ हिक्काक्षेपककंपेषुपूर्वमंतेचभोजनात्॥७॥ एवंद्वि
तीयः कालश्चप्रोक्तोभैषज्यकर्मणि॥ ॥इतिद्वितीयः कालः॥ ॥उदानेकुपितेवाते
स्वरभंगादिकारिणी॥ ग्रासग्रासांतरेदेयंभैषज्यंसांध्यभोजने॥८॥ प्राणप्रदुष्टेसांध्य

५

कालोयंस्यात्तृतीयकः॥९॥ ॥इतित
स्यभुक्तस्यांतेचदीयते॥औषधंप्रायशोधीरैः कालोयंस्यात्तृतीयकः॥९॥ ॥इतितृ
तीयःकालः॥ ॥मुहुर्मुहुश्चतृट्छर्दिहिक्काश्वासगरेषुच॥सान्नंचभेषजंदद्यादिति
कालश्चतुर्थकः॥१०॥ ॥इतिचतुर्थःकालः॥ ॥ऊर्ध्वजत्रुविकारेषुलेखनेबृंहणे
तथा॥पाचनेशमनेदेयमनन्नंभेषजंनिशि॥११॥इत्येवंपंचमःकालोप्रोक्तोभैषज्य
हेतवे॥१२॥ ॥इतिपंचमःकालः॥ ॥द्रव्येरसोगुणोवीर्यंविपाकःशक्तिरेवच॥सं
बंधेनक्रमादेतापंचावस्थाप्रकीर्तिताः॥१३॥मधुरोम्लपटुश्चैवकटुस्तिक्तःकषायकाः
॥इत्येतेषड्रसाख्यानानानाद्रव्यसमाश्रिताः॥१४॥धरांबुक्ष्मानलजलज्वलनाकाश
मारुतैः॥वाय्वग्निक्ष्मानिलैर्भूतद्वयैश्चषड्रसाःक्रमात्॥१५॥ ॥इतिषड्रसाः॥ ॥
गुरुस्निग्धश्चतिक्ष्णश्चरूक्षोलघुरितिक्रमात्॥धरांबुवह्निपवनव्योम्नांप्रायोगुणाः

स्मृताः॥१६॥एष्वेवांतर्भवि(त्रिं)शतिः समे गुणेषु गुणसंचयाः॥ ॥इतिगुणाः॥ ॥वीर्यमु
ष्णं तथा शीतं प्रायसो द्रव्यसंश्रयं॥यत्सर्वमग्निषोमीयं दृश्यंते भुवनत्रयं॥१७॥महाभूतानि
सूक्ष्मांबुज्वलनाकाशमारुतः॥अत्रैवांतर्भविष्यंति वीर्याण्यन्यानियान्यपि॥१८॥ ॥इति
वीर्यं॥ ॥मिष्टः पटुश्च मधुरमम्लोम्लंपच्यते रसः॥कषायकटुतिक्तानां पाकः स्यात्प्रायशः
कटुः॥१९॥मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते॥कटुकाज्जायते वायुः कर्माण्येतानि
पाकतः॥२०॥ ॥इति विपाकः॥ ॥प्रभावस्तु यथा धात्रीलकुचस्य रसादिभिः॥समापि
कुरुते दोषत्रितयस्य विनाशनं॥२१॥क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्प्रभावतः॥ज्वरं हंति शि
रोबध्वा सहदेवीजटा यथा॥२२॥ ॥इति प्रभावः॥ ॥क्वचिद्रसो गुणो वीर्यं विपाकः श
क्तिरेव च॥कर्म स्वं स्वं प्रकुर्वंति द्रव्यमाश्रित्य ये स्थिताः॥२३॥ ॥इति द्रव्यरसगुणवीर्यवि

पाकः प्रभावाः॥ ॥चयकोपशमायस्मिन्दोषाणांसंभवंतिहि॥ ऋतुषट्कंतकाख्यातं
रवेराशिषुसंक्रमात्॥२४॥ ग्रीष्मामेषवृषौप्रोक्तः प्रावृट्मिथुनकर्कयोः॥ सिंहकन्येसम
तावर्षास्तुलावृश्चिकयोःशरत्॥२५॥ धनुर्ग्राहोचहेमंतोवसंतः कुंभमीनयोः॥ ग्रीष्मे
संचीयतेवायुःप्रावट्कालेप्रकुप्यति॥२६॥ वर्षासुचीयतेपित्तंशरत्कालेप्रकुप्यति॥
हेमंतेचीयतेश्लेष्मावसंतेचप्रकुप्यति॥२७॥ प्रायेणप्रशमंयातिस्वयमेवसमीरणः
॥शरत्कालेवसंतेचपित्तंप्रावट्कृतोकफः॥२८॥ कार्त्तिकस्यदिनान्यष्टौअष्टावग्र
हणस्यच॥यमदंष्ट्राःसमाख्याताअल्पाहारीसजीवति॥२९॥ चयकोपशमांदोषावि
हाराहारसेवनैः॥ समानैर्यांतिकालेपिविपरीतैर्विपर्ययं॥३०॥ लघुरूक्षान्मिताहारा
दतिशीतात्छ्रमात्तथा॥ प्रदोषेकामशोकाभ्यांभिच्चिंताराात्रिजागरैः॥३१॥ अभिघा

13

७

नादपांगाहाऽजीर्णेन्ने धातुसंक्षयात्॥ वायुः प्रकोपं यात्येभिः प्रसनीकैश्चशाम्यति॥३२॥ विदाहिकटुतीक्ष्णाम्लभोज्यैरत्युष्टसेवनात्॥ ध्याह्ने क्षुत्तषारोधाऽजीर्यत्यन्ये र्द्धरात्रके॥३३॥ पित्तं प्रकोपं यात्येभिः प्रसनीकैश्चशाम्यति॥ मधुरस्निग्धशीनादिभोज्यैर्दिवसनिद्रया॥३४॥ मंदाग्नौ च प्रभाते च भुक्तमात्रे तथा श्रमात्॥ श्लेष्मप्रकोपं यात्येभिः प्रसनीकैश्चशाम्यति॥३५॥ ॥इति श्रीदामोदरसूनुशार्ङ्गधरेण विरचितायां संहितायां सूत्रस्थाने भैषज्यकालोक्तिद्रव्यरसगुणवीर्यविपाकप्रभावोक्तिकथनं नाम द्वितीयोध्यायः॥२॥ ॥आदौ सर्वेषु रोगेषु नाडिकामूत्रयोस्तथा॥ परीक्षां कारयेद्वैद्यः पश्चाद्रोगं चिकित्सयेत्॥१॥ करस्यांगुष्टमूले या धमिनी जीवसाक्षिणी॥ तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पंडितैः॥२॥ स्त्रीणां भिषग्वामहस्ते द

७

स्त्रिणंः पुरुषस्यच ॥ परिक्षां कारयेद्यत्नात्साध्यासाध्यनिरिक्षयेत् ॥ ३ ॥ नाडीधत्ते
मरुत्कोपेजलौकासर्पयोर्गतिं ॥ कुलिंगकाकमंडूकगतिंपित्तस्यकोपतः ॥ ४ ॥ हंसपा
रापतगतिंधत्तेश्लेष्मप्रकोपतः ॥ लावत्तित्तिरवर्त्तीरगमनंसन्निपाततः ॥ ५ ॥ कदा
चिन्मंदगमनाकदाचिद्वेगवाहिनी ॥ द्विदोषकोपतोज्ञेयाहंतिचस्थानविच्युता ॥ ६ ॥
स्थित्वास्थित्वाचलतियासास्मृताप्राणनाशिनी ॥ अतिक्षीणाचशीताचजीवितंहंस
संशयं ॥ ७ ॥ ज्वरकोपेनधमिनीसोष्णावेगवतीभवेत् ॥ कामक्रोधाद्वेगवहाक्षीणा
चिंताभयप्लुता ॥ ८ ॥ मंदाग्नेःक्षीणधातोश्चनाडीमंदतराभवेत् ॥ असृक्पूर्णाभवेत्
कोष्णागुर्वीसामागरीयसी ॥ ९ ॥ लघ्वीवहतिदीप्ताग्नेस्तथावेगवतीमता ॥ सुखि
नस्यस्थिराज्ञेयातथाबलवतीमता ॥ [illegible] ॥ चपलाक्षुधितस्यापितृप्तस्यवहतिस्थि

रा॥१०॥सद्यः स्नानस्यभुक्तस्यतथास्ने[illegible]हितः॥क्षुत्तृषार्त्तस्यसुप्तस्यनाडीसम्य
क्नबुध्यते॥११॥ ॥इतिनाडीपरीक्षा॥ [illegible]॥स्वप्नेषुनग्नान्मुंडांश्चरक्तकृष्णांबरा
वृतान्॥व्यंगांश्चविकृतान्कृष्णान्सपाशान्सायुधानपि॥१२॥बध्नतोनिघ्नतश्चापि
दक्षिणांदिशिमाश्रितान्॥महिषोष्ट्रखरारूढांस्त्रीपुंसोर्यस्तुपश्यति॥१३॥सस्वस्थो
लभतेव्याधिंरोगीयासेवपंचतां॥अधोयोनिःपतत्युच्चैर्जलेग्नौवाविलीयते॥१४॥
श्वापदैर्हन्यतेवापिमत्स्याद्यैर्गिलितोभवेत्॥यस्यनेत्रेविलीयेतेदीपोनिर्वाणतां
व्रजेत्॥१५॥तैलंसुरांपिबेद्यस्तुपिलोहंवालभतेतिलान्॥पक्वान्नंलभतेश्चातिविशेत्कू
पंरसातलं॥१६॥सस्वस्थोलभतेरोगंरोगीयासेवपंचतां॥दुःस्वप्नान्येवमादीश्चदृ
ष्ट्वाब्रूयान्नकस्यचित्॥१७॥स्नानंकुर्याद्दिषस्यैवदद्याद्धेमतिलान्यपि॥पठेत्स्तोत्रा

कृत्वैवं त्रिदिनं मर्त्यो दुःस्वप्नात्प्रतिमुच्यते॥ स्वप्नेषु
णि देवानां रात्रौ देवालये वसेत्॥१८॥ कृत्वैवं त्रिदिनं मर्त्यो दुःस्वप्नात्प्रतिमुच्यते॥ स्वप्नेषु
यः सुरान्भूपान्जीवंतः सुहृदो द्विजान्॥१९॥ गोसमिद्धाग्नितीर्थानि पश्येत्सुखमवाप्नुया
त्॥ तीर्त्वा कलुषतोयानि जित्वा शत्रुगणानपि॥२०॥ आरुह्य सौधगोशैलकरिवाहान्सु
खी भवेत्॥ शुभ्रपुष्पाणि वासांसि मांसमत्स्यान्फलान्यपि॥२१॥ प्राप्य रुग्नः सुखी भू
यात्स्वस्थो धनमवाप्नुयात्॥ अगम्यागमनं लेपो विष्टया रुदितं मृतिः॥२२॥ आममांसा
शनं स्वप्ने धनारोग्याप्तये विदुः॥ जलौकाभ्रमरीसर्पो मक्षिका वापि यं दशेत्॥२३॥ रोगी
स भूयादारोग्यः स्वस्थो धनमवाप्नुयात्॥२४॥ आरोहणं गोवृषकुंजराणां प्रासादशै
लाग्रवनस्पतीनां॥ विष्टानुलेपो रुदितं मृ[...]च स्वप्नेष्वगम्यागमनं च धान्यं॥२५॥
॥ [...]को[...]क्तविवर्णशीर्णवसनो व्यंगो विजातिर्दध
॥ ॥इति स्वप्नलक्षणानि॥

17

९

काष्टंलोष्टतृणंचपाशलकुशान्मुंडीचशा[illegible]॥रुक्षाश्टःकरमर्दितास्त्ररवनिंसंलेख

यन्पंकिलोरीनोमुंडशिरोविमुक्तकुटिलोर[illegible]नविभ्रांतधीः॥२६॥दूताःस्वजानयः

स्वंगाःपटवोनिर्मलांबराः॥सुखिनोश्ववृषारूढाःशुभ्रपुष्पा[illegible]फलैर्युताः॥२७॥सु

ज्ञानयःसुचेष्टाश्चसजीवदिशिसंस्थिताः॥भिषजःसमयेप्राप्तारोगिणःसुखहेतवे॥

॥२८॥यस्यांप्राणमरुद्वातिसानाडीजीवसंयुता॥तस्यहस्तेशुभायस्यात्शून्यायांमरणा

यच॥२९॥ ॥इतिदूतलक्षणानि॥ ॥भोजनःछेदनःश्राद्धस्वप्नकृदुष्टवाङ्नाः॥अ

स्वस्थाभ्यंगकृद्वेषोदुष्टकार्यायनोभवेत्॥३०॥मुंडीमुक्तपटोजटीहिचतुष्पांगारःक्षुरां

शृंगिनःतैलंभस्मवल्कास्थिरिक्तकलशायुद्धंधनेवांतयः॥तैलाभ्यक्तविमुक्तकेशविक

लःव्यंगाःपिशाचानराःदुर्वाक्यंचयदाभवेसथिनदाकार्यविनाशंव्रजेत्॥३१॥स्त्रीसंज्ञाः

९

पक्षिणो वामा श्शुभा दृष्ट्वा बिलेषयाः पुल्लिंगाः पक्षिणः सव्याः याने व्यस्त प्रवेशने ॥३२॥
इति अपशकुनं॥ ॥ नारी पुत्रवती मार्गे कुमारी दीपमालिका॥ ज्वलितोग्निः शुभाः शब्दाः मं
गलं शंखनादिकं॥३३॥ मृदंगादिध्वनिः पूर्णकलशो दधिमृत्तिका॥ फलं च मदिरा मांसं म
त्स्यादि कुंकुमादिकं॥३४॥ गजाश्वरथतांबूलं चामरं कनकादिकं॥ शुभः स्याद्गच्छतो मार्गे
वैद्यस्य फलदायकः॥३५॥ वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते॥ न च शुभं सौम्यशकु
नं प्रोक्तं दीप्तं न शोभनं॥३६॥ ॥ इति शुभशकुनानि॥ ॥ निजः प्रकृतिवर्णाभ्यां युक्तः
सत्वेन संयुतः॥ चिकित्स्यो भिषजो रोगी वैद्यभक्तो जितेंद्रियः॥३७॥ ॥ इति रोगी लक्ष
णं॥ ॥ प्रातरग्रभवां धारां त्यक्त्वा मूत्रस्य रोगिणः॥ तत्र तैललवं क्षिप्त्वा साध्यासाध्य
विचारयेत्॥३८॥ विकाशि चेत्तैलमथा[illegible]साध्यः स रोगी न विकाशितश्चेत्॥ सकष्ट

१०

साध्यः स्तलगेलसाध्यो नागार्जुनेनापि कु[illegible]रिक्षा ॥३९॥ ॥इति मूत्रपरिक्षा॥ ॥
कुचेलः कर्कशः स्तब्धः कुग्रामी स्वयमागतः ॥ [illegible] द्यानपूज्यंते धन्वंतरिसमापि हि ॥४०॥
वैद्यस्या द्गुरुसंनिधानकुशलः पीयूषपाणिः शुचिर्दक्षः कालवयोबलौषधगदः ज्ञानो
दयः शास्त्रवित् ॥ धीरांतःकरणः क्रियासुनिपुणः कारुण्यपूर्णस्पृहायुक्तो भूतनियंत्रमं
त्रचतुरो वाग्मी प्रगल्भः सुधीः ॥४१॥ ॥इति वैद्यलक्षणं॥ ॥इति श्रीदामोदरसूनु
नाशार्ङ्गधरेण विरचितायां संहितायां सूत्रस्थाने नाडीपरिक्षास्वप्नलक्षणदूतशाकुन
रोगीमूत्रवैद्यलक्षणाध्यायस्तृतीयः ॥३॥ ॥पचेन्नामं वह्निकृद्यद्दीपनं तद्यथामिशिः
॥पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनं ॥१॥ नागकेसरवद्विद्याच्चित्रो दीपनपाचनं॥
नशोधयति न द्वेष्टि समां दोषांस्तथोद्धतान् ॥२॥ समीकरोति यत्तेयं शमनं तद्यथामृता॥

१०

कृत्वापाकंमलानांयद्भित्वाबंधमधोनयेत्॥३॥तच्चानुलोमनंज्ञेयंयथाप्रोक्ताहरीतकी॥
पक्कव्यंयदपक्कैवश्लिष्टंकोष्टेमलादिकं॥४॥नयसधःश्रंसनंतद्यथास्यात्कृतमालकः॥
मलादिकमबद्धंयत्बद्धंवापीडितंमलैः॥५॥नीत्वाधःपातयतितद्भेदनंकटुकीयथा॥
विपक्कंयदपक्कंवामलादिद्रवतांनयेत्॥६॥रेचयसगितज्ज्ञेयंरेचनंत्रिवृतायथा॥अ
पक्कपित्तश्लेष्माणंबलादूर्ध्वंनयेत्तुयत्॥७॥वमनंतद्धिविज्ञेयंमदनस्यफलंयथा॥
स्थानाद्बहिर्नयेदूर्ध्वमधोवामलसंचयं॥८॥देहसंशोधनंतत्स्याद्देवनालीफलंय
था॥श्लिष्टान्कफादिकान्दोषान्उन्मूलयतितद्बलात्॥९॥छेदनंतद्यथाक्षारमरी
चानिशिलाजितु॥दीपनंपाचनंयत्स्यादुष्णत्वाद्द्रवशोषणं॥१०॥ग्राहीतंचयथाशुंठी
जीरकंगजपिप्पली॥रोक्ष्यान्छेत्साकषायत्वाल्लघुपाकाच्चयद्भवेत्॥११॥वानकृत्तं

तत्॥२०॥विश्लेष्यौजश्च धातुभ्योयथाक्रमुककोद्रवाः॥बुद्धिंलुंपतियद्द्रव्यंमदकारित
दुच्यते॥२१॥तमोगुणप्रधानंचयथामद्यंसुरादिकं॥व्यवायिचविकाशिस्यात्सूक्ष्मंछे
दिमदावहं॥२२॥आग्नेयंजीवितहरंयोगवाहिविषंस्मृतं॥निजवीर्येणयद्द्रव्यंस्रोतोभ्यो
दोषसंचयं॥२३॥निरस्यतिप्रमाथिस्यात्तद्यथामरिचंवचा॥पैच्छिल्याद्गौरवाद्द्रव्यंरुध्वा
रसवहाःशिराः॥२४॥धत्तेयद्गौरवंतत्स्यादभिष्यंदियथादधिः॥२५॥ ॥इतिश्रीदामो
दरसूनुशार्ङ्धरविरचितायांसंहितायांसूत्रस्थानेदीपनपाचनादिगुणोक्तिकथनंना
मचतुर्थोध्यायः॥४॥ ॥कलाःसप्ताशयाःसप्तधातवःसप्ततन्मलाः॥सप्तोपधा
तवःसप्तत्वचःसप्तप्रकीर्तिताः॥१॥त्रयोदोषानवशतंस्नायूनांसंधयस्तथा॥दशा
धिकंचद्विशतमस्थीनांत्रिशतंमतं॥२॥सप्तोत्तरंमर्मशतंशिराःसप्तशतंतथा॥चतु

१२

विंशतिराख्याताधमिन्योरसवाहिकाः॥३॥नाभेरधःप्रभृतयोदशयांसधस्तादूर्ध्वंस्थता
प्रभृतयोदशान्द्वदेव॥द्वेद्वेशिरेप्रवितते प्रभृतेभ्यस्तिर्यक्युक्ताश्चतुर्भिरिति विंशतिरत्रका
ये॥४॥आसांचसूक्ष्मसुषिराणिशतानिसप्तशास्तानियैरसकृदन्नरसंवहद्भिः॥आ
प्यायनेवपुरिदंहिनृणाममीशामंभःस्रवद्भिरिवसिंधुशतैःसमुद्रः॥५॥द्वादशभिर्द्वि
गुणाभिरमिभिर्व्याप्तमिदंनृशरीरमशेषं॥अभिरमिकफपित्तसमीराः प्राणभृतांप्र
सरंतिशरीरे॥६॥अपादतःप्रसृतिगात्रमशेषमेषामामस्तकादपिचनाभिसमुद्भ
वेन॥एतन्मदंगमिवचर्मचयेनबद्धंगात्रंनृणामितिशिराःशतसप्तकेन॥७॥मांस

१२

पेश्यःसमाख्यातानृणांपंचशतंबुधैः॥स्त्रीणांचविंशत्यधिकाःकंडराश्चैवषोडश॥
॥८॥नरदेहेदशारंध्राणिनारीदेहेत्रयोदश॥एतत्समासतःप्रोक्तंविस्तरेणाधुनोच्यते

॥९॥ मांसासृग्मेदसां तिस्रो यकृत्प्लीहोश्चतुर्थिका॥ पंचमीतंत्रधांत्राणां षष्ठी चाग्नीधरा मता॥१०॥ रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः॥ श्लेष्माशयस्यादुरसि तस्मादामाशयस्त्वधः॥११॥ ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः॥ तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः॥१२॥ मलाशयस्त्वधस्तस्य बस्तिर्मूत्राशयः स्मृतः॥ जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयास्त्विमी॥१३॥ पुरुषेभ्योधिकाश्चान्ये नारीणामाशयास्त्रयः॥ धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ॥१४॥ रसासृग्मांसमेदोस्थिमज्जशुक्राणि धातवः॥ जायंते अन्योन्यतः सर्वे पाचिताः पित्ततेजसा॥ जिह्वानेत्रकपोलानां जलं पित्तं च रंजकं॥ कर्णविट्रसनादंतकक्षामेंढ्रादिजं मलं॥१६॥ नखनेत्रमलं वक्त्रे स्निग्धत्वं पीडिकास्तथा॥ जायंते सप्तधातूनां मलान्येवमनुक्रमात्॥१७॥ स्तन्यं रजश्च नारीणां काले भवति गच्छति॥ शु

१३

द्भमांसभवः स्नेहोयस्त्वयंकीर्त्तिनेवसा॥१८॥स्वेदोदंतास्तथाकेशास्तथैवोजश्चसप्तमं॥ओ
जः सर्वशरीरस्थंस्निग्धंशीतंस्थिरंसितं॥१९॥सोमात्मकंशरीरस्यबलपुष्टिकरंमतं॥इति
धातूद्भवात्तेयाएतेसप्तोपधातवः॥२०॥ज्ञेयावभासिनीपूर्वासिध्मस्थानंचसामता॥
द्वितीयालोहिताज्ञेयानिलकालकजन्मभूः॥२१॥श्वेतातृतीयासंख्यातास्तानंचर्मदल
स्यसा॥नाम्नाचतुर्थीविज्ञेयाकिलासश्वित्रभूमिका॥२२॥पंचमीवेदिनीख्यातासर्व
कुष्टोद्भवस्तनः॥विख्याताल्लोहिताषष्ठीग्रंथिगंडापचीस्थिता॥२३॥स्थूलाल्लकूसप्तमी
ख्याताविद्रध्यादेःस्थितिश्चसा॥इतिसप्तत्वचःप्रोक्ताःस्थूलाव्रीहिद्विमात्रया॥२४॥वा
युःपित्तंकफोदोषाधातवश्चमलास्तथा॥तत्रापिपंचधाख्याताःप्रत्येकंदेहधारणात्॥२५॥
पवनस्तेषुबलवान्विभागकरणान्मतः॥पित्तंपंगुकफःपंगुपंगवोमलधातवः॥२६॥वायु

१३

नायत्र नीयंते तत्र गच्छंति मेघवत् ॥ रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ॥ २७ ॥ मला
शये चरे कोष्टे वह्निस्थाने तथा हृदि ॥ कंठे सर्वांगदेशेषु वायुः पंचप्रकारगः ॥ २८ ॥ हृदि प्राणो
गुदे पानः समानो नाभिसंस्थितः ॥ उदानः कंठदेशे स्यात् व्यानः सर्वशरीरगः ॥ २९ ॥ अपा
नः स्यात् समानश्च प्राणोदानौ च वायवः ॥ व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात्
॥ ३० ॥ पित्तमुष्णं द्रवं पीतं नीलं सत्वगुणोत्तरं ॥ कटु तिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत् ॥
॥ ३१ ॥ अग्न्याशये भवे स्मिन्नमग्निरूपं तिलोन्मितं ॥ त्वचि कांतकरं ज्ञेयं लेपाभ्यंगादि पा
चकं ॥ ३२ ॥ दृश्यं यकृति यस्मिंस्तद्रसं शोणितां नयेत् ॥ यस्मिन्नेत्रयुगले रूपदर्शनकारि
तत् ॥ ३३ ॥ यस्मिन् हृदये तिष्ठेत् मेधाप्रज्ञाकरं च तत् ॥ पाचकं भ्राजकं चैव रंजकालोचके
तथा ॥ ३४ ॥ साधकं चे ति पंचैव पित्तनामान्यनुक्रमात् ॥ कफः स्निग्धो गुरुः श्वेतः पि

छलः क्षीनलसत्नथा ॥३५॥ तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ॥ कफः आमाशये मूर्ध्नि
कंठे हृदि च संधिषु ॥३६॥ तिष्ठन्करोति देहस्य स्थैर्य सर्वांगपाटवं ॥ क्लेदनः स्नेहनश्चैव बोधन
श्चावलंबनः ॥३७॥ श्लेष्मणश्चेतिनामानि कफस्योक्तान्यनुक्रमात् ॥ स्नायवो बंधनं प्रोक्ता
देहे मांसास्थिमेदसां ॥३८॥ संधयश्चांगसंधानाद्देहे प्रोक्ताः कफान्विता ॥ आधारं च तथा सारं
कायेस्थीनि बुधा विदुः ॥३९॥ मर्म्माणि जीवधाराणि प्रायेणमुनयो जगुः ॥ संधिबंधनका
रिण्यो दोषधातुवहाः शिराः ॥४०॥ धमिन्यो रसवाहिन्यो धमंति पवनं तनौ ॥ मांसपेश्यो बला
यस्युरवष्टंभाय देहिनां ॥४१॥ प्रसारणाकुंचनयोरंगानां कंडरा मताः ॥ नासानयनकर्णानां द्वे
द्वे रंध्रे प्रकीर्तिते ॥४२॥ मेद्रूचापानवक्त्राणामेकैकं रंध्रमुच्यते ॥ दशमं मस्तके प्रोक्तं रंध्रा
णीति नृणां विदुः ॥४३॥ स्त्रीणां त्रीण्यधिकानि स्युस्तनयोर्गर्भवर्त्मनः ॥ सूक्ष्मछिद्राणि चा

१४

न्यानि मनानि त्वचिजन्मनां ॥ ४४ ॥ न द्वामेपुष्फुसंप्लीहाद्दक्षिणांगेयकृन्मतं ॥ उदानवायोरा
धारः पुष्फुसंप्रोच्यतेबुधैः ॥ ४५ ॥ रक्तवाहिशिरामूलंप्लीहाख्यातोमहर्षिभिः ॥ यकृद्रंजकपि
त्तस्यस्थानंरक्तस्यसंश्रयं ॥ ४६ ॥ जलवाहिशिरामूलंतृष्णासंछादकं तिलं ॥ वृक्कौपुष्टिकरौ
प्रोक्तौजठरस्थस्यमेदसः ॥ ४७ ॥ बीजवाहिशिराधारौवृषणौपौरुषावहौ ॥ गर्भाधानक
रंलिंगमयनंबीजमूत्रयोः ॥ ४८ ॥ हृदयंचेतनास्थानमोजसश्चाश्रयंमतं ॥ शिराधमिन्यो
नाभिस्थाः सर्वव्याप्यस्थितास्तनुं ॥ ४९ ॥ पुष्णांत्यौतिनिरांवायोः संयोगात्सर्वधातुभिः ॥
नाभिस्थाः प्राणपवनः स्पृष्ट्वाहृत्कमलांतरं ॥ ५० ॥ कंठाद्बहिर्विनिर्यातिपातुंविष्णुपदा
मृतं ॥ पीत्वाचांबरपीयूषंपुनरायातिवेगतः ॥ ५१ ॥ प्रीणयन्देहमखिलंजीवंचजठरान
लं ॥ शरीरप्राणयोरेवसंयोगादायुरुच्यते ॥ ५२ ॥ कालेनतद्वियोगाच्चपंचत्वंकथ्यतेबुधैः ॥

हरीतकीलोध्रमरिष्टपत्रं हिंगुर्वचाशीतल
वारि पिष्टं ॥ एषोगदः सर्वविषाणिहंतिव
त्रं यथाशक्रकराद्विमुक्तं ॥ १ ॥

१५

नजंतुः कश्चिरमरः पृथिव्यांजायतेक्वचित् ॥५३॥ अतोमर्त्यसुखार्थः स्यात्किंनुरोगान्निवारयेत् ॥ या
प्यत्वंयानिसाध्यस्तुयाप्योगछत्यसाध्यतां ॥५४॥ जीवितंहंत्यसाध्यस्तुनरस्याप्रतिकारिणः॥
अतोरुग्भ्यस्तनुंरक्षेन्नरः कर्मविपाकवित् ॥५५॥ धर्मार्थकाममोक्षाणांशरीरंसाधनंयतः॥
रोगास्तस्यापहर्त्तारिः श्रेयसोजीवितस्यच ॥५६॥ धातवस्तन्मलादोषानाशयंत्यसमास्तनुं॥
समाः सुखायविज्ञेयाबलायोपचयायच ॥५७॥ ॥इतिकल्पादिवृत्तांतं॥ ॥जगद्योने
रनीशस्यचिदानंदैकरूपिणः॥ पुंसोस्तिप्रकृतिर्निसाप्रतिछायेवभास्वतः॥५८॥ अचेत
नापिचैतन्ययोगेनपरमात्मनः॥ अकरोद्विश्वमखिलमनित्यंनाटकाकृति ॥५९॥ प्रकृतिर्वि
श्वजननीपूर्वंबुद्धिमजीजनत् ॥इच्छामयींमहद्रूपामहंकारस्ततोभवत् ॥६०॥ त्रिविधः सोपि
संजातोरजः सत्वतमोगुणैः॥ तस्मात्सत्वरजोयुक्त्यादिंद्रियाणिदशाभवन् ॥६१॥ मनश्चजा

१५

तंतान्याहुः श्रोत्रंत्वग्नयनंतथा॥ जिह्वाघ्राणंवचोहस्तपादोपस्थगुदानिच॥ ६२॥ पंचबुद्धींद्रि
याण्याहुः प्रोक्तवानीतराणिच॥ कर्मेंद्रियाणिपंचैवकथ्यंतेसूक्ष्मबुद्धिभिः॥ ६३॥ तमःसत्वगुणो
त्कृष्टादहंकारात्तथाभवत्॥ तन्मात्रंपंचकंतस्यनामान्युक्तानिसूरिभिः॥ ६४॥ शब्दतन्मात्रकं
स्पर्शतन्मात्रंरूपमात्रकं॥ रसतन्मात्रकंगंधतन्मात्रंचेतितद्विदुः॥ ६५॥ तन्मात्रंपंचकात्तस्मा
त्संजातंभूतपंचकं॥ व्योमानिलानलजलक्षोणीरूपंचतन्मतं॥ ६६॥ शब्दस्पर्शश्वरूपंचर
सोगंधावनुक्रमात्॥ तन्मात्राणांविशेषास्युः स्थूलभावमुपागताः॥ ६७॥ बुद्धींद्रियाणिपं
चैवशब्दाद्याविषयामताः॥ कर्मेंद्रियाणांविषयाभाषादानविहारताः॥ ६८॥ आनंदोत्सर्ग
कंचैवकथितास्तत्वदर्शिभिः॥ प्रधानंप्रकृतिःशक्तिर्नित्साचाविकृतिस्तथा॥ ६९॥ एतानित
स्यनामानिशिवमाश्रित्सयास्थिताः॥ महानहंकृतिः पंचतन्मात्राणिपृथक्पृथक्॥ ७०॥

प्रकृतिर्विकृतिश्चैव सप्तैतानि बुधा जगुः॥ दशेंद्रियाणि चित्तं च महद्भूतानि पंच च॥७१॥ विका
राः षोडश ज्ञेयाः सर्वं व्याप्य जगत्स्थिताः॥ एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धं वपुर्गृहं॥७२॥ जीवा
त्मा नियतं तस्मिन्नोवसति स्वांतदूतवान्॥ स देही कथ्यते पापपुण्यदुःखसुखादिभिः॥७३॥
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्म्मबंधनैः॥ कामक्रोधौ लोभमोहावहंकारश्च पंचमः॥
॥७४॥ दशेंद्रियाणि बुद्धिश्च तस्य बंधाय देहिनः॥ प्राप्नोति बंधमत्तानां दान्तमत्तानां च मु
च्यते॥७५॥ न दुःखयोगकृत्व्याधिराग्यंतत्सुखावहं॥७६॥ ॥इति श्रीदामोदरसूनोः
शार्ङ्ग॰धरविरचितायां संहितायां शारीरेकलादिकथनस्टष्टिक्रमशारीराध्यायः पंचमः॥ ॥
॥ ॥यासामाशयमाहारः पूर्वं प्राणानिलेरितः॥ माधुर्यं फेनभावं च षड्रसोपि लभेच्च सः
॥१॥ अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेत्॥ ततः समानमरुता ग्रहणीमभिनीयते॥२॥

ग्रहण्यां च्येपो नेकोष्टवह्निना जायते कटुः॥ रसोभवति संपक्कात्पक्कादामसंभवः॥३॥ षष्ठी पित्त
धरानाम या कला परिकीर्तिता॥ पक्कामाशयमाधीस्तात् ग्रहणी साभिधीयते॥४॥ वह्नेर्बलेन मा
धुर्यस्निग्धतां याति तद्रसः॥ पुष्णाति धातुनखिलान्सम्यक्पक्कोऽमृतोपमः॥५॥ मंदवह्निविदग्
धश्चकटुर्वाम्लो भवेद्रसः॥ विषभावं व्रजेद्वापि कुर्याद्वा रोगसंकरं॥६॥ आहारस्य रसः सारः
सारहीनो मलद्रसः॥ शिराभिस्तज्जलं नीतं बस्तौ मूत्रत्वमाप्नुयात्॥७॥ नत्किट्टं च मलं तत्तेयं नि
ष्टसक्काशयेच्चयत्॥ वलित्रितयमार्गेण यासः पानेन नोदितं॥८॥ प्रवाहिणी सर्जनी च ग्राहि
केति वलित्रयं॥ रसस्तु हृदयं याति समानमरुतेरितः॥९॥ रंजितः पाचितस्तत्र पित्तेनायाति र
क्ततां॥ रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमं॥१०॥ स्निग्धं गुरू बलं स्वादु विदग्धं पित्तवद्भवे
त्॥ पाचिताः पित्ततापेन रसाद्या धातवः क्रमात्॥११॥ शुक्रत्वं याति मासेन तथा स्त्रीणां रजो भ

१८

वेत्॥ कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः॥१२॥ गर्भः संजायते नार्याः स जातो बाल उच्यते॥
आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत्॥१३॥ नपुंसकं तत्साम्येन यथेच्छा पारमेश्वरी॥ बा
लस्य प्रथमे मासि देया भेषजरक्तिका॥१४॥ अवलेह्यीकृत्यैकैव क्षीरक्षौद्रसिताघृतैः॥ वर्द्धयेत्ता
वदेकैकां यावद्भवति वत्सरः॥१५॥ मासैर्वृद्धिस्तदूर्ध्वं स्याद्यावत्षोडशवत्सरः॥ ततः स्थिरा भ
वेत्तावद्यावद्वर्षाणि सप्ततिः॥१६॥ ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः॥ मात्रेयं कल्क
चूर्णानां कषायाणां चतुर्गुणा॥१७॥ अंजनं च तथा लेपः स्नानमभ्यंगकर्म च॥ वमनं प्रति
मर्षश्च जन्मप्रभृति शस्यते॥१८॥ कवलः पंचमाद्वर्षाद्दृष्टमानस्य कर्म च॥ विरेकः षोडशा
द्वर्षाद्विंशतेश्चैव मैथुनं॥१९॥ बाल्यं वृद्धिस्थविर्मेधा त्वक् दृष्टी शुक्र विक्रमौ॥ बुद्धिः कर्मेंद्रियं
चेतो जीवितं दशतो ह्रसेत्॥२०॥ ॥रसाहारपाकगर्भोत्पत्तिकुमारादिपोषणानि॥ ॥

१८

अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः॥ आकाशचारी स्वप्नेषु वातप्रकृतिको नरः।
॥२१॥ अकालेपलितैर्व्याप्तो धीमान्स्वेदी च रोषणः॥ स्वप्नेषु योषितां दृष्टा पित्तप्रकृति
को नरः॥२२॥ गंभीरबुद्धिः स्थूलांगः स्निग्धकेशो महाबलः॥ स्वप्नेषु योषितां दृष्टा पित्त
प्रकृतिको नरः॥२३॥ जलाशयालोकी कफप्रकृतिको नरः॥२३॥ ज्ञान व्यामिश्रचिह्नैश्च द्वि
त्रिदोषोल्बणा नराः॥ तमः कफाभ्यां निद्रा स्यात्मूर्छा पित्ततमोद्भवा॥२४॥ रजःपित्तानि
लैर्भ्रांतिस्तंद्रा श्लेष्मतमोऽनिलैः॥ ग्लानिरोजःक्षयाद्दुःखादजीर्णाच्च श्रमाद्भवेत्॥२५॥
यः सामर्थ्येप्यनुत्साहस्तदालस्यमुदीर्यते॥ चैतन्यशिथिलत्वाद्यसीसेकं श्वासमुद्व
मेत्॥२६॥ विदीर्णवदनः श्वासं जंभा सा कथ्यते बुधैः॥ उदानप्राणयोरूर्ध्वयोगान्मौलि
कफस्रवात्॥२७॥ शब्दः संजायते तस्य क्षुतं तत्कथ्यते बुधैः॥ उदानकोपाद्दाहारः सुस्थि

रत्वाच्चपङ्गवेत्॥२८॥पवनश्चोर्ध्वगमनंतमुद्गारंप्रचक्षते॥ ॥इतिप्रकृतिलक्षणानि ॥ ॥इतिश्रीदामोदरसूनोःशार्ङ्गधरेणविरचितायांसंहितायांशारीरेआहारपाकगर्भोत्पत्तिकुमारपोषणप्रकृतिलक्षणाध्यायःषष्ठः॥ ॥रोगाणांगणनापूर्वंमुनिभिर्याप्रकीर्तिता॥मयात्रप्रोच्यतेसैवतद्भेदाबहवोमताः॥१॥पंचविंशतिरुद्दिष्टाज्वरास्तद्भेदउच्यते॥पृथक्दोषैस्त्रिधाद्वंद्वभेदेनत्रिविधःस्मृतः॥२॥एकश्चसन्निपातेनतद्भेदाश्चत्रयोदश॥संधिगोनकरुग्दाहचित्तविभ्रमकर्णकाः॥३॥कंठकुब्जकरीताङ्गतंद्रिकाःसप्रलापकाः॥रक्तष्ठीवीभुग्ननेत्रोभिन्योसोजिह्वकाभिधः॥४॥कष्टसाध्याःस्वभावेनसन्निपातोद्भवाज्वराः॥प्रायशःसन्निपातेनपंचस्युर्विषमज्वराः॥५॥संततःसततश्चैवमन्येद्युष्कस्तृतीयकः॥चातुर्थिकश्चपंचैतेकीर्तिताविषमज्वराः॥६॥

१८

तथागंतुज्वरोप्यैकस्त्रयोदशविधोमतः ॥ अभिचाराग्रहावेशशापैरागंतुकस्त्रिधा ॥७॥ श्रे
माछेदाक्षताद्दाहाच्चतुर्धाघातजोज्वराः ॥ कामाद्भीतेः शुचोरोषाद्भूताद्दोषधिगंधतः ॥८॥
अभिषंगज्वराः षट्स्युरेवंज्वरविनिश्चयः ॥ पृथक्दोषैश्चसर्वैश्चशोकादामाद्भयादपि ॥
॥९॥ अतीसारः सप्तधास्याद्ग्रहणी पंचधामता ॥ पृथक्दोषैः सन्निपातात्तथामेनचपं
चमी ॥१०॥ प्रवाहिकाचतुर्धास्यात्पृथक्दोषैस्तथास्रजः ॥ अजीर्णंत्रिविधंप्रोक्तंविष्ट
ब्धंवायुनामतं ॥११॥ पित्तादिदग्धंविज्ञेयंकफेनामंतदुच्यते ॥ विषाजीर्णरसादेकंदोषैः
स्यादलसस्त्रिधा ॥१२॥ विसूचीत्रिविधाप्रोक्तादोषैःसास्यात्पृथक्पृथक् ॥ दंडकालसकं
चैकमेकैवस्याद्विलंबिका ॥१३॥ अर्शांसिषट्विधान्याहुर्वातपित्तकफास्रजः ॥ सन्निपा
ताच्चसंसर्गात्तद्वद्दोद्विविधःस्मृतः ॥१४॥ सहजोत्तरभेदाभ्यांतथामुष्कार्द्रभेदतः ॥ त्रिधैव

चर्मकीलानिवीतास्तिनाकफादपि॥१५॥ एकविंशतिभेदेनक्रमयःस्युर्द्विधोच्यते॥ बाह्यास्तथाभ्यंतरास्युस्तेषुयूकाबहिश्चराः॥१६॥ लिख्याश्चाऽन्येनरवराः कफान्ते हृदयादिकाः॥ अंत्रादाउदरावेष्टाश्चुमुखश्चमहाकुहाः॥१७॥ सुगंधादर्भकुसुमास्तथारक्ताश्चमानरः॥ सौरसालोमविध्वंसारोमद्वीपाउदुंबराः॥१८॥ केशादाश्चतथैवाऽन्येशाकृज्जातामकेरुकाः॥ लेलिहाश्चलस्नाश्चसोसुरादाः ककेरुकाः॥१९॥ तथान्यः कफरक्ताभ्यांसंजातःस्नायुकःस्मृतः॥ व्रणस्यकृमयश्चान्येविषमाबाह्ययोनयः॥२०॥ पांडुरोगाश्चपंचस्युर्वातपित्तकफैस्त्रिधा॥ त्रिदोषैर्मृत्तिकाभिश्चतथैकाकामलाःस्मृताः॥२१॥ स्यात्कुंभकामलाचैकातथैकंचहलीमकं॥ रक्तपित्तंत्रिधाप्रोक्तमूर्द्ध्वगंकफसंगतं॥२२॥ अधोगंमारुतात्ज्ञेयंतद्द्वयेनद्विमार्गगं॥२३॥ पंचकासाःस्मृतावातपित्तश्लेष्मक्षतक्षयैः॥ क्षयायोऽपिक्षिताः

सर्वैबलिनश्चोनरोत्तरं ॥२४॥ कासाः पंचसमुद्दिष्टास्तेत्रयस्तुत्रिभिर्मलैः ॥ उरक्षताच्चतुर्थः स्यात्क्षयाद्धातोश्चपंचमः ॥२५॥ क्षयाः पंचैवविज्ञेयास्त्रिभिर्दोषैस्त्रयश्चते ॥ चतुर्थः सन्निपातेनपंचमः स्यादुरःक्षतात् ॥२६॥ शोषास्तुः षट्प्रकारेणस्त्रीप्रसंगात्शुचोव्रणे ॥ त ॥ अध्वश्रमाच्चव्यायामाद्वार्द्धक्यादपिजायते ॥२७॥ श्वासाश्चपंचविज्ञेयाः क्षुद्रस्यात्तमकस्तथा ॥ उर्ध्वश्वासोमहाश्वासश्चोच्छिन्नश्वासश्चपंचमः ॥२८॥ कथिताः पंचहिक्कास्तुतास्तुक्षुद्रा अन्नजास्तथा ॥ गंभीरायमलाचैवमहतीपंचमीस्मृता ॥२९॥ चत्वारोऽग्नेर्विकारास्तुर्विषमोवातसंभवः ॥ तीक्ष्णः पित्तात्कफान्मंदोभस्मकोवातपित्तयोः ॥३०॥ पंचैवारोचकाज्ञेयावातपित्तकफैस्त्रिधा ॥ सन्निपातान्मनस्तापात्छर्द्दयः सप्तधामताः ॥३१॥ त्रिभिर्दोषैः पृथक्तिस्रः कृमिभिः सन्निपाततः ॥ घृणयाचतथास्त्रीणांगर्भाधानाच्चजायते ॥३२॥ स्वरभेदाः

२०

षडेव स्युर्वातपित्तकफैस्त्रयः ॥ मेदसा सन्निपातेन क्षयास्रस्थः प्रकीर्तिताः ॥ ३३ ॥ तृष्णाश्च षड्वि-
धा ज्ञेया वातात्पित्तात्कफादपि ॥ त्रिदोषैरुपसर्गेण क्षयाज्जातोऽथ षष्ठिका ॥ ३४ ॥ मूर्छाश्चतुर्धा
विज्ञेया वातपित्तकफैः पृथक् ॥ चतुर्थी सन्निपातेन तथैकश्च भ्रमः स्मृतः ॥ ३५ ॥ निद्रा तंद्रा च सं-
न्यासो ग्लानिश्चैकैकशः स्मृताः ॥ मदाः सप्त समाख्याता वातपित्तकफैः पृथक् ॥ ३६ ॥ त्रिदोषै-
रस्रजा मद्याद्विषादपि च सप्तमः ॥ मदात्ययश्चतुर्धा स्याद्वातात्पित्तात्कफादपि ॥ ३७ ॥ त्रिदोषैरपि
विज्ञेयः एकः परमदस्तथा ॥ पानाजीर्णं तथैवैकं तथैकः पानविभ्रमः ॥ ३८ ॥ पानात्ययस्तथैवै-
को दाहाः सप्त तथा मताः ॥ रक्तपित्तात्तथा रक्तात्तृष्णायाः पित्ततस्तथा ॥ ३९ ॥ धातुक्षयान्मर्म-
घाताद्रक्तपूर्णोदरादपि ॥ उन्मादाः षट् समाख्यातास्त्रिभिर्दोषैस्त्रयः पृथक् ॥ ४० ॥ संनिपाता-
द्विषात्तुर्यः षष्ठो दुःखेन चेतसः ॥ भूतोन्मादा विंशतिः स्युर्देवाद्दानवादपि ॥ ४१ ॥ गंधर्वान्

२०

किंनराद्यक्षासितभ्योगुरुशापतः॥प्रेताश्चगुह्यकान्वृद्धान्सिद्धान्भूतान्सिताश्चतः॥४२॥ज
लाधिदेवतायाश्चनागाश्चब्रह्मराक्षसान्॥राक्षसाश्चापिकूष्मांडकसावैतालयोरपि॥४३॥अ
पस्मारश्चतुर्द्धास्यात्समीरात्पित्ततस्तथा॥श्लेष्मणोपितृतीयःस्यात्चतुर्थःसन्निपाततः
॥४४॥चत्वारःश्वासमवानास्युःवातपित्तकफैःस्त्रयः॥चतुर्थःसन्निपाताच्चशूलान्यष्टौबुधा
जगुः॥४५॥पृथग्दोषैस्त्रिधाद्वंद्वभेदेनत्रिविधान्यपि॥आमेनसप्तमंप्रोक्तंसन्निपातेन
चाष्टमं॥४६॥परिणामभवंशूलमष्टधापरिकीर्तितं॥मलैर्यःशूलसंख्यास्यात्तैरेवपरिणा
मजं॥४७॥अन्नद्रवभवंशूलंज्वरात्सिन्नभवंतथा॥एकैकंगणितंसूत्रैरुदावर्तास्त्रयोदश
॥४८॥एकःक्षुन्निग्रहात्प्रोक्तस्तृष्णारोधाद्द्वितीयकः॥निद्राघातात्तृतीयःस्याच्चतुर्थःश्वा
सनिग्रहात्॥४९॥छर्द्दिरोधात्पंचमःस्यात्षष्ठःक्षवथुनिग्रहात्॥जृंभारोधात्सप्तमःस्या

उा२

दुष्टास्रग्रहतोष्टमः॥५०॥नवमः स्याद्स्त्यरोधाद्दशमः शुक्रधारणात्॥मूत्ररोधान्मलस्या
पिरोधाद्वातविनिग्रहात्॥५१॥उदावर्त्तास्त्रयश्चैते घोरोपद्रवकारकाः॥आनाहो द्विविधः
प्रोक्त एकः पक्काशयोद्भवः॥५२॥आमाशयोद्भवश्चान्यः प्रत्यानाहः स कथ्यते॥उरोग्रहस्त
थाचैको हृद्रोगाः पंच कीर्त्तिताः॥५३॥ वातादिभिस्त्रयः प्रोक्ताश्चतुर्थः सन्निपाततः॥पंच
मः कृमिसंजातः तथाष्टावुदराणि तु॥५४॥ वातात्पित्तात्कफात्त्रीणि त्रिदोषेभ्यो जलादपि
॥प्लीहक्षताद्बद्धगुदादष्टमं परिकीर्त्तितं॥५५॥गुल्मास्त्वष्टौ समाख्याता वातपित्त
कफैस्त्रयः॥द्वंद्वभेदात्त्रयः प्रोक्ताः सप्तमः सन्निपाततः॥५६॥रक्तादष्टमकः ख्यातो मूत्रा
घातास्त्रयोदश॥वातकुंडलिका पूर्वा वाताष्ठीला ततः परं॥५७॥वातबस्तिस्तृतीयः स्यात्
मूत्रातीतश्चतुर्थकः॥पंचमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः॥५८॥मूत्रोत्संगः सप्तमः स्या

न्मूत्रग्रंथिस्तथाष्टमः॥ मूत्रशुक्रं तु नवमं विड्घातो दशमः स्मृतः॥५९॥ मूत्रसादश्चोष्ण
वातो बस्तिकुंडलिका तथा॥ त्रयोप्येते मूत्रघाताः पृथक् घोराः प्रकीर्तिताः॥६०॥ मूत्रकृछ्रा
णि चाष्टौ स्युर्वातपित्तकफैस्त्रिधा॥ सन्निपाताच्चतुर्थस्यात् शुक्रकृछ्रं तु पंचमं॥६१॥ वि
ट्कृछ्रं सप्तमाख्यातं वातकृछ्रं तु सप्तमं॥ अश्मरी अष्टमं चाश्मरीकृछ्रं चतुर्द्धा चाश्मरी
मता॥६२॥ वाता पित्तात्कफात् शुक्रात्तथा मेहाश्च विंशतिः॥ इक्षुमेहः सुरामेहः पिष्टमे
हश्च सांद्रकः॥६३॥ शुक्रमेहोदकाख्यौ च लालामेहश्च शीतकः॥ सिकताह्वः शनैर्मेहोद
शैते कफसंभवाः॥६४॥ मंजिष्ठाख्यो हरिद्राह्वो नीलमेहश्च रक्तकः॥ कृष्णमेहः क्षारमेहः
षडेते पित्तसंभवाः॥६५॥ हस्तिमेहो वसामेहो मज्जामेहो मधुप्रभः॥ चत्वारो वातजा मे
हा इति मेहाश्च विंशतिः॥६६॥ सोमरोगस्तथा चैकः प्रमेहपिटिका दश॥ शरा विकाक

छपिकापुत्रिणी विनतालजी॥६७॥मसूरिकासर्षपिकाजालिनीचविदारिका॥विद्रधिश्चद
शैतास्युःपिटिकामेहसंभवा॥६८॥मेदोदोषस्तथाचैकःशोथारोगानवस्मृताः॥दोषैःपृथ
क्समुदायैःसर्वैरभिघाताद्विषादपि॥६९॥वृद्धयःसप्तगदितावातापित्तात्कफेनच॥रक्तेनमे
दसामूत्रादंत्रवृद्धिश्चसप्तमी॥७०॥अंडवृद्धिस्तथाचैकानथैकागंडमालिका॥गंडाल
जीतिचैकास्यात्कथयोनवधामता॥७१॥त्रिभिर्दोषैस्त्रयोरक्तान्शिराभिर्मेदसोव्रणात्॥
अस्थ्नामांसेननवमःषड्विधंस्यात्तथार्बुदं॥७२॥वातापित्तात्कफाद्रक्तान्मांसादपिच
मेदसः॥श्लीपदंचत्रिधाप्रोक्तंवातापित्तात्कफादपि॥७३॥विद्रधिःषड्विधःख्यातोवा
तपित्तकफैस्त्रिधा॥रक्तात्सन्नात्रिदोषैश्चव्रणाःपंचदशोदिताः॥७४॥तेषांचतुर्द्धभेदः
स्यादागंतुर्देहजस्तथा॥शुद्धोदुष्टश्चविज्ञेयस्तत्संख्याकथ्यतेपृथक्॥७५॥वाताद्व्रणःपि

२२

नजश्चकफजोरक्तजोव्रणः॥ वातपित्तभवश्चान्योवातश्लेष्मोद्भवस्तथा॥७६॥ तथापित्तकफा
भ्यांचसन्निपातेनचाष्टमः॥ नवमोवातरक्तेनदशमःपित्तरक्तजः॥७७॥ श्लेष्मरक्तभवश्चान्यो
वातपित्तास्रसंभवः॥ वातपित्तश्लेष्मास्रसमुत्पन्नःपित्तश्लेष्मास्रसंभवः॥७८॥ सन्निपातास्र
समुद्भूतःइतिपंचदशव्रणाः॥ सद्योव्रणस्त्वष्टधास्यादवक्लिप्तविलंबिनौ॥७९॥ छिन्नभिन्नप्र
चलितोघृष्टविद्धनिपातिताः॥ कोष्टभेदोद्विधाप्रोक्तःछिन्नांत्रोनिःसृतांत्रकः॥८०॥ अ
स्थिभंगोष्टधाप्रोक्तोभग्नपृष्टविदारिताः॥ विवर्तितश्चविश्लिष्टस्तिर्यक्क्षिप्तस्त्वधोग
तः॥८१॥ ऊर्ध्वगःसंधिभग्नश्चवह्निदग्धश्चतुर्विधः॥ प्लुष्टोतिदग्धोदुर्दग्धःसम्यग्दग्धश्च
कीर्तितः॥८२॥ नाड्यःपंचसमाख्यातावातपित्तकफैस्त्रिधा॥ त्रिदोषैरपिशल्येनतथाष्टौस्यु
र्भगंदराः॥८३॥ रातपोनस्युपवनादुष्टुग्रीवश्चपित्ततः॥ परिस्रावीकफाज्ज्ञेयोऋजुर्वातक

११

भनंतत्स्याद्यथावत्सकटिंदुके॥ यज्जराव्याधिविध्वंसिभेषजंतद्रसायणं॥१२॥ धातून्म
लान्वादेहस्यविशेषेणविलेखयेत्॥ लेखनंतद्यथाक्षौद्रंनीरमुष्णंवचायवः॥१३॥ यथामृता
रुद्रंतीचगुग्गुलश्चहरीतकी॥ यस्माद्‌द्रव्याद्भवेत्स्त्रीषुहर्षोवाजीकरंतुतत्॥१४॥ यथाना
गबलाद्यास्युः बीजंचकपिकच्छुजं॥ यस्माच्छुक्रस्यवृद्धिस्यात्शुक्रलंचतदुच्यते॥१५॥
यथाश्वगंधामुसली शर्कराचशतावरी॥ दुग्धंमाषाश्चभल्लातफलमज्जामलानिच॥१६
प्रवर्त्तकानिकथ्यंतेजनकानिचरेतसः॥ प्रवर्त्तिनीस्त्रीशुक्रस्यरेचनंबृहतीफलं॥१७॥
जातीफलंस्तंभकरंपोषणीचहरीतकी॥ देहस्यसूक्ष्मच्छिद्रेषुविशेद्यत्सूक्ष्ममुच्यते॥१८॥ ११
तद्यथासैंधवक्षौद्रंनिंबुस्तैलंरुबूद्भवं॥ सर्वंव्याप्याखिलंकायंपश्चात्पाकंचगच्छति॥१९॥
व्यवायितद्यथाभंगीफेनंचाहिसमुद्भवं॥ संधिबंधांस्तुशिथिलान्यत्करोतिविकाशि

फोद्भवः ॥८४॥ परिसर्पेपि मरुत्पित्ताद्रोजकफपित्तजः ॥ आगंतुजानश्चोन्मार्गी
शंखकावर्त स्त्रिदोषजः ॥८५॥ मेदो पंचोपदंशास्युर्वातपित्तकफैस्त्रिधा ॥ सन्निपाता
च्चरक्ताच्च मेदु भूकामयास्तथा ॥८६॥ चतुर्विंशतिराख्याता लिंगार्शोग्रंथितं तथा ॥
निर्दत्तमवमंथश्च मृदितः शतपोलकः ॥८७॥ अष्ठिलीकासर्षपिकालक्याकश्चाव
पाटिका ॥ मांसपाकः स्पर्शहानिर्निरुद्धमणिरुत्तमः ॥८८॥ मांसार्बुदं पुष्करीका
संमूढः पिटकालजी ॥ रक्तार्बुदं विद्रधीश्च कुंभिकातिलकालकः ॥८९॥ निलुद्धकः स
कःप्रोक्तः स्तथैव परिवर्तिका ॥ कुष्टान्यष्टादशोक्तानि वातात्कापालिकं भवेत् ॥९०॥
पित्तेनोदुंबरं प्रोक्तं कफान्मंडलचर्चिके ॥ मरुत्पित्ताद्दृष्यजिह्वं श्लेष्मवाताद्विषादिका
॥९१॥ तथालसि ध्येककुष्टं च किटिभं चालसं तथा ॥ कफपित्तात्पुनर्दद्रु पामाविस्फोटकं त

पा॥९२॥महाकुष्टं चर्मदलं पुंडरीकं शतारुकः॥त्रिदोषैः काकणं ज्ञेयं तदन्यत श्वित्र
संज्ञितं॥९३॥तच्च वातेन पित्तेन श्लेष्मणा च त्रिधा भवेत्॥क्षुद्ररोगाः षष्टि संख्याः ते
ष्वादौ शर्करार्बुदं॥९४॥इंद्रविद्धा पनसिका विवृता धालजी तथा॥वराहदंष्ट्रा वल्मीकं
कक्षपी तिलकालकः॥९५॥कर्दभा करसा चैव यवप्रख्या विदारिका॥कदरं मशकः श्वे
वनीलिका जालगर्दभः॥९६॥इरुवेल्ली जंतुमणी गुदभ्रंशोऽग्निरोहिणी॥सन्निरुद्ध
गुदं कोष्टः कुनखोऽनुशयी तथा॥९७॥पद्मिनीकंटकाः स्निग्धमलेसो मुखदूषिका॥
कच्छा वृषणकच्छूश्च गंधपाषाणगर्दभः॥९८॥राजिका च तथा व्यंग चतुर्धा परि
कीर्तितः॥वातासितारुकफाद्रक्तादिसुकं व्यंगलक्षणं॥९९॥विस्फोटा क्षुद्ररोगे
षु नेष्टधा परिकीर्तिताः॥पृथक् दोषैस्त्रयो द्वंद्वैस्त्रिविधः सप्तमोऽस्रजः॥१००॥अष्ट
मः सन्निपातेन क्षुद्ररुक् समसूरिका॥चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा॥

॥१०१॥ द्वंद्वजा त्रिविधा प्रोक्ता सन्निपातेन सप्तमी॥ अष्टमी त्वग्गता ज्ञेया रक्तजा
नवमी स्मृता॥१०२॥ दशमी मांससंजाता चतस्रोन्याश्च दुस्तराः॥ मेदोस्थिमज्ज
शुक्रस्थाः क्षुद्ररोगा इतीरिताः॥१०३॥ विसर्परोगो नवधा वातपित्तकफैस्त्रिधा॥
वाताधिकं शीतपित्तं गुदहीस्तु कफाधिकः॥४॥ त्रिविधा द्वंद्वभेदेन सन्निपातेन न
सप्तमः॥ अष्टमो वह्निदाहेन नवमश्चाभिघातजः॥५॥ नैपैकः श्लेष्मपित्ताभ्यामुदर्दः
परिकीर्तितः॥ वातपित्तेन चैकस्तु शीतपित्ताभयस्मृतः॥६॥ अम्लपित्तं त्रिधा प्रोक्तं
वातेन श्लेष्मणा तथा॥ तृतीयं श्लेष्मवाताभ्यां वातरक्तं तथाष्टधा॥७॥ वाताधिक्येन
पित्ताच्च कफदोषत्रयेण च॥ रक्ताधिक्येन दोषाणां द्वंद्वेन त्रिविधं स्मृतः॥८॥ अशीति
वातजा रोगाः कथ्यंते मुनिभाषिताः॥ आक्षेपको हनुस्तंभ ऊरुस्तंभः शिरोग्रहः॥९॥
बाह्यायामोन्तरायामः पार्श्वशूलं कटिग्रहः॥ दंडापतानकः खल्लिर्जिह्वास्तंभस्तथार्दितः॥१०॥

पक्षघातः क्रोष्टुशीर्षमन्यास्तंभश्च पंगुता॥ कलापखंजता तूणी प्रतूणी चैव खंजता॥
॥११॥ पादहर्षो गृध्रसी च विश्वाची वाववाहुकः॥ अपतानो व्रणायामो वातकंटापतंत्र
कः॥१२॥ अंगभेदोंगशोषश्च मिन्मिनत्वं च कल्लता॥ प्रत्यष्ठिलाष्ठिलीका च वामनत्वं च कु
ब्जता॥१३॥ अंगपीडांगशूलं च संकोचस्तंभरूक्षता॥ अंगभंगोंगविभ्रंशो विग्रहो बद्ध
विट्कता॥१४॥ मूकत्वमतिजृंभा स्यादत्युद्गारोंत्रकूजनं॥ वातप्रवृत्तिः स्फुरणं शिराणां पू
रणं तथा॥१५॥ कंपः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता॥ निद्रानाशः स्वेदनाशो दुर्ब
लत्वं बलक्षयः॥१६॥ अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः॥ अनवस्थितचित्तत्वं का
ठिन्यं विरसास्यता॥१७॥ कषायवक्त्रताध्मानं प्रत्याध्मानं च शीतता॥ रोमहर्षश्च भीत
त्वं तोदः कंडू रसाज्ञता॥१८॥ शब्दाज्ञता प्रसुप्तिश्च गंधाज्ञत्वं दृशः क्षयः॥ इत्साद्यामरु
द्रोगाः कथ्यंते सूत्रसंमिताः॥१९॥ अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिताः॥ धूमो
द्गारो विदाहः स्यादुष्णांगत्वमतिभ्रमः॥२०॥ कांतिहानिः कंठशोषो मुखशोषोल्पशुक्रता॥

तिक्तास्यताम्लतावक्त्रेत्वंस्वेदस्रावोंगपाकता॥२१॥क्लमोहरितवर्णत्वंतृप्तिःपी
तकायता॥रक्तस्रावोंगदरणंलोहगंधास्यतातथा॥२२॥दौर्गंध्यंपीतमूत्रत्व
मरतिःपित्तविड्ढता॥पीतावलोकनंपित्तनेत्रतापीतदंतता॥२३॥शीतेच्छापी
तनखतातेजोद्वेषोल्पनिद्रता॥कोपश्चगात्रसादश्चभिन्नविट्कत्वमंधता॥२४॥
उष्णोच्छ्वासत्वमुष्णत्वंमूत्रस्यचमलस्यच॥तमसोदर्शनंपीतमंडलानांचदर्श
नं॥२५॥निःसहत्वंचपित्तस्यचत्वारिंशद्रुजस्स्मृताः॥कफस्यविंशतिःप्रोक्तारोगा
स्तंद्रातिनिद्रता॥२६॥गौरवंमुखमाधुर्यंमुखलेपःप्रसेकता॥श्वेतावलोकनंश्वे
तविट्कत्वंश्वेतमूत्रता॥२७॥श्वेतांगवर्णताशैत्यमुष्णेच्छातिक्तकामिता॥मला
धिक्यंचशुक्रस्यबाहुल्यंबहुमूत्रता॥२८॥आलस्यंमंदबुद्धित्वंतृप्तिर्घर्घरवाक्य
ता॥अचैतन्यंचगदिताविंशतिःश्लेष्मजागदाः॥२९॥रक्तस्यचदशप्रोक्ताव्याधय

स्तब्धगौरवं ॥ रक्तमंडलतां रक्तनेत्रत्वं रक्तमूत्रता ॥ ३० ॥ रक्तष्ठीवनता रक्तपिंडका
नां च दर्शनं ॥ औष्ण्यं च पूतिगंधत्वं पीडा पाकश्च जायते ॥ ३१ ॥ चतुःसप्ततिसंख्याता
मुखरोगास्तथोदिताः ॥ तेष्वोष्ठरोगा गणिता एकादश मिता बुधैः ॥ ३२ ॥ वातपित्तकफै
स्त्रेधा त्रिदोषैरस्रजास्तथा ॥ क्षतं मांसार्बुदं चैव खंडौष्ठश्च जलार्बुदं ॥ ३३ ॥ मेदोर्बुदं चार्बु
दं च रोगा एकादशौष्ठजाः ॥ दंतरोगा दश ख्याता दालनः कृमिदंतकः ॥ ३४ ॥ दंतहर्षः करा
लश्च दंतचालश्च शर्करा ॥ अधिदंतस्तथा श्यावदंतो दंतभेदः कपालिका ॥ ३५ ॥ तथात्र पोडशमिता
दंतमूलामयास्मृताः ॥ शीतादो दंतपुप्पुटो दंतविद्रधि पुप्पुटो ॥ ३६ ॥ अधिमांसो विदर्भ
श्च महासुषिरसौषिरौ ॥ तेष्वेव गतयः पंच वातात्पित्तात्कफादपि ॥ ३७ ॥ सन्निपातगति
श्चान्या रक्तनाडी च पंचमी ॥ तथा जिह्वामयः षट् स्युर्वातपित्तकफैस्त्रिधा ॥ ३८ ॥ आल
सस्य चतुर्थः स्यादधिजिह्वा च पंचमी ॥ षष्ठी चैवोपजिह्वा स्यात्तथाष्टौ तालुजा गदाः ॥ ३९ ॥
अर्बुदं तालुपिडका कच्छपी तालुसंहतिः ॥ गलशुंडि तालुशोषः तालुपाकश्च पुप्पुटः ॥ ४०॥

२६

गलरोगास्तथाख्याताअष्टादशमिताबुधैः॥वातरोहिणकापूर्वंद्वितीयापित्तरोहिणी॥४१॥
कफरोहिणिकाप्रोक्तात्रिदोषैरपिरोहिणी॥मेदोरोहिणिकावृंदागलौघागलविद्रधिः॥४२॥
स्वरहातुंडिकेरीचरालघ्नीशालुकोर्बुदं॥गलायुर्बलयःश्वापीवातागंडःकफात्तथा॥४३॥
मेदोगंडस्तथैकस्यादित्यष्टादशकंठजाः॥मुखांतःसंभवारोगाअष्टौख्यातामहर्षिभिः॥
॥४४॥मुखपाकोभवेद्वातात्पित्तात्तद्वत्कफादपि॥रक्ताच्चसन्निपाताच्चपूतास्योर्धग
दादपि॥४५॥अर्बुदंचेतिमुखजाश्चतुःसप्ततिरामयाः॥कर्णरोगाःसमाख्याताअष्टा
दशमिताबुधैः॥४६॥वातात्पित्तात्कफाद्रक्तात्सन्निपाताच्चविद्रधिः॥शोथोर्बुदंपूतिक
र्णःकर्णारिःकर्णहल्लिका॥४७॥बाधीर्यंतंत्रिकाकंडुःशष्कुलीकृमिकर्णकः॥कर्णना
दःप्रतीनाहइत्यष्टादशाकर्णजाः॥४८॥कर्णपालीसमुद्भूतारोगासप्तइहोदिताः॥उ
त्पातःपालिशोषश्चविदारीदुःखवर्धनी॥४९॥परिपोटश्चलेहीचपिप्पलीचेतिसंस्मृ
ताः॥कर्णमूलामयाःपंचवातात्पित्तात्कफादपि॥५०॥सन्निपाताच्चरक्ताच्चतथाना

२६

साभवागदाः॥अष्टादशैव संख्यातोः प्रतिश्यायस्तु यद्यपि॥५१॥वातात्पित्तात्कफा
द्रक्तात्सन्निपातेन पंचमः॥पीनसः पूतिनासाख्यो नासाशोषश्च भ्रंशुश्रवः॥५२॥नासानाहः पू
तिरक्तमर्बुदं दुष्टपीनसं॥नासाशोषो घ्राणपाकः पुटकश्चावदीप्तयः॥५३॥तथा दुष्टाश्च शिरोरो
गा वातेनोर्ध्वं वभेदकः॥शिरस्तापश्च वातेन पित्तात्सीतातकीपकः॥५४॥चतुर्थः कफजा पीडा
रक्तजा सन्निपातजा॥सूर्यावर्त्तः शिरःपाकः कृमिभिः शंखके न च॥५५॥तथा कपाल रोगा
स्तु नंदनेषु परिशीर्षकं॥अरूंषिका विद्रधिश्च दारूणं पिटकार्बुदं॥५६॥इंद्रलुप्तं च खलितिप
लितं चेति ते नव॥तथा नेत्रभवाः ख्याताश्चतुर्नवतिरामयाः॥५७॥तेषु वर्त्मगताः प्रोक्ताः
चतुर्विंशति संज्ञिताः॥कृच्छ्रोन्मिलः पक्ष्मघातः कफोत्क्लिष्टश्च लोहिताः॥५८॥आग्निमेषः
कर्दमश्च रक्तोत्क्लिष्टः कुकूनकं॥पक्ष्मार्शः पक्ष्मरोधश्च पित्तोत्क्लिष्टश्च पोथकी॥५९॥क्लिष्टव
र्त्म च बहलः पक्ष्मोत्संगस्त्वथार्बुदं॥कुंभिकासिकताबर्त्म लागणांजननासिका॥६०॥तथै
व श्याववर्त्म चाशिवदर्त्म निष्यालजी॥उत्कृष्टवर्त्मे निगदाः प्रोक्ता वर्त्मसमुद्भवाः॥६१॥ने

53

त्रसंधीसमिद्भूतानवरोगाः प्रकीर्त्तिताः॥ जलस्रावः कफस्रावोरक्तस्रावश्चपर्वणि॥६२॥ पू
यःस्रावः कृमीग्रंथी रूपनाहस्तथाजली॥ पूयालसइतिप्रोक्तारोगानुपनसंधिजाः॥६३॥
तथाशुक्लगतारोगाबुधैःप्रोक्तास्त्रयोदश॥ शिरोत्पातःशिरोहर्षःशिराजालमभुक्तिका॥६४॥
शुक्लार्म्मंचाधिमांसार्म्मस्नाय्वार्म्माचिपिष्टकाः॥ शिरायाःपिडकाचैववक्रफग्रंथितकोर्जुनं॥६५॥
स्नायुवर्त्माधिमांसस्यादितिशुक्लगतागदाः॥ तथाकृष्णसमुद्भूताःपंचरोगाःप्रकीर्त्तिताः॥६६॥
शुद्धशुक्रंशिराचक्रंक्षतशुक्रंतथाजिका॥ शिरासंगश्चसर्वेपिप्रोक्ताःकृष्णगतागदाः॥६७॥
कांचंतुषड्विधंज्ञेयंवातात्पित्तात्कफादपि॥ संनिपाताच्चरक्ताच्चषष्ठंसंसर्गसंभवः॥६८॥ ति
मिराणिषडेवस्युर्वातपित्तकफैस्त्रिधा॥ संसर्गेणचरक्तेनषष्ठंस्यात्सन्निपाततः॥६९॥ लिं
गनाशाःसप्तधास्युर्वातात्पित्तात्कफेनच॥ त्रिदोषैरुपसर्गेणरक्तात्संसर्गतस्तथा॥७०॥ अ
ष्टधादृष्टिरोगास्युस्तेषुपित्तविदग्धकं॥ अम्लपित्तविदग्धंचतथैवोष्णविदग्धकं॥७१॥ न
कुलांध्यंधूमरांध्यंरात्र्यंध्यंह्रस्वदृष्टिकः॥ गंभीरदृष्टिरित्येतेरोगादृष्टिगताःस्मृताः॥७२॥

चत्वारः श्चाधिमंथास्तु वातपित्तकफास्त्रजाः॥ अभिष्यंदाश्च चत्वारो रक्ताद्दोषास्त्रिभिस्त्रि
धा॥७३॥ सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु धातुविपर्य्ययः॥ अल्पशोफोन्यतो वातस्तथापाकास्य
पस्मृतः॥७४॥ शुष्काक्षिपाकश्च तथा शोफो म्लेषितएव च॥ हताधिमंतइत्येते रोगाः स
र्वाक्षिसंभवाः॥७५॥ पुंस्त्वदोषास्तु पंचैव प्रोक्तास्तत्रेर्षकः स्मृतः॥ आशिकश्चैव कुंभी
कः सुगंधी षंढसंज्ञकः॥७६॥ शुक्रदोषास्तथाष्टौ स्युर्वातात्पित्तात्कफेन च॥ कुणपश्ले
ष्मवाताभ्यां पूयाभं श्लेष्मपित्ततः॥७७॥ क्षीणं च वातपित्ताभ्यां ग्रंथिश्च श्लेष्मरक्ततः॥
मलाभं सन्निपाताच्च शुक्रदोषाइतीरिताः॥७८॥ ॥अथ स्त्रीरोगनामानि॥ प्रोच्य
ते पूर्वशास्त्रतः॥ ॥अष्टावार्त्तवदोषास्तु वातपित्तकफैस्त्रिधा॥ पूयाभं कुणपं ग्रंथिः
क्षीणं मलसमं तथा॥ तथा च रक्तप्रदरं चतुर्विधमुदाहृतं॥१॥ वातपित्तकफैस्त्रेधा च
तुर्थं सन्निपाततः॥ विंशतिर्योनिरोगास्तु वातात्पित्तात्कफादपि॥२॥ सन्निपाताच्च रक्ता
च्च लोहितक्षयतस्तथा॥ शुष्का च वामिनी चैव खंडितांतमुखा तथा॥३॥ शुची मुखी

55

विप्लुता च जातघ्नी च परिप्लुता ॥ उपप्लुता प्राग्चरणा महायोनिरुदाहृता ॥४॥ कर्णिका
चांसिचरणा योनिरोगाः इतीरिताः ॥ चतुर्विधं योनिगदं वातपित्तकफैस्त्रिधा ॥५॥ चतु
र्थः सन्निपातेन तथाष्टौ गर्भजा गदाः ॥ उपविष्टकगर्भः स्यात्तथा नागोदरः स्मृतः ॥६॥ म
— — मूढगर्भश्च विष्टंभो गूढगर्भकः ॥ जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः ॥७॥
पंचैव स्तनरोगाः स्युर्वातपित्तात्कफादपि ॥ सन्निपाताक्षतात्त्वेवं तथा स्तन्योद्भवा
गदाः ॥८॥ बालरोगेषु कथिताः स्त्रीदोषाश्चत्रयः स्मृताः ॥ अदृष्टपुरुषो सङ्गः सप
त्नीविहितस्तथा ॥९॥ दैवाज्जातस्तृतीयस्तु तथान्ये सूतिकागदाः ॥ ज्वराद्युपश्चिकि
त्स्यास्ते यथादोषं तथा बलं ॥१०॥ द्वाविंशति बालरोगास्ते पुक्षीराल सास्त्रयः ॥ वातापि
त्तात्कफाच्चैव दंतोद्भेदश्चतुर्थकः ॥११॥ दंताघातो दंतशब्दः फाल्गदंतो हि पूतनं ॥ मु
खपाको मुखस्रावो गुदपाकोपशीर्षकौ ॥१२॥ पार्श्वारुणस्तालुकंठो विछिन्न परि
गर्भिकः ॥ दौर्बल्यं गात्रशोषश्च शय्यामूत्रं कुकूणकं ॥१३॥ रोदनं चाजगल्ली स्याद्दिनि

द्वाविंशतिः स्मृताः ॥ तथा बालग्रहाख्यातो द्वादशैव मुनीश्वरे ॥१४॥ स्कंदग्रहो विशा
खस्यास्त्वग्रहश्चपितृग्रहः ॥ नैगमेषग्रहस्तद्वत्तथा शकुनी शीतपूतना ॥१५॥ मुखमंडलि
कातद्वत्पूतना चांधपूतनां ॥ रेवती चैव संख्यातानतथास्याच्छुष्करेवती ॥१६॥ तथा चरणभे
दास्तु वातरक्तादिकाश्चये ॥ ते पित्तरोगेषु द्विचत्वारिंशत्तु कीर्त्तिताः रोगेषैव मुनीश्वरे ॥१७॥
[illegible]दास्तु वातरक्तादिकाश्चये ॥ ते पित्तरोगेषु द्विचत्वारिंशत्तु कीर्त्तिताः रोगेष्वेव मुनीश्वरे ॥१८॥ स्नेहस्वेदान
द्विषष्टिर्दोषभेदास्तु सन्निपातादिकाश्चये ॥ ते पित्तरोगेषु संज्ञिताः ॥१८॥ स्नेहस्वेदान
द्विषष्टिर्दोषभेदास्तुः सन्निपातादिकाश्चये ॥ ते पित्तरोगेषु संज्ञिताः ॥१९॥ शीतोपद्र
वाधूमोगंडूषांजनतर्पणे ॥ अष्टादशैवजाः पीडास्ताश्च रोगेषु लक्षिताः ॥१९॥ शीतोपद्र
वएकः स्यादेकश्चोष्णाद्वर्षामतः ॥ शल्योपद्रवएकश्च क्षारःश्चैकःस्मृतस्तथा ॥२०॥ स्थावरं
जंगमं चैव कृत्रिमं चापियद्विषं ॥ तेषां च कालकूटाद्यैर्नवधा स्थावरं विषं ॥२१॥ जंगमं च
दंष्ट्रानखविषं शालंश्टंगास्थिभिस्तथा ॥ मूत्रन्पुरीषाच्छुक्राच्च दृष्टा निश्वासतस्तथा ॥
विषनखाविषं शालश्टंगास्थिभिस्तथा ॥ मूत्रन्पुरीषाच्छुक्राच्च दृष्टानिश्वासतस्तथा ॥
गरश्च ॥ लालायाः स्पर्शतस्तद्वत्तथा शंकाविषंमतं ॥ कृत्रिमं द्विविधं प्रोक्तं गरदूषिविभे

२९

दतः॥२४॥सप्त धातु विषं ज्ञेयं तथा सप्तोपधातुजं॥तथैवोपविषेभ्यश्च जातं
सप्तविषमतं॥२५॥दुष्टनीरविषं चैकं तथैकं दग्धजं विषं॥कपिकच्छुभवा कंडूर्दुष्ट
नीरभवा तथा॥२६॥तथा सूरणकंडूश्च शोफो भल्लातजस्तथा॥मदश्च त्रिविधश्चान्यः
पूगभंगाख्यकोद्रवैः॥२७॥चतुर्विधोन्यो द्रव्याणां फलत्वक्मूलपत्रजः॥इति प्रसि
द्धा गणिता ये किलोपद्रवा भुवि॥२८॥असंख्याश्चापरे धातुमूलजीवादिसंभवाः
॥ ॥इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां निदाने रोग
गणनासंख्यासप्तमोध्यायः॥ ॥इति पूर्वखंडः समाप्तः॥ ॥अथातः स्वर
सः कल्कः क्वाथश्च हिमफांटकौ॥लेपाः कषायाः पंचैते लघवः स्युर्यथोत्तरं॥१॥ते
षु स्वरसकल्पना॥ ॥आहतात्तत्क्षणात्कृष्टाद्द्रव्यात्क्षुण्णात्समुद्धरेत्॥वस्त्रनिष्पी
डितो यश्च स्वरसः स उच्यते॥२॥कुडवं चूर्णितं द्रव्यं क्षिप्तं च द्विगुणे जले॥अहोरा
त्रस्थितं तस्माद्भवेद्वा रस उत्तमः॥३॥आदाय शुष्कं द्रव्यं वा स्वरसानामसंभवे॥

२९

जलेष्ट गुणिते साध्यं पादशिष्टं च गृह्यते ॥४॥ स्वरसस्य गुरुत्वाच्च पलमर्धं प्रयोजयेत् ॥
निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥५॥ मधुश्वेतगुडक्षारान्जीरकं लवणं तथा ॥
घृतं तैलं च चूर्णादीन् कोलमात्रान् रसे क्षिपेत् ॥६॥ सपथा ॥ अमृतायारसः क्षौद्रयुक्तः स
र्वप्रमेहजित् ॥ हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥७॥ अमृतायारसः पयोम
धुना रक्तपित्तजित् ॥ ज्वरकासक्षयहरः कामलाश्लेष्मपित्तहा ॥८॥ त्रिफलायारसः
क्षौद्रयुक्तो दार्वीरसोऽथवा ॥ निंबस्य वा गुडूच्या वा पीतो जयति कामलां ॥९॥ पीतो मरिच
चूर्णेन तुलसीपत्रजो रसः ॥ द्रोणपुष्पीरसो वापि निहंति विषमज्वरान् ॥१०॥ जंब्वाम्राम
लकीनां च पल्लवोत्थो रसो जयेत् ॥ मध्वाज्यक्षीरसंयुक्तो रक्तातीसारमुल्बणं ॥११॥ महाबब्बु
लिकापत्ररसः पानाद्व्यपोहति ॥ चूलीकापत्रनाम वबुरी ॥ ॥ सर्वातीसारान् श्योनाककुटज
त्वक्रसोऽथवा ॥ आर्द्रकस्वरसः क्षौद्रयुक्तो वृषणवातनुत् ॥१२॥ श्वासकासारुचिं हंति ज्वराति
श्याय व्यपोहति ॥ बीजपूररसः पानान्मधुक्षारयुतो जयेत् ॥१३॥ पार्श्वहृद्बस्तिशूलानि

३०

कटुभोपळा

कोष्ठवा मुंच दारुणं॥ शातावर्याश्च मधुना पित्तशूलहरो रसः॥१४॥ निशाचूर्णयुतः कन्यारसश्चौ हापचीहरः॥ गंडमालाभेद॥ अलंबुषायाः स्वरसः पीतो द्विपलमात्रया॥ अलंबुषासैरं हाणजे कुष्ठी॥१५॥ अपचीगंडमालानां कामलायाश्च नाशनः॥ शरामुंडरसः कोष्णो मरिचैरव धूलितः॥१६॥ जयेत्सप्त दिनाभ्यासात्सूयवितार्धभेदकौ॥ ब्राह्मी कूश्मांड षट्ग्रंथा शंखिनी स्वरसाः पृथक्॥१७॥ मधुकुष्ठयुताः पीताः सर्वोन्मादापहारिणः॥ कूष्मांडकस्य स्वरसो गुडेन सह योजितः॥१८॥ दुष्टकोद्रवसंजातं मदं पानाद्व्यपोहति॥ खड्गादिछिन्नगात्रस्य तत्कालं पूरितो व्रणः॥१९॥ गंगेरुकामूलरसैर्जीयते गतवेदनः॥ गंगारुकी चेनावगुरुसंकरी॥२०॥ ॥अथ पुटपाकः॥ ॥पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यतः॥ अतस्तु पुटपाकानां युक्तिरत्रोऽच्यते मया॥२१॥ पुटपाकस्य पाको यं लेपस्यांगारवर्णता॥ लेपं द्व्यंगुलं स्थूलं कुर्याद्द्वांगुष्ठमात्रकं॥२२॥ शिवनी वटजंबूदीपत्रैर्वेष्टनमुत्तमं॥ काश्मरी चेनावकं भारीपत्र॥ पलमात्रो रसो ग्राह्यः कर्षमात्रं मधुः

चं २

काश्मीरी

३०

क्षिपेत् ॥२३॥ कल्कचूर्णद्रवाद्यास्तु देयास्स्वरसवद्बुधैः ॥ स यथा ॥ तत्कालाकृष्टकुटजत्वचं तंदुल ण २
वारिणा ॥२४॥ पिष्टां चतुःपलमितां जंबूपल्लववेष्टितां ॥ सूत्रैर्बद्धां गोधूमपिष्टेन परिवे
ष्टितं ॥२५॥ लिप्तां च घनपंकेन गोमयैर्वह्निना दहेत् ॥ अंगारवर्णां च मृदं दृष्ट्वा वह्नेः समु
द्धरेत् ॥२६॥ ततो रसं गृहीत्वा च शीतं क्षौद्रयुतं पिबेत् ॥ जयेत्सर्वानतीसारान्दुस्तरान्सुचि
ज पुट५ रोत्थितान् ॥२७॥ ॥इति कु[illegible] पाकः॥ ॥कंडितां तंदुलपलं जलेष्टगुणिते क्षिपेत् ॥
भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु ॥२८॥ ॥इति तंदुलोदकं॥ ॥अरलुत्वक् कृत
श्चैवं पुटपाकोग्निदीपनः ॥ अरलुश्शोणजे स्योनापाठा ॥ मधुमोचरसाभ्यां च युक्तः सर्वा
त्तिसारनुत् ॥२९॥ अरलुपुटपाकः ॥ ॥न्यग्रोधादेश्च कल्केन पूरयेद्दोरंतिनिरः ॥ निरंत्र
मुदरं सम्यक् पुटपाकेन तत्स्वेचेत् ॥३०॥ तत्कल्कस्य रसः क्षौद्रयुक्तः सर्वातीसारनुत् ॥ ति
त्तिपुटपाकः ॥ ॥पुटपाकेन विपचेत्सुपक्वं दाडिमीफलं ॥ तद्रसो मधुसंयुक्तः सर्वाती
सारनाशनः ॥३१॥ ॥इति दाडिमीफलपुटपाकः॥ ॥बीजपूराम्रजंबूनां पल्लवानि ज

३१

टस्रपकू॥ विपञ्चेत्पुटपाकेन क्षौद्रयुक्तश्च तद्रसः॥३२॥ छर्दीं निवारयेत् घोरां त्रि

दोषसमुद्भवां॥ ॥इति पल्लवपुटपाकः॥ ॥पिष्टानां वृषपत्राणां पुटपाकरसो हि

सः॥ मधुयुक्तो जयेद्रक्तपित्तकासज्वरक्षयात्॥३३॥ ॥वासापुटपाकः॥ ॥पचेत् क्षु

द्रां सपञ्चांगां पुटपाकेन तद्रसः॥ पिप्पलीचूर्णसंयुक्तः कासश्वासक्षयापहः॥३४॥

कंटकारीपुटपाकः॥ ॥बिभीतकफलं किंचित् घृतेनाभ्य[illegible]॥ गोधूमपिष्टे

नागारे विपचेत्पुटपाकवत्॥३५॥ ततः पक्वं समुद्धृत्य सत्वचं तस्य मुखे क्षिपेत्॥ का

सश्वासप्रतिश्याय स्वरभंगान् जयेत्ततः॥३६॥ ॥बिभीतकपुटपाकः॥ ॥चूर्णं किं

चित् घृताभ्यक्तं शुंठ्या एरंडजैर्दलैः॥ वेष्टितं पुटपाकेन विपचेन्मंदवह्निना॥३७॥

तत्समुद्धृत्य तच्चूर्णं ग्राह्यं प्रातः सितासमं॥ तेन यांति समं पीडा आमानीसारसंभवाः॥

॥३८॥ ॥शुंठीपुटपाकः॥ ॥शुंठीकल्कं विनिःपिष्टं रसैरेरंडमूलजैः॥ विपचेत्पुटपा

केन तद्रसः क्षौद्रसंयुतः॥३९॥ आमवातसमुद्भूतां पीडां जयति दुस्तरां॥ ॥छिन्न

ज्यतस्य चे [margin]

२५ नू [margin]

२१ [margin]

९२ [margin]

पथ्मुंडीपुटपाकः॥ ॥सौरणं कंदमादाय पुटपाकेन पाचयेत्॥ सतैललवणस्त्वस्यरसः
आर्शोविकारनुत्॥४०॥ ॥सुरणपुटपाकः॥ ॥पंचांगोत्तरवारुण्याः कल्कं तत्पत्रवे
ष्टितं॥पाचितं पुटपाकेन तस्या नस्यं निपीनसः॥४१॥ शरावसंपुटे दग्ध्वेभशृंगं हरिण
जं पिबेत्॥ गव्येन सर्पिषा पिष्टं हृत्शूलं नश्यति ध्रुवं॥४२॥ ॥मृगशृंगपुटपाकः॥
॥ ॥ ॥इति श्रीदामोदरसूनुना शार्ङ्ग·धर वि· चिकित्सास्थाने स्वरसादिकल्पना
ष्टमोध्यायः॥८॥ ॥अथ क्वाथकल्पना॥ ॥पानीयं षोडशगुणं सूक्ष्मे द्रव्यपले क्षि
पेत्॥ मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितं॥१॥ तज्जलं पाययेद्धीमान्कोष्णं मृद्व
ग्निसाधितं॥शृतः क्वाथकषायश्च निर्यूहश्च निगद्यते॥२॥आहाररसपाके च संजाते
द्विपलोन्मितं॥वृद्धवैद्योपदेशेन पिबेत्क्वाथं सुपाचितं॥३॥ क्वाथे क्षिपेत्सितामंशैश्च
तुर्थाष्टमषोडशैः॥वातपित्तकफातंके विपरीतं मधु स्मृतं॥४॥ जीरकं गुग्गुलं क्षारं ल
वणं च शिलाजतु॥ हिंगु त्रिकटुकं चैव क्वाथ्ये शाणोन्मितं क्षिपेत्॥५॥ क्षीरं घृतं गुडं तैलं

३२

२२

मूत्रं चान्यं द्रवं तथा ॥ कल्कचूर्णादिकं क्काथे निक्षिपेत्कर्षसंमितं ॥ ६ ॥ स यथा ॥ ॥ गुडू
चीधान्यकारिष्टपद्मकं रक्तचंदनं ॥ गुडूच्यादिरयं क्काथः सर्वज्वरहरस्मृतः ॥ ७ ॥
दीपनो दाहहृल्लासतृष्णाच्छर्द्यरुचीर्जयेत् ॥ गुडूच्यादिक्काथः ॥ ॥ गुडूची पिप्प
लीमूलनागरैः पाचनं स्मृतं ॥ दद्याद्वातज्वरे पूर्वलिंगे सप्तमवासरे ॥ ८ ॥ गुडूच्यादि
पाचनं वातज्वरे ॥ ॥ शालिपर्णीबलारास्नागुडूचीसारिवा तथा ॥ आसांक्काथं पिबे
दुष्णं तीव्रवातज्वरच्छिदं ॥ ९ ॥ शालिपर्ण्यादि ॥ ॥ काश्मरीसारिवाद्राक्षात्रायमाणा
मृतामयाः ॥ कषायः सगुडः पीतो वातज्वरविनाशनः ॥ काश्मर्यादि ॥ ॥ कट्फलेंद्र
यवारिष्टतिक्तामुस्तैः [illegible]श्रृतं जलं ॥ पाचनं दशमे ह्यस्यात्तीव्रे पित्तज्वरे नृणां ॥ कटु
फलादिपाचनं पित्तज्वरे ॥ ॥ पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ॥ प्रियंगु
श्च कृतः क्काथः एषां शर्करया युतः ॥ १२ ॥ पिपासां मुखशोषं च दाहं पित्तज्वरं जयेत् ॥ प
र्पटादि ॥ ॥ द्राक्षा हरीतकी मुस्तं कटुकी कृतमालकः ॥ पर्पटश्च कृतः क्काथ एषां पित्त

आ

३२

ज्वरापहः॥१३॥ तृष्णामूर्छादाहपित्तास्रकृच्छ्रशमनो भेदनः स्मृतः॥ द्राक्षादि॥ ॥बीजपूर
शिफापथ्यानागरग्रंथिकैः स्मृतं॥ सक्षारं पाचनं श्लेष्मज्वरे द्वादशवासरे॥१४॥ बीजपू
रादि पाचनं श्लेष्मज्वरे॥ ॥भूनिंबनिंबपिप्पल्यः सठी शुंठी शतावरी॥ गुडूची बृहती चे
ति क्वाथो हन्यात्कफज्वरं॥१५॥ भूनिंबादि॥ ॥पटोल बृहतीतिक्ता सठी वासामृताभवः॥
क्वाथो मधुयुतः पीतो हन्यात्कफकृतं ज्वरं॥१६॥ पटोलादि॥ ॥पर्पटामृतमुस्तविश्वा
कैरातैः साधितं जलं॥ पंचभद्रमिदं ज्ञेयं वातपित्तज्वरापहं॥१७॥ पंचभद्रं॥ ॥क्षुद्रा
शुंठी गुडूचीनां कषायः पौष्करस्य च॥ कफवाताधिके पेयो ज्वरे वा पित्तदोषजे॥१८॥ का
सश्वासारुचिकरे पार्श्वशूलविधायिनी॥ लघुक्षुद्रादि॥ ॥आरग्वधकणामूलमुस्ता
तिक्ताभयाकृतः॥ क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवं॥१९॥ आमशूलप्रशमनो
भेदी दीपनपाचनः॥ आरग्वधादि॥ ॥अमृतारिष्ट कटुका मुस्तेंद्रयव नागरैः॥ पटो
लचंदनाभ्यां च पिप्पलीचूर्णयुक् स्मृतः॥२०॥ अमृताष्टकमेतच्च पित्तश्लेष्मज्वरा

३२

पहं ॥ छर्द्यरोचकहृल्लासदाहतृष्णानिवारणं ॥ २१ ॥ अमृताष्टकं ॥ ॥ कंटकारीद्वयं
शुंठी धान्यकं सुरदारु च ॥ एभिरेतं पाचनं स्यात् सर्वज्वरविनाशनं ॥ २२ ॥ कंटकारीद
यपाचनं सर्वज्वरे ॥ ॥ शालिपर्णी पृष्ठपर्णी बृहतीद्वयगोक्षुरैः ॥ बिल्वोऽग्निमंथः
श्योनाककाश्मरीपाटलायुतैः ॥ २३ ॥ दशमूलमिति ख्यातं क्वथितं तज्जलं पिबेत् ॥
पिप्पलीचूर्णसंयुक्तं वातश्लेष्मापहं परं ॥ २४ ॥ सन्निपातज्वरहरं सूतिकादोषनाशनं
॥ शोषशैत्यभ्रमस्वेदकासश्वासाविपाकनुत् ॥ २५ ॥ हृत्कंठग्रहपार्श्वार्तितंद्रामस्त
कशूलहृत् ॥ दशमूलं सन्निपातज्वरे ॥ ॥ अभयामुस्तधान्याकरक्तचंदनपद्म
कैः ॥ वासकेंद्रयवोशीरगुडूचीकृतमालकैः ॥ पाठानागरतिक्ताभिः पिप्पलीचूर्ण
युक्शृतं ॥ पिबेत्त्रिदोषज्वरजित् पिपासादाहकासनुत् ॥ २७ ॥ प्रलापश्वासतंद्राघ्नं दी
पनं पाचनं परं ॥ विण्मूत्रानिलविष्टंभवमिशोषारुचीर्जयेत् ॥ २८ ॥ अभयादिसन्निपात
ज्वरे ॥ ॥ कैरातकटुकामुस्तधान्येंद्रयवनागरैः ॥ दशमूलमहादारुगजपिप्पलि

नि २

स

३२

८१

कायुनेः॥ कृतः कषायः पाश्वाति सन्निपातज्वरं जयेत्॥ कासश्वासवमी हिक्कातंद्राहृद्ग्रहनाशनः॥३०॥ अष्टादशांग॥ ॥कटुफलांबुभागीभिर्धान्यरोहिसपर्प्पटैः॥ वचाहरीतकीशृंगीदेवदारुमहौषधैः॥३१॥ क्वाथः कासज्वरं हंति श्वासः श्लेष्मगलग्रहान्॥ कटुकत्वादि॥ ॥त्रिसप्ताहव्यतीतेतु ज्वरोयस्तनुतांगतः॥ प्लीहाग्निसादौ कुरुते सजीर्णज्वर उच्यते॥३२॥ क्वाथोजीर्णज्वरं हंति गुडूच्याः पिप्पलीयुतः॥ तथापंचदजः क्वाथः पित्तज्वरहरः परः॥३३॥ निदिग्धिकामृताशुंठी कषायंपाययेद्भिषक्॥ पिप्पलीचूर्णसंयुक्तं श्वासकासक्षयापहं॥३४॥ पीनसारुचिवैश्वर्यशूलजीर्णज्वरेच्छिदं॥ निदिग्धिकादिजीर्णज्वरे॥ ॥क्षुद्राधान्याकशुंठीभिर्गुडूचीमुस्तपद्मकैः॥ रक्तचंदनभूनिंबपटोलवृषपुष्करैः॥३५॥ कटुकेंद्रयवारिष्टभार्गीपर्पटकैः समैः॥ क्वाथंप्रातर्निषेवेत सर्वजीर्णज्वरच्छिदं॥३६॥ बृहत्क्षुद्रादिजीर्णज्वरे॥ ॥मुस्तामृताशुंठीधात्रीक्वाथः सि[illegible]माक्षिकः॥ पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः॥३७॥ मुस्ता

67

३४

दिविषमज्वरे॥ ॥पटोलत्रिफलानिंबद्राक्षाशम्याकवासकैः॥ क्वाथः सितामधुयु
तो जयेदैकाहिकं ज्वरं॥३८॥पटोलादिरैकाहिकज्वरे॥ ॥गुडूचीधान्यमुस्ताभिश्चंदनो
शीरनागरैः॥ कृतक्वाथं पिबेत्क्षौद्रसितायुक्तं ज्वरातुरः॥३९॥ तृतीयज्वरनाशाय तृष्णा
दाहनिवारणं॥गुडूच्यादितृतीयकज्वरे॥ ॥देवदारुशिवावासाशालिपर्णीमहौषधैः
॥धात्रीयुक्तः शृतं शीतं दद्यान्मधुसितायुतं॥४०॥चतुर्थकज्वरे श्वासकासे मंदानले
तथा॥देवदार्वादि चातुर्थिकज्वरे॥ ॥गुडूचीधान्यकोशीरसुंठीवालकपर्पटैः॥बिल्वप्र
[illegible]तिविषापाठारक्तचंदनवत्सकैः॥४१॥किरातमुस्तेंद्रयवैः क्वथितं शिशिरं पिबेत्॥
सक्षौद्रं रक्तपित्तघ्नं ज्वरातीसारनाशनं॥४२॥बृहद्गुडूच्यादिज्वरातिसारे॥ ॥नागरं
कुटजो मुस्तममृतातिविषा तथा॥एभिः कृतं पिबेत्क्वाथं ज्वरातीसारनाशनः॥४३॥नाग

८

रादिज्वरातिसारे॥ ॥धान्यवालकबिल्वाब्दनागरैः साधितं जलं॥आमशूलहरं ग्राही

३४

पाचनो दीपनं तथा॥४४॥धान्यपंचकं आमवाते॥ ॥धान्यनागरजः क्वाथः पाचनो

दीपनस्तथा॥ एरंडमूलयुक्तश्च जयेदामानिलव्यथां॥ ४५॥ आमवाते॥ ॥ वत्सका
ति विषाबिल्वमुस्तवालकजः स्मृतः॥ अतिसारं जयेत्सामं चिरजं रक्तशूलजित्॥ ४६॥
अतिसारे वत्सकादि॥ ॥ कुटजातिविषापाठाधातुकीलोध्रमुस्तकैः॥ ह्रीवेरदाडि
मयुतैः कृतः क्वाथः समाक्षिकः॥ ४७॥ पयोमोचरसेनैवं कुटजाष्टकसंज्ञकः॥ अति
सारान् जयेद्दाहरक्तशूलामदुस्तरान्॥ ४८॥ कुटजाष्टकं॥ ॥ ह्रीवेरधातकीलोध्र
पाठालज्जालुवत्सकैः॥ धान्यकातिविषामुस्तागुडूचीबिल्वनागरैः॥ ४९॥ कृतः क
षायः शमयेदतिसारं चिरोत्थितं॥ अरोचकामशूलास्रकृज्ज्वरघ्नः पाचनस्मृतः॥ ५०॥
ह्रीवेरादि॥ ॥ धातकीबिल्वलोध्राणि वालकं गजपिप्पली॥ एभिः कृतं शृतं शीतं शि
शूनां क्षौद्रसंयुतं॥ ५१॥ प्रदद्याद्वलेहं वा सर्वातीसारनाशनं॥ धातक्यादि॥ ॥

२ शू

शालिपर्णीबलाबिल्वधान्यशुंठीकृतः [illegible]तः॥ आध्मानशूलसहितां वातजां ग्रहणीं
जयेत्॥ ५२॥ ग्रहण्यां शालिपर्ण्यादि॥ गुडूच्यतिविषाशुंठीमुस्तैः क्वाथः कृतो जयेत्॥

४ णिस्वांगोरेतं जारुवत्सकैः॥ धान्यकातिविषामुस्ता॥ ४

३५

आमानुबंधां ग्रहणीं ग्राही दीपन पाचनः ॥५३॥ चातुर्भद्रकं ॥ ॥पंचधान्यपटो
लानां क्वाथः सक्षौद्रशर्करः ॥ नियोज्यश्छर्दितीसारे बिल्वाम्रास्थिभवस्तथा ॥५४॥ छ
र्द्यतिसारे ॥ ॥त्रिफला देवदारुश्च मुस्ता मूषककर्णिका ॥ शिग्रुरेतैः कृतः क्वाथः पि
प्पलीचूर्णसंयुतः ॥५५॥ शिग्रुरेतैश्चेनावसाहिजन ॥ ॥विडंगचूर्णयुक्तश्च कृमिघ्नः

५ त्रिफलादिः कृमिरोगहा ॥ ॥ कुटजत्वक्फलं मुस्तं क्वथयित्वा जलं पिबेत् ॥ अतिसारं जयत्या

६ कटजादिः शु शर्करामधुसंयुतः ॥५६॥ फलत्रिकामृतातिक्ता निंबकैरातवासकैः ॥ जयेन्मधुयु
तैः क्वाथैः कामलां पांडुतां तथा ॥५७॥ त्रिफलादिः ॥ ॥पुनर्नवाभयानिंबदार्वीतिक्ता
पटोलकैः ॥ गुडूचीनागरयुतैः क्वाथो गोमूत्रसंयुतः ॥५८॥ पांडुकासोदरश्वासशूल
सर्वांगशोथहा ॥५९॥ पुनर्नवादिः ॥ ॥ वासाद्राक्षाभयाक्वाथः पीतः सक्षौद्रशर्क

२२

रः ॥ निहंति रक्तपित्तार्तिश्वासकासान् सुदारुणान् ॥६०॥ रक्तपित्तक्षयं कासं श्लेष्मपित्त
ज्वरं तथा ॥ केवलो वासकः क्वाथः पीतः क्षौद्रेण नाशयेत् ॥६१॥ वासकादिः ॥ पंरकपि

३५

ने॥ ॥वासाक्षुद्रामृतानां क्वाथः क्षौद्रेण ज्वरकासहा॥ कासघ्नः पिप्पलीचूर्णयु
क्तः क्षुद्रारसतः स्तथा॥६२॥ क्षुद्राकुलित्थवासाभिर्नागरेण च साधितः॥ क्वाथः
पुष्करचूर्णाढ्यः श्वासकासौ निवारयेत्॥६३॥ कासे उपचारत्रयं॥ ॥रेणुका
पिप्पलीक्वाथो हिंगुकल्केन संयुतः॥ पानादेव हि पंचापि हिक्का नाशयति क्ष
णात्॥६४॥ हिक्कापारेणुकादि॥ ॥बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण सं
युतः॥ जयेत्त्रिदोषजां छर्दिं पर्पटः पित्तजां तथा॥६५॥ छर्द्यामुपचारत्रयं॥
॥ ॥हिंगुपुष्करचूर्णाढ्यो दशमूलरसस्तो जयेत्॥ गृध्रसीकेवलं क्वाथः शेफा
लीपत्रजस्तथा॥६६॥ रास्नाममृतामहादारुनागरैरंडजं शृतं॥ सप्तधातुगते
वाते सामे सर्वांगिगो पिबेत्॥६७॥ रास्नापंचकं॥ ॥रास्नागोक्षुरकैरंडदेवदा
रुपुनर्नवा॥ गुडूच्यारग्वधश्चैव क्वाथमेषां विपाच्य पेत्॥ शुंठीचूर्णेन सं
युक्तो पिबेज्जंघाकटिग्रहे॥ पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे॥ रास्नासप्तक॥

71

३६

रा द्विगुणभागास्स्याद्देकभागास्तथापरे ॥ धन्वयासबलैरंडदेवदारुसठीवचा

॥ वासकोनागरं पथ्याञ्चव्यमुस्तापुनर्नवाः ॥ गुडुची वृद्धदारुश्च शतपुष्पाच

गोक्षुरः ॥ ७० ॥ अश्वगंधाअतिविषाकृतमालः शतावरी ॥ कृष्णासहचरश्चैव धा

न्यकं बृहतीद्वयं ॥ ७१ ॥ एभिः कृतं पिबेत् क्काथंशुंठीचूर्णेन संयुतं ॥ कृष्णाचूर्णे

नवा योगराजगुग्गुलुनाथवा ॥ ७२ ॥ अजमोदादिनावापि तैलैरंडजेनवा ॥ सर्वां

गकंपे कुब्जे लेपक्षाघाते चबाहुके ॥ ७३ ॥ गृध्रस्यामामवाते च श्लीपदे चापतान

के ॥ उरुस्तंभेचाध्मानेजंघाजानुगते र्दिते ॥ ७४ ॥ शुक्रामयेमेंद्रुरोगे वंध्यायोन्या

मयेषु च ॥ महारास्नादिराख्यातो ब्रह्मणागर्भकारकं ॥ ७५ ॥ महारास्नादि ॥ ॥

एरंडबीजपूरश्च गोक्षुरु बृहतीद्वयं ॥ अश्मभेदस्तथा बिल्वएतेन्मूलैः कृतः स्मृतः

॥ ७६ ॥ एरंडतैलहिंग्वाद्यैः सयवक्षारसैंधवैः ॥ स्तनस्कंधकटीमेंढ्रहृद्योस्थाव्य

थांजयेत् ॥ ७७ ॥ एरंडसप्तकः ॥ ॥ नागरैरंडजः क्काथः क्काथ इंद्रमवेस्सवा ॥ हि

२५

३६

73

गुसो वर्च्चलोपेतो वातशूलनिवारणः॥७८॥ त्रिफलारग्वधः क्वाथः शर्कराक्षौद्रसंयुतः
॥७९॥ रक्तपित्तहरो दाहपित्तशूलनिवारणः॥८०॥ एरंडमूलं द्विपलं जले षड्गुणिते पचेत्
॥ तत्क्वाथो यावशूकाद्यः पार्श्वहृत्कफशूलहा॥८१॥ दूर्वामूलकृतः क्वाथः सयवक्षारसैं
धवैः॥ हृद्रोगगुल्मशूलानि श्वासं कासं च नाशयेत्॥८२॥ हरीतकी जवासा च कृत
मालकगोक्षुरैः॥ पाषाणभेदसहितैः क्वाथो माक्षिकसंयुतः॥८३॥ विबंधे मूत्रकृच्छ्रे च
सदाहे सरुजे हितः॥ ॥मूत्रकृच्छ्रे हरीतक्यादि॥ ॥वीरंतरुर्वृक्ष देहः वासा सह
चरत्रयं॥ कुशाह्वयं नलो गुंद्रा बकपुष्पाग्निमंथकः॥८४॥ मूर्वा पाषाणभेदश्च श्योना
को गोक्षुरस्तथा॥ चुरिगहरा॥ ॥अपामार्गश्च कमलं ब्राह्मी चेति गणो वरः॥ वीरत
र्वादिरित्युक्तः शर्कराश्मरिकृच्छ्रहा॥८५॥ मूत्राघातं वायुरोगान्नाशयेदखिलानपि॥
वीरतर्वादि॥ ॥एला मधुकगोकंटरेणुकैरंडवालकाः॥ कृष्णाश्मभेदसहिताः क्वा
थत्वेषां सुसाधिताः॥८६॥ शिलाजतुयुतः पेयः शर्कराश्मरिकृच्छ्रहा॥ एलादि॥ ॥

वै द्

३८

समूलगोक्षुरः क्वाथः सितामाक्षिकसंयुतः ॥ नाशयेन्मूत्रकृच्छ्राणि तथा चोष्णसमी
रणं ॥ ८७ ॥ वरादार्व्यब्दहारूणां क्वाथः क्षौद्रेण मेहहा ॥ वत्सकत्रिफलादार्वीमुस्ताबीज
कजस्तथा ॥ ८८ ॥ फलत्रिकाब्दद्दार्वीणां विशालायाः स्तं तं पिबेत् ॥ निशाकल्कयुतं सर्वमे
हानां निवृत्तये ॥ ८९ ॥ फलत्रिकादि ॥ ॥ दार्वीरसांजनं मुस्तं भल्लातश्रीफलं दषः ॥ दार्वी

वि

रं नाहरदी ॥ श्रीफलनाम बेलफल ॥ केरातश्च पिबेदेषां क्वाथं शीतं समाक्षिकं ॥ ज
येत्सम्यग्प्रदरं पित्तश्वेता सितारुणं ॥ ९० ॥ दार्व्यादि ॥ ॥ न्यग्रोधप्लक्षकोशाम्लवे
तसाबदरीमुनिः ॥ मधुयष्टी प्रियालश्च लोध्रश्च मुदुंबरः ॥ ९१ ॥ पिप्पलश्च मधूकश्च त
था पाला शपिप्पलः ॥ शल्लकी तिंदुकी जंबुद्वयमाम्लीनरुः शिवा ॥ कदंब ककुभौ चैव भल्ला
तकफलानि च ॥ न्यग्रोधादिगणक्वाथं यथालाभं च कारयेत् ॥ ९२ ॥ अयं क्वाथो महाग्रा
ही व्रणभंगं च साधयेत् ॥ योनिदोषहरो दाहमेदोमेहविषापहः ॥ ९४ ॥ न्यग्रोधादिकषा

मैं

पः ॥ ॥ बिल्वोग्निमंथस्योनाकः काश्मर्यः पाटलास्तथा ॥ क्वाथ एषां जयेन्मेदोदोष

३८

क्षौद्रेण संयुतः ॥९५॥ क्षौद्रेण त्रिफलाक्वाथः पीतो मेदहरः स्मृतः ॥ शीतीभूतों त

णां २ यो [illegible] मेदोह क्षौद्रसंयुतं ॥९६॥ चव्यचित्रकविश्वानां साधितो देवदारुणा ॥ क्वा

थस्त्रिव चूर्णयुतो गोमूत्रेणोदरं जयेत् ॥९७॥ पुनर्नवामृतादारुपथ्यानागरसा

धितः ॥ गोमूत्रगुग्गुलयुतः क्वाथः शोथोदरापहः ॥९८॥ पथ्यारोहितकक्वाथं यवक्षा

रकणायुतं ॥ पिबेत्प्रातर्यकृत्प्लीहगुल्मोदरनिवृत्तये ॥९९॥ पुनर्नवा दारु निशा निशा

शुंठी हरीतकी ॥ गुडूची चित्रको भांर्गी देवदारु च तैः स्मृतैः ॥१००॥ पाणिपादोदरमु

खप्राप्तं शोथं निवारयेत् ॥ फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव पाचयेत् ॥१॥ वातश्ले

ष्मकृतं हंति शोथं वृषणसंभवं ॥ रास्नामृताबलायष्टीगोकंटैरंडजस्मृतः ॥२॥ ए

रंडतैलसंयुक्तो वृद्धिमंत्रभवं जयेत् ॥ कांचनारत्वचः क्वाथः शुंठीचूर्णेन नाशयेत् ॥३॥

गंडमालां तथा क्वाथः क्षौद्रेण वरुणत्वचा ॥ [illegible] क त्वक्काथं गोमूत्रेण युतं पि साषोढव २

बेत् ॥५॥ श्लीपदानां विनाशाय मेदोदोषनिवृत्तये ॥ पुनर्नवा वरुणयोः क्वाथो न वि

३८

द्रधिं जयेत् ॥ ५ ॥ तथाग्निगुभवः क्काथो हिंगुसैंधवसंयुतः ॥ वरुणादिगण क्काथम

पक्के मध्यं विद्रधौ ॥ ६ ॥ उषणादि रजोयुक्तं पिबतत्रामनहेतवे ॥ समयया ॥ वरुणो बक

पुष्पश्च बिल्वापामार्गचित्रकः ॥ अग्निमंथद्वयं शिगुद्वयं च बृहतिद्वयं ॥ सैरेयकत्रयं

मूर्वा मेषशृंगी किरातकः ॥ ८ ॥ अजाशृंगी च बिंबी च करंजश्च शतावरी ॥ वरुणादिगु

ण क्काथः कफमेदोहरस्मृतः ॥ ९ ॥ हंसिगुल्मं शिरःशूलं तथाभ्यंतरविद्रधिं ॥ वरुणादिः ॥

॥ ॥ खदिरा त्रिफलाक्काथो महिषी घृतसंयुतः ॥ विडंग चूर्णयुक्तश्च भगंदर वि

सर्वाँदिरादिः नाशनः ॥ १० ॥ पटोल त्रिफला निंब किरात खदिरासनैः ॥ क्काथः पीतो जयेत्सर्वानु

परंजात्सगुग्गुलः ॥ ११ ॥ अमृतैरंडवासानां क्काथ एरंडतैलयुक् ॥ पीतः सर्वांग संचा

री वातरक्तं जयेत् ध्रुवं ॥ १२ ॥ पटोलत्रिफलातिक्ता गुडूची च शतावरी ॥ एतत्क्काथो ज

येत्पीतो वातास्त्रं दाहसंयुतं ॥ १३ ॥ पटोलादिः ॥ ॥ क्काथो वल्गुज चूर्णाढ्यो धात्री

खदिरसारयोः ॥ जयेत्सुशीलितो नित्यं श्वित्रं पथ्याशिनां नृणां ॥ १४ ॥ आवल्गुजादिः ॥

न

३८

मंजिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः ॥ भांगीक्षुद्रावचानिंबनिशाद्वयफलत्रिकैः ॥१५॥ पटोलकटुकामूर्वाविडंगासनचित्रकैः ॥ शतावरीत्रायमाणाकृष्णेंद्रयववासकैः ॥१६॥ भृंगराजमहादारुपाठाखदिरचंदनैः ॥ त्रिवृद्वरुणकैरातबाकुचीकृतमालकैः ॥१७॥ शाखोटकमहानिंबकरंजातिविषाजलैः ॥ सुगंधावाला ॥ इंद्रवारुणिकानंताकांवल्लीपर्पटैः समैः ॥१८॥ एभिः कृतंपिबेत्क्वाथंगुग्गुलुसंयुतं ॥ अष्टादशेषु कुष्ठेषु वातरक्तार्दितेनथा ॥१९॥ उपदंशेश्लीपदे-चप्रसुप्तौपक्षघातके ॥ मेदोदोषे नेत्ररोगेमंजिष्ठादिः प्रशस्यते ॥२०॥ ॥ बृहन्मंजिष्ठादिः ॥ ॥ मंजिष्ठात्रिफलातिक्तावचादारुनिशामृता ॥ निंबश्चैषांकृतः क्वाथोवातरक्तविनाशनः ॥२१॥ पामाकपालिकाकुष्ठरक्तमंडलजिन्मतः ॥ लघुमंजिष्ठादिः ॥ ॥ पथ्याक्षधात्रीभूनिंबैर्निशानिंबामृतायुतैः ॥२२॥ कृतः क्वाथोषडंगोयंसगुडः शीर्षशूलहा ॥ भ्रूशंखकर्णशूलानितथार्धशिरसोरुजः ॥२३॥ सूपविश्यंशिरवकंचदंतपातं-चनद्रुआं ॥ क्वाथ्यंपटलेमुक्तं

सांरिवां (margin)

कणा (margin)

३९

चक्षुःपीडां व्यपोहती ॥२४॥ पथ्यादिः ॥ ॥ वासाकृष्णामृतादार्वीरक्तचंदनचित्रकैः ॥ विश्वा
भूनिंबनिंबकटुकापटोलत्रिफलांबुदैः ॥२५॥ यवकालिंगकुटजैः क्वाथः सर्वाक्षिरोग
हा ॥ वैस्वर्यं पित्तजं श्वासं नाशयेदुरसः क्षतं ॥२६॥ वासादिः ॥ ॥ अमृतात्रिफलाक्वाथः
पिप्पलीचूर्णसंयुतः ॥ सक्षौद्रः शीलितो नित्यं सर्वनेत्रव्यथां जयेत् ॥२७॥ अमृतादिः ॥
॥ ॥ अश्वत्थोदुंबरप्लक्षवटवेतसजस्मृतः ॥ व्रणशोथोपदंशानां क्षालनात्रानस्मृ
तः ॥२८॥ इति क्वाथः ॥ ॥ अथ प्रमथ्या ॥ ॥ प्रमथ्या प्रोच्यते द्रव्यं पलात्कल्कीकृतात्स्रु
तात् ॥ तोयेष्टगुणिते तस्याः पानमाहुः पलद्वयं ॥२९॥ सा यथा ॥ ॥ मुस्तकेंद्रयवैः सि
द्धा प्रमथ्या द्विपलोन्मिता ॥ सुसीता मधुसंयुक्ता रक्तातीसारनाशिनी ॥३०॥ अथ यवागुः
॥ ॥ साध्यं चतुःपलं द्रव्यं चतुःषष्टिपलैर्जले ॥ तत्क्वाथेनार्धशिष्टेन यवागुः साध
येत् द्रवां ॥३१॥ घनां ॥ सा यथा ॥ ॥ आम्राम्रातकजंबूत्वक्कषाये विपचेद्बुधः ॥ यवा
गूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत् ॥३२॥ अथ यूषाः ॥ ॥ कल्कद्रव्यं पलं सुंठी

३९

पिप्पलीचार्धकार्षिकी॥ वारिप्रस्थेन विपचेत्सद्रवो यूषउच्यते॥ ३३॥ सयथा॥ ॥
कुलित्थयवकोलैश्चमुद्गैर्मूलकशुंठिकैः॥ शुंठीधान्याकमुद्गैश्च यूषः श्लेष्मानिलाप
हः॥ ३४॥ सप्तमुष्टिक इत्येषसन्निपातज्वरान्जयेत्॥ आमवातहरः कंठहृदक्षा
णां विशोधनः॥ ३५॥ सप्तमुष्टिकयूषः॥ ॥ अथपानादिकल्पना॥ ॥ क्षुण्णद्रव्यं
पलं साध्यं चतुःषष्टिपले जले॥ अर्धशेषं च तद्देयं पानेभक्तादिसंवि धौ॥ ३६॥
सयथा॥ ॥ उशीरपर्पटोदीच्यमुस्तानागरचंदनैः॥ जलं सृतं हिमं पेयं पिपासा
ज्वरनाशनं॥ ३७॥ ॥ अथउष्णोदकविधिः॥ ॥ अष्टमेनांशशेषेण चतुर्थेनार्ध
केन वा॥ अथवाक्वथनेनैव सिद्धमुष्णोदकं पिबेत्॥ ३८॥ श्लेष्मामवातमेदोघ्नं
बस्तिशोधनदीपनं॥ कासश्वासानज्वरं हंति पीतमुष्णोदकं निशि॥ भिनत्ति श्लेष्म
संघातं मारुतं चापिकर्षति॥ अजीर्णं जारयत्याशु पीतमुष्णोदकं निशि॥ ४०॥ ॥
॥ अथक्षीरपानकविधिः॥ ॥ क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणं॥ क्षीराव

४०

शोथं तत्पीतं शूलमामोद्भवं जयेत् ॥४१॥ अथान्नपानविधिः ॥ ॥ कासश्वासशिरःशू
लपार्श्वशूलात्सुदारुणान् ॥ मुच्यते ज्वरितः पीत्वा पंचमूलीशृतं पयः ४२ ॥ शालिपर्ण्या
दि:॥ ॥अथ अन्नप्रक्रिया॥ ॥अथान्नप्रक्रिया चैव प्रोच्यते चातिविस्तरात् ॥४३॥
यवागूः षड्गुणजले सिद्धा स्यात्कृशरा घना ॥ तंडुलैर्मुद्गमाषैश्च सत्तैर्वा साधिताति
हि ॥ ना ॥ यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ॥४४॥ अथ विलेपी ॥ ॥ विले
पी च घना सिक्थैः सिद्धा नीरे चतुर्गुणे ॥ विलेपी तर्पणी हृद्या मधुरा पित्तनाशिनी ॥
॥४५॥ अथ पेया ॥ ॥ द्रव्याधिका स्वल्पसिक्था चतुर्दशगुणे जले ॥ सिद्धा पेया बुधै
र्ज्ञेया यूषः किंचिद्घनस्ततः ॥४६॥ पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा ॥ यूषो
बल्यः स्तनः कंठ्यो लघुपाकः कफापहः ॥४७॥ पेयायूषौ ॥ ॥ अथ भक्तं ॥ ॥ जले चतु
र्दशगुणे तंडुलानां चतुःपलं ॥ विपचेत्स्रावयेन्मंडं स भक्तो मधुरो लघुः ॥४८॥ इति भ
क्तः ॥ ॥ अथ मंडः ॥ ॥ नीरे चतुर्दशगुणे सिद्धो मंडस्त्वसिक्थकः ॥ शुंठिसैंधवसं

४०

युक्तः पाचनो दीपनस्मृतः ॥४९॥ इति क्षुद्रमंडः ॥ ॥ धान्यत्रिकटुसिंधूत्थयुक्
स्तक्रेण योजितः ॥ भृष्टश्च हिंगुतैलाभ्यां स मंडोऽष्टगुणः स्मृतः ॥५०॥ दीपनः प्राणदो
बस्तिशोधनो रक्तवर्धनः ॥ ज्वरजित्सर्वदोषघ्नो मंडोऽष्टगुण उच्यते ॥५१॥ ॥ इ
ति अष्टगुणमंडः ॥ ॥ सुकंडितैस्तथा भृष्टैर्लघुमंडो भवेच्छुभः ॥ कफपित्तहरो
कंठ्यो रक्तपित्तप्रसादनः ॥ लाजैर्वा तंदुलैर्भृष्टैर्लाजमंडः प्रकीर्तितः ॥ श्लेष्मपित्त
हरो ग्राही पिपासाज्वरजिन्मतः ॥५२॥ इति लाजमंडः ॥ ॥ इति श्रीदामोदरसूनु
शार्ङ्गधरविरचितायां चिकित्सास्थाने क्वाथादिकल्पनानवमोध्यायः ॥९॥ ॥ अथ
फांटकल्पना ॥ ॥ सूक्ष्मद्रव्यपले सम्यक् जले मुष्णां विनिक्षिपेत् ॥ मृत्पात्रे कुड
वोन्मानं ततस्तु स्रावयेत्पटात् ॥५४॥ तस्याच्चूर्णद्रवः फांटस्तन्मानं द्विपलोन्मितं ॥
मधुश्वेतागुडादींस्तु क्वाथवत्तत्र निक्षिपेत् ॥५५॥ सयथा ॥ मधूकपुष्पं मधुकं चंद
नं च परूषकं ॥ सुरसं ॥ मृणालं कमलं लोध्रं कंभारी नागकेसरं ॥५६॥ त्रिफला सारिवां

४१

द्राक्षां स्नानानु कोष्णजले क्षिपेत् ॥ सितामधुयुतः पेयः फांटो वा सोऽहिमोऽथवा ॥ ॥५७॥ वातपित्तज्वरं दाहं तृष्णामूर्छारतिभ्रमान् ॥ रक्तपित्तमदं हन्यात् नात्र कार्या विचक्षणा ॥ ५८॥ इति मधुकपुष्पादि फांटः ॥ ॥आम्र जंबु किशल ये वटस्य शुंगप्ररोहकैः ॥५९॥ उशीरेण कृतः फांटः सक्षौद्रो ज्वरनाशनः ॥ पिपासाछर्दीतीसारान्मूर्छो जयति दुस्तरां ॥६०॥ आम्रादि फांटः ॥ ॥मधूकपुष्पकंभारी चंदनोशीरधान्यकैः ॥ द्राक्षायव कृतः फांटः शीतश्शर्करयायुतः ॥६१॥ तृष्णा पित्त हरः प्रोक्तो दाहमूर्छाभ्रमान् जयेत् ॥ लघुमधूकपुष्पादि फांटः ॥ ॥अथ मंथः ॥ ॥ ॥मंथोपि फांटभेदस्यात्तेन चात्रैव कथ्यते ॥ जले चतुः पले शीते क्षुण्णं द्रव्यं पलं क्षिपेत् ॥ मृत्पात्रे मंथयेत्सम्यक् तस्मान्नं द्विपलोन्मितं ॥ खर्जूरो दाडिम द्राक्षा तिंतिडी कांम्लिकामलै ॥ ६२॥ सपरूषैः कृतो मंथः सर्वमद्यविकारनुत् ॥ खर्जूरादि मंथः ॥ ॥ क्षौद्रयुक्तमसूराणां सक्तवो दाडिमांभसा ॥ मंथपिता वा रसं संभुछर्दि दोषत्रयोद्

४१

६ नीलोत्पलं हिमः पेयस्तृष्णाछर्दिनिवारणः ॥ मरिच्यादि हिमः ॥ ६४ ॥ ॥ ६

वा ॥ मसूरादि मंथः ॥ ॥ ष्लादितेन्द्रीतनीरेणसघृतैर्यवसक्तुभिः ॥ नातिसांद्रद्रवैर्मं

थः तृष्णादाहास्रपित्तहा ॥ ६५ ॥ सक्तुमंथः ॥ ॥ इतिश्रीदामो॰ शा॰ वि॰ चि॰ फांटादिक

ल्पनाध्यायः ॥ ॥ अथ हिमकल्पना ॥ ॥ सूक्ष्मद्रव्यपलं सम्यक् षड्भिर्नीरपलैर्लुतं ॥

निशोषितं हिमः सस्याच्च थाशीतकषायकः ॥ ६६ ॥ तन्मानं फांटवज्ज्ञेयं सर्वत्रैव चक्षु

पः ॥ सयथा ॥ ॥ आम्रजंबूत्वककुभं चूर्णीकृत्य जले क्षिपेत् ॥ हिमं तत्पिबेत्प्रातः सक्षौ

द्रं रक्तपित्तजित् ॥ ६७ ॥ आम्रादि हिमः ॥ ॥ मरीचं मधुयष्टिश्च काकोदुंबरपल्लवं ॥ नी

लोत्पलं बला द्राक्षा मधूकं मधुकं तथा ॥ ६९ ॥ उशीरं प[illegible] धान्यकं चैव कोरमरीच परूषकं ॥

एतच्छीतकषायश्च वातपित्तज्वरान् जयेत् ॥ सप्रलापभ्रमच्छर्दिमोहतृष्णानिवारणः

॥ ७० ॥ नीलोत्पलादि हिमः ॥ ॥ अमृतायाहिमः पेयो जीर्णज्वरहरस्मृतः ॥ वासाया

श्च हिमः कासरक्तपित्तज्वरांजयेत् ॥ ७१ ॥ अमृतादि हिमो वासादि हिमः ॥ ॥ प्रातः सश

र्करः पेयो हिमो धान्याकसंभवः ॥ अंतर्दाहं हरेत्तृष्णां जयेत्स्रोतो विशोधनः ॥ ७२ ॥

४२

धान्यहिमः॥ ॥धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः॥ रक्तपित्तं ज्वरं दाहं
तृष्णां शोषं च नाशयेत्॥ ७३॥ धान्याकादिहिमः॥ ॥इति श्रीदामो॰ शार्ं॰ वि॰ चि॰ हि
मकल्पनाध्यायः॥ ॥अथ कल्ककल्पना॥ ॥द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं
लं पिबेत्॥ प्रक्षेपावापकल्कास्ते तन्मानं कर्षसंमितं॥ ७४॥ कल्के मधु घृतं तैलं देयं
द्विगुणमात्रया॥ सीतागुडं समं दद्यात् द्रवा देयाश्चतुर्गुणः॥ ७५॥ सयथा॥ ॥त्रिवृ
ध्या पंचवृध्या वा सप्तवृध्याथवा कणाः॥ पिबेत् सिद्धा दशदिनं नास्ति येवाय कर्षये
त्॥ ७६॥ एवं विंशद्दिनं सिद्धं पिप्पलीवर्धमानकं॥ अनेन पांडुवातास्त्र कासश्वासारु
चिज्वराः॥ ७७॥ उदरार्शः क्षयः श्लेष्मवातानश्यन्त्युरोग्रहाः॥ पिप्पलीवर्धमानं॥ ॥
लेपान्निंबदलैः कल्को व्रणशोधनरोपणः॥ भक्षणाच्छर्दिकुष्ठानि पित्तश्लेष्मकृमीन् ज
येत्॥ ७८॥ महानिंबजटाकल्को गृध्रसीनाशनस्मृतः॥ शुद्धकल्को रसोनस्यात्तिलतैले
नमिश्रितः॥ ७९॥ वातरोगान् जयेत्तीव्रान् विषमज्वरनाशनः॥ पक्वकंदरसोनस्य गुटि

४२

का निस्तुषीकृतः ॥ पाचयित्वा च मध्यस्थं दूरीकुर्याच्च दुंकुरः ॥ तद्दुग्धगंधनाशाय रात्रौ तक्रेऽपि निक्षिपेत् ॥ ८१ ॥ अपनीय चर्म मध्याद्वीलयां पेषयेत्ततः ॥ तन्मध्ये पंचमांशेन चूर्णमेषां विनिक्षिपेत् ॥ ८२ ॥ सौवर्चलं यवानी च भर्जितं हिंगु सैंधवं ॥ कटुत्रिकं जीरकं च समभागानि चूर्णयेत् ॥ ८३ ॥ एकीकृत्य ततः सर्वं कल्कं कर्षप्रमाणतः ॥ खादेदग्निबलापेक्षि ऋतुदोषाद्यपेक्षया ॥ ८४ ॥ अनुपानं ततः कुर्यादेरंडस्य तु मन्वहं ॥ सर्वांगैकांगकं वातमर्दितं चापतंत्रकं ॥ ८५ ॥ अपस्मारं तथोन्मादमूरुस्तंभं च गृध्रसीं ॥ उरःपृष्ठकटीपार्श्वकुक्षिपीडां कृमीञ्जयेत् ॥ ८६ ॥ अजीर्णमातपं रोषमतिनीरं पयो गुडं ॥ रसोनमश्नन्पुरुषः स्त्यजेदेतन्निरंतरं ॥ ८७ ॥ मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः ॥ ॥ इति रसोनकल्कः ॥ ॥ पिप्पली पिप्पलीमूलं भल्लातककफलानि च ॥ एतत्कल्कस्य सक्षौद्र ऊरुस्तंभनिवारणः ॥ ८८ ॥ विष्णुक्रांता जयाकल्कः सिताक्षौद्रघृतैर्युतः ॥ परिणामभवं शूलं नाशयेत्सप्तभिर्दिनैः ॥ ८९ ॥ शुंठीतिलगुडैः कल्कं दुग्धेन सह पाचयेत् ॥ परि

४२

णाम भवं मूलमामवातश्च नन्नृपति ॥९०॥ अपामार्गस्य बीजानां — तंदुलवारिणा ॥ पीतो रक्तार्शसां नाशं कुरुते नास्ति संशयः ॥९१॥ बदरीमूलकल्के न तिलकल्कं च योजयेत् ॥ मधुक्षीरयुतः कुर्याद्रक्तातीसारनाशनं ॥९२॥ कूष्मांडकरसे पिष्टं लाक्षाकर्षद्वयं पिबेत् ॥ रक्तक्षयमुरोघातं क्षयरोगं च नाशयेत् ॥९३॥ तंदुलीयजटाकल्कः सक्षौद्रः सरसांजनः ॥ तंदुलोदकसंपीतो रक्तप्रदरनाशनः ॥९४॥ अंकोलमूलकल्कश्च सक्षौद्रस्तंदुलांबुना ॥ अतीसारहरः प्रोक्तस्तथा विषहरस्मृतः ॥९५॥ वंध्याकर्कोटकीमूलं पाटलायाजटास्तथा ॥ घृतेन बिल्वमूलं वा द्विविधं नाशयेद्विषं ॥९६॥ अभयासैंधवकणाशुंठीकल्कं त्रिदोषहा ॥ पथ्यासैंधवशुंठीभिः कल्को दीपनपाचनः ॥९७॥ त्रिवृत्सलाराबीजानि वारसायजदानिका ॥ कंपिल्लकं विडंगं च गुडश्च समभागिकः ॥९८॥ तक्रेण कल्कमेतेषां पिबत्कृमिगणापहं ॥ नवनीततिलैः कल्को जेता रक्तार्शसां मतः ॥९९॥ नवनीतसिता नागकेसरैश्चापि तद्विधः ॥ पीतो मसूरयूषेण कल्कः शुंठीशालादुजः ॥१००॥ ४२

जयेत्संग्रहणीं तक्रेण बृहतीद्वयं॥ ॥इतिश्रीहा॰ शा॰ चि॰ कल्ककल्पनाध्यायः॥ ॥

॥ ॥अथचूर्णकल्पना॥ ॥अत्यंतशुष्कंयद्द्रव्यंसुपिष्टंवस्त्रगालितं॥तस्याच्चूर्णरजः
क्षोदस्तन्मात्राकर्षसंमिता॥१॥चूर्णेगुडःसमोदेयःशर्कराद्विगुणाभवेत्॥चूर्णेषुभर्जितं
हिंगुदेयंनोत्क्लेदकृद्भवेत्॥२॥लिहेच्चूर्णंद्रवैःसर्वैर्घृताद्यैर्द्विगुणोन्मितं॥पिबेच्चतुर्गुणै
रेवचूर्णमालोडितंद्रवैः॥३॥चूर्णावलेहगुटिकाकल्कानामनुपानकं॥पित्तवातकफातंके
त्रिद्व्येकपलमाहरेत्॥४॥यथातैलंजलेक्षिप्तंक्षणेनैवप्रसर्पति॥अनुपानबलादंगेत
थासर्पतिभेषजं॥५॥द्रवेणयावतासम्यक्चूर्णंसर्वंप्लुतंभवेत्॥भावनायाःप्रमाणं
तुचूर्णेप्रोक्तंभिषग्वरैः॥६॥तद्यथा॥ ॥आमलंचित्रकःपथ्यापिप्पलीसैंधवंतथा
॥चूर्णितोयंगणोज्ञेयःसर्वज्वरविनाशनः॥७॥आमलक्यादिचूर्णं॥ ॥मधुनापिप्प
लीचूर्णंलिहेत्कासज्वरापहं॥हिक्काश्वासहरंकंठ्यंप्लीहघ्नंबालकोचितं॥८॥मधुपि
प्पली॥ ॥एकाहरीतकीयोज्याद्वौचयोज्यौबिभीतकौ॥चत्वार्यामलकान्याहुःत्रि

४४

फलेषा प्रकीर्तिता ॥९॥ त्रिफला मेहशोथघ्नी नाशयेद्विषमज्वरान् ॥ दीपनी श्लेष्म
पित्तघ्नी कुष्ठहंत्री रसायनी ॥१०॥ सर्पिर्मधुभ्यां संयुक्ता सैव नेत्रामयाञ्जयेत् ॥ इति त्रि
फला ॥ ॥ पिप्पली मरिचं शुंठी त्रिभिस्त्र्यूषणमुच्यते ॥११॥ दीपनं श्लेष्ममेदोघ्नं कुष्ठ
पीनसनाशनं ॥ जयेदरोचकं सामं मेहगुल्मगलामयान् ॥१२॥ त्र्यूषणं ॥ ॥ पिप्प
ली पिप्पलीमूलं च चव्यचित्रकनागरैः ॥ पंचकोलमिति ख्यातं रुच्यं दीपनपाचनं ॥१३॥
आनाहगुल्मप्लीहघ्नं शूलश्लेष्मोदरापहं ॥ पंचकोलं ॥ ॥ त्रिगंधमेला[illegible]त्वकूप
त्रैश्चातुर्जातिं सकेसरैः ॥ त्रिगंधं चतुर्जातं रूक्षोष्णं लघुपित्तकृत् ॥ चूर्णं हि चिकरं ती
क्ष्णं विषश्लेष्ममयान्जयेत् ॥१५॥ त्रिगंधं चातुर्जातिकं ॥ ॥ काकोली क्षीरकाकोली
जीवकर्षभकौ तथा ॥ मेदा चान्या महामेदा जीवंती मधुकं तथा ॥१६॥ मुद्गपर्णी माष
पर्णी जीवनीयो गणस्त्वयं ॥ जीवनीयो गणः स्वादुर्गर्भसंधानकृद्गुरुः ॥१७॥ स्तन्य
कृद्बृंहणो वृष्यः स्निग्धः शीतः स्तृषापहः ॥ रक्तपित्तं क्षतं शोषज्वरं दाहानिलाञ्ज

पत्नू॥१८॥ ॥इति जीवनीयोगणः॥ ॥ द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा॥
ऋद्धिर्वृद्धिश्च तैः सर्वैरिष्टवर्गमुदाहृतः॥१९॥ अष्टवर्गो बुधैः प्रोक्तो जीवनीयः समो
गणे॥ ॥इति अष्टवर्गाः॥ ॥सिंधुसौवर्चलं चैव बिडं सामुद्रिकं गडं॥ एकद्वित्रि
चतुःपंचलवणानि क्रमाद्विदुः॥ तेषु मुख्यं सैंधवं स्यादनुक्ते तत्प्रयोजयेत्॥ सैंध
वाद्यं रोमकांतं ज्ञेयं लवणपंचकं॥ २१॥ मधुरं स्रष्टविण्मूत्रं स्निग्धं सूक्ष्मं बलापहं
॥ वीर्योष्णं दीपनं तीक्ष्णं कफपित्तविवर्धनं॥ २२॥ इति लवणपंचकं॥ ॥ सर्जिका
यावशूकश्च क्षारयुग्ममुदाहृतं॥ ज्ञेयो वह्निसमो क्षारो सर्जिका यावशूकजो॥ २३॥
क्षारावुभौ पित्तगुल्मार्शोग्रहणीरुक्छिदः सराः॥ पाचनाः कृमिपुंस्त्वघ्नाः शर्करा
श्मरिनाशना॥ २४॥ ॥इति क्षाराः॥ ॥ त्रिफला रजनीयुग्मं कंटकारीयुगं सठी॥
त्रिकटु ग्रंथिकं मूर्वा गुडूची धन्वयासकः॥ कटुका पर्पटो मुस्तं त्रायमाणा च वाल
कं॥ निंब पुष्करमूलं च मधुयष्टी च वत्सकः॥ २५॥ यवानी द्रयवा भार्गी शिग्रुबीजं

४५

सुराष्ट्रजां॥ वचा सकूप ब ध्रकोश्चीरं चंदनाति विषा बला:॥ शालिपर्णीपृष्टपर्णी वि
डं गंतगरं तथा॥ चित्रकोदेवकाष्टं च चव्यं पत्र पटोलजं॥२८॥ जीवकर्षभको चैव लवंगं
वंशलोचनं॥ पुंडरीकं च काकोलीपत्र कं जातिपत्रकं॥२९॥ तालीसपत्रं च तथा समभा
गानि चूर्णयेत्॥ सर्वचूर्णस्य चार्धांशं कैरातं प्रक्षिपेत् सुधी:॥३०॥ एतत्सुदर्शनं नाम
चूर्णं दोषत्रयापहं॥ ज्वरांश्च निखिलान् हन्यान्नात्र कार्या विचारणा॥३१॥ पृथक् द्वंद्वागं
तुजांश्च धातुस्थान् विषमज्वरान्॥ सन्निपातोद्भवांश्चान्यान्मानसानपि नाशयेत्॥
॥३२॥ शीतज्वरैकाहिकादीन्मोहं तंद्रां भ्रमं तृषां॥ श्वासकासं च पांडुं च हृद्रोगं हं
ति कामलां॥३३॥ शिरःपृष्ठकटीजानुपार्श्वशूलनिवारणं॥ शीतांबुना पिबेत् धीमान् स
र्वज्वरनिवृत्तये॥३४॥ सुदर्शनं यथा चक्रं दानवानां विनाशनं॥ तद्वज्ज्वराणां सर्वेषां
इदं चूर्णं प्रणाशनं॥३५॥ ॥इति सुदर्शनं चूर्णं॥ ॥कट्फलं पौष्करं शृंगी पिप्पली म
धुना सह॥ कासश्वासज्वरच्छर्दिश्रेष्ठो लेहः कफांतकृत्॥३६॥ कासश्वासज्वरहरा त्रि

४५

फलापिप्पलीयुता ॥ चूर्णितामधुनालीढा भेदिनी चाग्निबोधिनी ॥ ३७ ॥ कट्फलं मु
स्तकं तिक्ता शठी शृंगी च पोष्करः ॥ चूर्णमेषां च मधुना शृंगवेररसेन वा ॥ ३८ ॥ लिहेद्
ज्वरहरं कंठ्यं कासश्वासारुचिज्वरापहं ॥ वमथुं छर्दि तथा शूलं क्षयं चैव व्यपोहति ॥ ३९ ॥
कट्फलादि चूर्णं ॥ ॥ शृंगी प्रतिविषा कृष्णा चूर्णिता मधुना लिहेत् ॥ शिशोः कास
ज्वरच्छर्दिसांसै वा केवला विषा ॥ ४० ॥ शृंग्यादि चूर्णं ॥ ॥ शुंठी प्रतिविषा हिंगु कृष्णा ॥
कुटजश्चित्रकैः ॥ चूर्णमुष्णांबुना पीनमामातीसारनाशनं ॥ ४१ ॥ हरीतकी प्रतिविषा
सिंधु सौवर्चलं वचा ॥ हिंगु चेति कृतं चूर्णं पिबेदुष्णेन वारिणा ॥ ४२ ॥ आमातीसा
रशमनं ग्राही चाग्निप्रबोधनं ॥ मुस्तं शुंठी प्रपत्रा बिल्वलोध्रं मोचरसं तथा ॥ ४३ ॥
धातकी चूर्णमेतं गुडाद्यां पाययेत् सुधिः ॥ सर्वातिसारशमनं निरुणद्धि प्रवा
हिकां ॥ लघुगंगाधरं नाम चूर्णं संग्राहकं परं ॥ ४४ ॥ ॥ लघु गंगाधरं चूर्णं
॥ ॥ मुस्ता पाठा कलिंग शुंठी भि धातकी लोध्र वालकैः ॥ बिल्व मोचरसाभ्यां च

४६ पाठं द्रूयवयवत्स्रके ॥४५॥ आम्रबीजंप्रतिविषालज्जालुरितिचूर्णितैः॥ क्षौद्रतंदु
लपानीयपीतैर्यातिप्रवाहिका॥४६॥ सर्वातिसारोग्रहणीप्रशमं याति वेगतः॥
वृद्धगंगाधरं चूर्णंसिद्धंगोपिबंधनं॥४७॥ वृद्धगंगाधरचूर्णं॥ ॥तक्रेणयः पि
बेन्निसं चूर्णमरिचसंभवं॥ चित्रसौवर्चलोपेतंग्रहणीतस्यनश्यति॥ कुक्षीहमंद
ग्निगुल्मार्शोनाशनंभवेत्॥४८॥ मरिचादिचूर्णं॥ ॥अष्टोभागाकपित्थस्यषड्भा
गाशर्करामता॥ दाडिमंतिंतिडीकंचश्रीफलंधातकीतथा॥५०॥ अजमोदाच पिप्प
ल्यः प्रत्येकंतुत्रिभागिकाः॥ मरीचंजीरकंधान्याग्रंथिकंवालकंतथा॥ सौवर्च
लंयवानीचचतुर्जातंसुचित्रकं॥ नागरंचैकमागस्य प्रत्येकं सूक्ष्मचूर्णिता॥
॥५२॥ कपित्थाष्टकसंज्ञंस्यात्चूर्णमेतत्कलामयान्॥ अतिसारंक्षमंसुगंग्रहणी
चक्षयोहमी॥५३॥ कपित्थाष्टकचूर्णः॥ ॥अथज्वरातिसारचिकित्सा॥ ॥उशी
रंवालकंमुस्तंधान्यकंबिल्वमेवच॥ समंगाधातकीलोध्रंविश्वंदीपनपाचनं॥५४॥ ४६

हं सरोचकं पित्तामविबंधं सान्निपेदनं ॥ सशोणितमतीसारं सज्वरं वाथदिज्वरं ॥ ५५ ॥ बि
ल्ववालकभूनिंबगुडूचीधान्यनागरैः ॥ कृतः क्वाथस्तु नक्काथो ज्वरातीसारशूलिने ॥ ५६ ॥
॥ इति बिंबसेने ॥ ॥ दाडिमाद्द्विपलं ग्राह्यं खंडस्याष्टपलानि च ॥ त्रिगंधस्य पलं चैकं त्रि
कटुस्यात्पलत्रयं ॥ एकत्रीकृतं सर्वं चूर्णं स्याद्दाडिमाष्टकं ॥ ५७ ॥ रुचिकृद्दीपनं कं

का ठ्यं ग्राहि सज्वरापहं ॥ ५८ ॥ ॥ दाडिमाष्टकं ॥ ॥ दाडिमस्य पलान्यष्टौ शर्करायाः पला
ष्टकं ॥ पिप्पली पिप्पलीमूलं यवानी मरिचं तथा ॥ ५९ ॥ धान्यकं जीरकं शुंठी प्रत्येकं पल
संमितं ॥ कर्षमात्रा तुगाक्षीरी त्वक्पत्रैलाश्च केसरं ॥ ६० ॥ प्रत्येकं कोलमात्रा स्युस्तच्चू
र्णं दाडिमादिकं ॥ अतिसारं क्षयं गुल्मं संग्रहणीं च गलग्रहं ॥ ६१ ॥ मंदाग्नी पीनसं कासं चू

शु र्णमेतद्व्यपोहति ॥ वृद्धदाडिमादिकं ॥ ॥ लवंगं [illegible] कर्पूरमेलात्वक् नागकेसरं ॥
जातीफलमुशीरं च नागरं कृष्णजीरकं ॥ ६२ ॥ कृष्णागरु लवक्षीरी मांसी नीलोत्पलं कृ
ष्णा ॥ तगरं चंदनं वालं कंकोलं चेति चूर्णयेत् ॥ ६३ ॥ समभागानि सर्वाणि सर्वेभ्यो धासि

४७

नाभवेत्॥ लवंगाद्यमिदं चूर्णं राजार्हं वह्निदीपनं॥६४॥ रोचनं तर्पणं वृष्यं त्रिदोषघ्नं ब
लप्रदं॥ हृद्रोगं कंठरोगं च कासं हिक्कां च पीनसं॥६५॥ यक्ष्माणं तमकश्वासमतिसारमथः
क्षतं॥ प्रमेहारुचिगुल्मादीन् ग्रहणीमपि नाशयेत्॥६६॥ लवंगाद्यं चूर्णं॥ ॥ कर्पूरं चोच
कं कोलजातीफलदलाः समाः॥ लवंगनागमरिचकृष्णाशुंठीविवर्द्धिताः॥६७॥ चूर्णं सि
तासमं ग्राह्यं रोचनं क्षयकासजित्॥ वैस्वर्यश्वासगुल्मार्शश्छर्दिकंठामयापहं॥६८॥
प्रयुक्तं चान्नपानेषु भिषजा रोगिणां हितं॥ कर्पूराद्यं चूर्णं॥ ॥ लवंगजातीफलपिप्पली
नां भागान् प्रकल्प्य क्रमभमानमेषां॥ पलार्धमेकं मरिचस्य दत्वा पलानि चत्वारि महौषध
स्य॥६९॥ सितासमं चूर्णमिदं प्रसह्य रोगानिमानाशु बलाद्विहंति॥ कासज्वरारोचक
हृद्गुल्मश्वासाग्निमांद्यग्रहणीप्रदोषान्॥७०॥ लघुलवंगाद्यं चूर्णं॥ ॥ जातीफलत्व
लवंगैलापत्रत्वक्नागकेसरैः॥ कर्पूरं चंदनं बिल्वं त्वक्क्षीरी तगरामलैः॥७१॥ तालीस
पिप्पलीपथ्यास्थूलजीरकचित्रकैः॥ शुंठीविडंगमरिचैः समभागानि चूर्णितैः॥७२॥

४७

96

पावंसमानि सर्वाणि कुर्यात् भागांश्च तावतां॥ सर्वचूर्णसमादेया शर्करा त्वभिषग्वरैः॥
॥७३॥ कर्षमात्रं ततः खादेत् मधुनाप्लावितं सुधी॥ अस्य प्रभावात् ग्रहणी कासश्वासा
रुचिक्षयाः॥७४॥ वातश्लेष्म प्रतिश्यायाः प्रशमं यांति वेगतः॥ जातीफलाद्यं चूर्णं॥ ॥
मरीचं नागपुष्पाणि तालीसं लवणानि च॥ प्रत्येकमेकभागास्युः पिप्पलीमूलचित्रकैः
॥७५॥ त्वक्कणाति तिंतिडीकं च जीरकं च द्विभागकं॥ धान्याम्लवेतसं विश्वं भद्रैला बदरा
णि च॥७६॥ अजमोदा जलधर प्रत्येकं च त्रिभागिकं॥ सर्वौषध चतुर्थांशं दाडिमस्य
फलं भवेत्॥७७॥ द्रव्येभ्योनि खिलेभ्यश्च सीतादेयार्धभागिकाः॥ महाखांडव संज्ञं
स्याच्चूर्णमेतत्सुरोचनं॥७८॥ अग्निदीपिकरं हृद्यं कासातीसारनाशनं॥ हृद्रोगकं
ठजठरमुखरोगविनाशनं॥७९॥ विसूचिकानाहाध्मानमर्शोगुल्मकृमीनपि॥ छ
र्दिं पंचविधां श्वासं चूर्णमेतद्व्यपोहती॥८०॥ महाखंडकचूर्णं॥ ॥ चित्रकस्त्रिफला
अजमोदा जीरकं हपुषा वचा॥ जवानी पिप्पलीमूलं नागपुष्पा च गंधिका॥८१॥ अज

४८

मोदाशाठीधान्यंविडंगंस्थूलजीरकं॥हेमाह्वापौष्करंमूलंक्षारौलवणपंचकं॥८१॥
कुष्ठंचेतिसमांशानिविशालाचद्विभागिकः॥त्रिवृत्त्रिभागादिशेयादंत्याभागत्रयंभवे
त्॥८२॥चतुर्भागापिप्पलीस्यात्सर्वाण्येकत्रचूर्णयेत्॥पाचनस्नेहनाद्यैश्चस्नि
ग्धकोष्टस्यरोगिणः॥८४॥दद्याच्चूर्णविरेकायसर्वरोगप्रणाशनं॥हृद्रोगेपांडुरो
गेचकासेश्वासेभगंदरे॥८५॥मंदाग्नौचज्वरेकुष्ठेग्रहण्यांचगलग्रहे॥दद्याद्युक्त्या
नुपानेनतथाध्मानेसुरादिभिः॥८६॥गुल्मेबदरनीरेणविट्संगेदधिमस्तुना॥उ
ष्णांबुभिरजीर्णेचवृक्षाम्लैःपरिकर्तिषु॥८७॥उष्ट्रदुग्धेनोदरेषुतथातक्रेणवागवां
॥प्रसन्नयावातरोगेदाडिमांभोभिरर्शसि॥८८॥विविधेचविषेदद्यात्घृतेनविष
नाशनं॥चूर्णंनारायणंनामदुष्टरोगगणापहं॥८९॥ ॥नारायणचूर्णं॥ ॥हपुषा
त्रिफलाचैवत्रायमाणाचपिप्पली॥हेमक्षीरीत्रिवृच्चैवसातलाकटुकीवचा॥९०॥
निलिनीसैंधवंकृष्णालवणंचेतिचूर्णयेत्॥उष्णोदकेनमूत्रेणदाडिमत्रिफलार

४८

सेः॥ तथामांसीरसे नापि यथायोग्यं पिबेन्नरः॥ अजीर्णप्लीहगुल्मेषु शोफार्शोविषमाग्निषु॥१२॥ हलीमकामलापांडुकुष्ठाध्मानोदरेष्वपि॥ ॥हपुषाद्यं चूर्णं॥ ॥
सुंठी हरीतकी कृष्णा त्रिवृत्सौवर्चलं तथा॥ समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत्॥ ज्ञेयं पंचसमं चूर्णमेतत् शूलहरं परं॥ आध्मानजठरार्शोघ्नं आमवातहरं परं॥१४॥ ॥पंचसमं चूर्णं॥ ॥कर्षमात्रा भवेत् कृष्णा त्रिवृत् गात्स्या सलोन्मिता॥ खंडा सलं च विज्ञेयं चूर्णमेकत्र कारयेत्॥१५॥ कर्षो न्मितं लिहेद्देनं तत्सोद्ग्रणाध्मान नाशनं॥ गाढाविट्कोदरं कफानुपित्तं शूलानि नाशयेत्॥१६॥ ॥नारायण चूर्णं॥ ॥
लवण त्रितयं क्षारो द्वा नपुष्पाह्व पंचकं चाप्यजमोदाग्निगंधा च हपुषा जीरकद्वयं॥१७॥ मरिचं पिप्पलीमूलं पिप्पली गजपिप्पली॥ हिंगुश्च हिंगुपत्री च सठी पाठोपकुंचिका॥१८॥ सुंठी चित्रकचव्यानि विडंगं चाम्लवेतसं॥ दाडिमं तित्तिडीकं च त्रिवृद्दंतीशातावरी॥१९॥ इंद्रवारुणिका भार्गी देवदारु यवानिका॥ कुस्तुंबुरुसंबुरुणि

४२

पोष्करं ॥ बदराणि च ॥ ९०० ॥ शिवा चेति समांशानां चूर्णमेकत्र कारयेत् ॥ भावये
दार्द्रकरसे बीजपूररसेन तथा ॥ १ ॥ तसिबेत्सपिषाजीर्णे मद्येनोष्णोदके न वा ॥ को
लांभसा वा तक्रेण दुग्धेनोष्णेन मस्तुना ॥ २ ॥ पक्वसीहकरी [?] शूलगुदकुक्षिहृदा
मयान् ॥ अर्शोविष्टंभमंदाग्निगुल्मष्ठीलोदराणि च ॥ ३ ॥ हिक्काध्मानश्वास
कासान् जयेदेतन्न संशयः ॥ एतैरेवौषधैः सम्यक् घृतं वा साधयेत्सुधीः ॥ ४ ॥ ॥
त्रिफलाद्यं चूर्णं ॥ ॥ तुंबुरूणि त्रिलवणं यवानी पुष्कराह्वयं ॥ यवक्षाराभया हिंगु
विडंगानि समानि च ॥ ५ ॥ त्रिवृत्त्रिभागा विज्ञेया सूक्ष्मचूर्णानि कारयेत् ॥ पिबेदु
ष्णेन तोयेन यवक्वाथेन वा पिबेत् ॥ ६ ॥ जयेत्सर्वाणि शूलानि गुल्माध्मानोदराणि
च ॥ ॥ तुंबुराद्यं चूर्णं ॥ ॥ चित्रको नागरं हिंगु पिप्पली पिप्पलीजटा ॥ चव्याजमो
दा मरिचं प्रत्येकं कर्षसंमितं ॥ ७ ॥ सर्जिका च यवक्षारः सिंधु सौवर्चलं बिडं ॥ सा
मुद्रिकं रोमकं च कालमात्राणि कारयेत् ॥ ८ ॥ एकीकृत्सा विलं [?] चूर्णं भावयेन्मातुलिं

४२

९१

गकैः॥ रसो दाडिममज्जे वा पिशोषयेदातपेन च॥९॥ एतच्चूर्णं जयेद्गुल्मं ग्रहणीमामजां

रुजं॥ अग्निं च कुरुते दीप्तं रुचिकृत्कफनाशनं॥१०॥ ॥चित्रकाद्यं चूर्णं॥ ॥सैंधवं पि

प्पलीमूलं पिप्पली चव्य चित्रकं॥ सुंठी हरीतकी चेति क्रमवृद्धानि कारयेत्॥११॥ वड

वानलनामैतच्चूर्णं स्यादग्निवर्धनं॥ ॥वडवानलं चूर्णं॥ ॥मरिचं चेति कर्षांशं प्रसे

कं कारयेद्बुधः॥ कर्षास्तु पंच पथ्यायाद्दशास्युर्वृद्धदारुकान्॥ नागराच्च दशैव स्युः

सर्वाण्येकत्र चूर्णयेत्॥ पिबेदुष्णं जलेनैव तच्चूर्णं श्वयथुनाशनां॥१३॥ आमवा

तरुजं हन्ति सं धि पीडां च गृध्रसीं॥ कटिपृष्ठगुदस्थां च जंघयोश्च रुजं जयेत्॥१४॥

तूनीमृतूनी विश्वाचि कफवातामयान् जयेत्॥ समेन वा गुडेनाथ वटकान्कारयेत्सु

धीः॥१५॥ ॥अजमोदाद्यं चूर्णं॥ ॥हिंगु पाठाभया धान्यं दाडिमं चित्रकं सठी

॥अजमोदा त्रिकटुकं हपुषा चाम्लवेतसः॥१६॥ अजगंधाति निडीकं जीरकं पोष्क

रं वचा॥ चव्यं क्षारद्वयं पंच लवणानि च चूर्णयेत्॥१७॥ प्राक् भोजनस्य मध्ये वा

५०

चूर्णमेतत्प्रयोजयेत्॥ पिबेद्वाजीर्णमद्येन तक्रेणोष्णोदकेन वा॥१८॥ गुल्मे वात
कफोद्भूते हृद्रोगे प्लीहिवासु च॥ हृद्बस्ति पार्श्वशूलेषु शूलेषु गुदयोनिजे॥१९॥ मूत्रकृ
च्छ्रे तथानाहे पांडुरोगे रुचौ तथा॥ हिक्कायां तु यकृत्प्लीहकासश्वासे गलग्रहे॥२०॥ ग्रहण्य
र्शोविकारेषु चूर्णमेतत्प्रशस्यते॥ भावितं मातुलिंगस्य बहुशः स्वरसेन वा॥२१॥ कुर्या
च्चगुटिकाबह्वी वातश्लेष्मामयापहाः॥ ॥हिंग्वाद्यं चूर्णं॥ ॥यवानीदाडिमं शुंठी
तिंतिडीकाम्लवेतसौ॥ बदराम्लं च कुर्वीत चतुःशाणमितानि च॥२२॥ सार्धद्विशा
णं मरिचं पिप्पलीदशशाणिका॥ त्वक् सौवर्चलं धान्याकं जीरकं च द्विशाणकं॥२३॥
चतुःषष्टिमितैः शाणैः शर्करामत्र योजयेत्॥ चूर्णितं सर्वमेकत्र यावजी खांडवाभि
धं॥ चूर्णं जयेत्पांडुरोगं हृद्रोगं ग्रहणीज्वरं॥२४॥ छर्दिशोषातिसारं च प्लीहानाह
विबंधता॥ अरुचीशूलमंदाग्निअर्शोजिह्वागलामयान्॥२५॥ ॥यवानीखांड
वचूर्णं॥ ॥तालीसं मरिचं शुंठी पिप्पली वंशलोचना॥ एकद्वित्रिचतुःपंचकर्षैर्भा

५०

गान्ध्रकल्पयेत् ॥ २६ ॥ एलात्वचोस्तु कर्षार्धं प्रत्येकं भागमानयेत् ॥ द्वात्रिंशत्कर्षतु
लितां प्रदेयां शर्करां बुधैः ॥ २७ ॥ तालीसाद्यमिदं चूर्णं रोचनं पाचनं परं ॥ कासश्वासज्व
रहरं छर्द्यतीसारनाशनं ॥ २८ ॥ शोषाध्मानहरं प्लीहग्रहणीपांडुरोगजित् ॥ पक्त्वा वा श
र्करां चूर्णं क्षिपेत्स्यात् गुटिकागणः ॥ २९ ॥ ॥ तालीसाद्यं चूर्णं ॥ ॥ शीतोपलात्षोडशांशस्या
दष्टौ स्याद्वंशलोचना ॥ पिप्पलीस्याच्चतुःकर्षा स्यादेलात्वग्द्विकर्षिका ॥ ३० ॥ एककर्षत्व
कार्यं चूर्णयेत्सर्वमेकतः ॥ सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत् ॥ ३१ ॥ कासश्वास
क्षयहरं हस्तपादांगदाहजित् ॥ मंदाग्निं सुप्तजिह्वं पार्श्वशूलमरोचकं ॥ ३२ ॥ ॥ सी
तोपलाद्यं चूर्णं ॥ ॥ सामुद्रलवणं कार्यं अष्टकर्षमितं बुधैः ॥ पंचसौवर्चलं ग्राह्यं
बिडसैंधवधान्यकः ॥ ३३ ॥ पिप्पली पिप्पलीमूलं कृष्णजीरकपत्रकं ॥ नागकेसर
तालीसमम्लवेतसकं तथा ॥ ३४ ॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ॥ म
रीचं जीरकं विश्वमेकैकं कर्षमात्रकं ॥ ३५ ॥ दाडिमं स्याच्चतुःकर्षं त्वगेला चार्धका

।र्णिके॥ एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधं॥३६॥ बीजपूररसेनैव भावितं स
प्तवारकं॥ चूर्णप्रमाणं देयं तु मस्तुतक्रसुरासवैः॥३७॥ वातश्लेष्मभवं गुल्मं प्लीहा
नमुदरं क्षयं॥ अर्शांसि ग्रहणी कुष्ठं विबंधं च भगंदरं॥३८॥ शोफं शूलं श्वासकासमाम
दोषं च हृद्रुजं॥ मंदाग्निं नाशयेत्सद्यो दीपनं पाचनं परं॥३९॥ सर्वलोकहितार्थाय भास्क
रेणोदितं पुरा॥ ॥भास्करलवणं॥ ॥एलाप्रियंगुमुस्तानि कोलमज्जा च पिप्पली
॥श्रीचंदनं तथा लाजा लवंगं नागकेसरं॥४०॥ एतच्चूर्णीकृतं सर्वं सिताक्षौद्रयुतं
लिहेत्॥ वातपित्तकफोद्भूतां छर्दिं हिंसति वेगतः॥४१॥ ॥एलादि चूर्णं॥ ॥मूलं
पुष्पं फलं पत्रं त्वचं निंबात्समाहरेत्॥ सूक्ष्मचूर्णमिदं कुर्यात्भागैः पंचदशोन्मितैः
॥४२॥ लोहभस्म हरीतक्यो चक्रमर्दकचित्रकौ॥ भल्लातकं विडंगानि शर्करामलकं
निशा॥४३॥ पिप्पली मरिचं शुंठी बाकुची कृतमालका॥ गोक्षुरश्चोपलोन्मानमेकैकं
कारयेद्बुधः॥४४॥ सर्वमेकीकृतं चूर्णं भृंगराजेन भावितं॥ अष्टभागावशेषेण खदिरास

गा

नवारिणः॥४५॥भावयित्वातुसंशुष्कंकर्षमात्रंनरःपिबेत्॥खदिरासनतोये
नसर्पिषापयसाऽथवा॥४६॥मासेनसर्वकुष्ठानिविनिहंतिरसायनं॥पंचनिंबमि
दंचूर्णंसर्वरोगविनाशनं॥४७॥ ॥पंचनिंबचूर्णं॥ ॥शतावरीगोक्षुरस्यबीजं
चकपिकच्छुजं॥गांगेरुकीचातिबलाबीजंगोक्षुरकोद्भवं॥४८॥चूर्णितंसर्वमेक
त्रगोदुग्धेनपिबेन्निशि॥नतृप्तिंयातिनारीभिर्नरश्चूर्णप्रभावतः॥४९॥ ॥
पुष्टिकारकचूर्णं॥ ॥अश्वगंधादशपलातन्मात्रोवृद्धदारुकः॥चूर्णीकृत्याभयं
विद्धान्घृतभांडेनिधापयेत्॥५०॥कर्षैकंपयसापीत्वानारीभिर्नैवतृप्यति॥अं
गवांप्रमदाभूयाद्वलीपलितवर्जितः॥५१॥ ॥अश्वगंधादिचूर्णं॥ ॥चित्रकंत्रि
फलामुस्तंविडंगंत्र्यूषणानिच॥समभागानिसर्वाणिनवभागागुडापसः॥५२॥
एतदेकीकृतंचूर्णंमधुसर्पिर्युतंलिहेत्॥गोमूत्रमथवातक्रमनुपानेप्रशस्यते॥५३॥
पांडुरोगंजयत्युग्रंहृद्रोगंचभगंदरं॥शोथकुष्ठोदरार्शांसिमंदाग्निमरुचिंकृमीन्॥५४॥

॥ ॥ नवायसं चूर्णं॥ ॥आकारकरभः शुंठीकं कोलं कुंकुमं कणा॥ जातीफलं लवं
गं च चंदनं चेति कार्षिकं॥५५॥ चूर्णानि मांस्ततः कुर्यादहिफेनं पलोन्मितं॥ सर्वमेकी
कृतं सूक्ष्मं माषैकं मधुना लिहेत्॥५६॥ शुक्रस्तंभकरं चूर्णं पुंसामानंदकारकं॥
नारीणां प्रीतिजननं सेवेत निशि कामुकः॥५७॥ ॥करभादिचूर्णं॥ ॥इति श्री
दामो॰ शार्ं॰ वि॰ चि॰ चूर्णकल्पनाध्यायः॥ ॥वटकाश्चाथ कथ्यंते तन्नामगु
टिका वटी॥ मोदको वटिका पिंडी गुडो वर्तिस्तथोच्यते॥५८॥ लेहवत्साध्यते वह्नौ गु
डो वा शर्करा तथा॥ गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी॥५९॥ कुर्यादवह्निसि
द्धेन क्वचिद्गुग्गुलुना वटी॥ द्रवेन मधुना वापि गुटिकां कारयेद् बुधः॥६०॥ सिता चतुर्गुणा
देया वटीषु द्विगुणो गुडः॥ चूर्णे चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समं॥६१॥ द्रवं च
द्विगुणं देयं मोदकेषु भिषग्वरैः॥ कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रयोजयेत्॥६२॥ ॥
सप्तथा॥ ॥इंद्रवारुणिका मुस्तं शुंठी दंती हरीतकी॥ त्रिवृत्सटी विडंगानि गोक्षुर

५२

॥चित्रक स्तथा॥६३॥तेजोह्वाच द्विपौंके शिष्टपकं द्रव्याणिकारयेत्॥ सूरणस्य पलानि अष्टौ वृद्धदारुश्चतुःपलं॥६४॥चतुःपलस्याद्भल्लातं क्वाथयेत्सर्वमेकतः॥जलं द्रोणं चतुर्थांशं गृह्णीयात्क्वाथमुत्तमं॥६५॥क्वाथद्रव्यात्रिगुणितं गुडं क्षिप्त्वा पुनः पचेत्॥सम्यक्पक्वं च तज्ज्ञात्वा चूर्णान्येतानि दापयेत्॥६६॥चित्रकस्त्रिवृत्तादंती तेजोवा पलिकाः पृथक्॥पृथक्त्रिपलिका कार्या गजेला मरिचं त्वचः॥६७॥निक्षिपेन्मधु शीते तत्र तस्मिन्प्रस्थप्रमाणितं॥एवं सिद्धो भवेत् श्रीमान् बहुशालगुडः शुभः॥६८॥जयेद्दशांसि सर्वाणि गुल्मवातोदरं तथा॥आमवातप्रतिश्यायग्रहणीक्षयपीनसान्॥६९॥हलीमकं पांडुरोगं प्रमेहं च रसायनं॥ ॥अथ बहुशालो गुडः॥ ॥मरीचीकर्षमात्रं स्यात्पिप्पली कर्षसंमिता॥अर्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमं॥७०॥एतच्चूर्णीकृतं युंज्यादष्टकर्षगुडेन हि॥शाणप्रमाणं गुटिकां कृत्वा वक्त्रे विधारयेत्॥७१॥अस्य प्रभावात्सर्वेपि कासा यांति सेव संक्षयं॥ ॥

५२

मरीचादिगुटिका॥ ॥गुडशुंठीशिवामुस्तैर्धारयेद्गुटिकांमुखे॥ श्वासकासेषुस
र्वेषु विभीतं वापि केवलं॥७२॥ ॥गुडादिगुटिका॥ ॥आमलकंमरीचं कुष्ठं लाजा
श्च वटरोहकं॥ एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे॥७३॥ तृष्णाप्रवृद्धांह
रेत्तेषां मुखशोषं च दारुणं॥ ॥आमलक्यादिगुटिका॥ ॥विडंगं नागरं कृष्णाप
थ्यामलविभीतकाः॥ वचागुडूचीभल्लातं सविषं चापि योजयेत्॥७४॥ एतानि
समभागानि गोमूत्रेण च पेषयेत्॥ गुंजाभावटिकां कुर्याद्द्याद्वार्द्रकजैरसैः॥ एकाम
जीर्णयुक्तस्य द्वे विसूच्यां च दापयेत्॥ तिस्रश्च सर्पदष्टस्य चतस्रः सन्निपातिनः॥ गु
टिका जीवनी नाम्ना संजीवयति मानवं॥७६॥ ॥संजीवनीगुटिका॥ ॥व्योषाम्ल
वेतसं चव्यं तालीसं चित्रकं तथा॥ जीरकं तिंतिडीकं च प्रत्येकं कर्षभागिकं॥७७॥ त्रि
सुगंधं त्रिशाणं स्यात् गुडस्यात् कर्षविंशतिः॥ व्योषादिगुटिका कासपीनसश्वासका
सजित्॥७८॥ रुचिस्वरकरा ख्याता प्रतिश्यायप्रणाशनी॥ ॥व्योषादिगुटिका॥ ॥८

५२

आमेषु सगुडां शुंठीमजीर्णे गुडपिप्पलीं ॥ कृच्छ्रे जीरगुडं दद्यादर्शःसु च गुडाभया ॥ ७९ ॥

॥ ॥गुडचतुष्टयगुटिका ॥ अथ वृद्धदारुकमोदकः ॥ वृद्धदारुकभल्लातसुंठीचूर्णेन योजितः ॥ ८० ॥ मोदकः सगुडो हन्यात्षड्विधार्शः कृतां रुजां ॥ ॥वृद्धदारुकमोदकः ॥

॥ ॥शुष्कसूरणचूर्णस्य भागान्द्वात्रिंशदाहरेत् ॥ भागान् षोडश चित्रस्य शुंठीभागचतुष्टयं ॥ ८१ ॥ द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत् ॥ गुडेन पिंडिकां कुर्याद्दुर्नाम्नां नासिकां परां ॥ ८२ ॥ सूरणपिंडी ॥ ॥ ॥सूरणो देवदारुश्च भागैः षोडशभिः पृथक् ॥ मुसली चित्रको ज्ञेयो वष्टभागमितो पृथक् ॥ ८३ ॥ शिवा बिभीतकौ धात्री विडंगं नागरं कणा ॥ भल्लातः पिप्पलीमूलं नाली संच पृथक् पृथक् ॥ ८४ ॥ चतुर्भागप्रमाणानि त्वगेलामरिचं तथा ॥ द्विभागमात्राणि पृथक् सर्वमेकत्र चूर्णयेत् ॥ द्विगुणेन गुडेनाथ मोदकान्कारयेद्बुधः ॥ प्रबलाग्निकराश्चैन तथाशौनाशनाः पराः ॥ ८६ ॥ ग्रहणी वातकफजां श्वासकासक्षयापहं ॥ प्लीहानं श्लीपदं शोथं हिक्कामे

५४

हंभगंदरं ॥८७॥ निहन्युः पलितं वृष्यास्तथा मेध्या रसायनः ॥ ॥ सूरणवटिका ॥ ॥ त्रिफला त्र्यूषणं चव्यं पिप्पलीमूलचित्रको ॥ दारुमाक्षिकधातुश्च स्तब्धदार्वी मुस्तं विडंगकं ॥८८॥ प्रत्येकं कर्षमात्राणि सर्वं द्विगुणितं तथा ॥ मंडूरं चूर्णयित्वा सर्वं गोमूत्रेऽष्टगुणे क्षिपेत् ॥८९॥ पक्त्वा च वटकान् कृत्वा रोहीतकानुपानतः ॥ कामलापांडुमेहार्शः शोथकुष्ठकफामयान् ॥९०॥ ऊरुस्तंभमजीर्णं च प्लीहानं नाशयत्यपि ॥ ॥ मंडूरवटकाः ॥ ॥ चंद्रप्रभा वचा मुस्ता भूनिंबामरदारु च ॥ हरिद्रातिविषा दार्वी पिप्पलीमूलचित्रको ॥९१॥ धान्याकं त्रिफला चव्यं विडंगं गजपिप्पली ॥ व्योषमाक्षिकधातुश्च द्वौ क्षारौ लवणत्रयं ॥९२॥ एतानि शाणमात्राणि प्रत्येकं कारयेद् बुधः ॥ त्रिवृद्दंती पत्रकं च त्वगेला वंशलोचनं ॥९३॥ प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान् ॥ द्विकर्षं हतलोहं स्याच्चतुःकर्षा सिता भवेत् ॥९४॥ शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ॥ एभिरेकत्र संक्षुण्णैः कर्तव्या गुटिका शुभा ॥९५॥

णा

५४

चंद्रप्रभेति विख्याता सर्वरोगविनाशनी॥ प्रमेहान्विंशतिः कृच्छ्रं मूत्रघातं तथाश्मरीं॥
॥९६॥ विबंधानाहशूलानि मेहनं ग्रंथिमर्बुदं॥ अंडवृद्धिं करीशूलं कासश्वासं विशू
चिकां॥९७॥ कुष्टानि रक्तसां कंडूं प्लीहोदर भगंदरं॥ नेत्ररोगं दंतरोगं स्त्रीणामार्तवजां
रुजां॥ पुंसानशुक्रगतान्रोगान् मंदाग्निमरुचिं तथा॥ वायुपित्तकफान् हन्याद्बल्या
वृष्या रसायनी॥९९॥ चंद्रप्रभावां कर्षस्तु चतुःशाणा विधीयते॥१००॥ ॥चंद्र
प्रभागुटिका॥ ॥पथ्यानीजीरकं धान्यं मरीचं गिरिकर्णिका॥ अजमोदोपकुंचीच्च
तुःशाणाः पृथक् पृथक्॥१॥ हिंगुषट्शाणिकं कार्यं क्षारो लवणपंचकं॥ त्रिवृदष्टमि
तैः शाणैः प्रत्येकं कल्पयेत्सुधीः॥ दंती शठी पौष्करं च विडंगं दाडिमं शिवा॥ चित्रोम्ल
वेतसः शुंठी शाणैः षोडशभिः पृथक्॥३॥ बीजपूररसेनैषां गुटिकां कारयेत्सुधीः॥
घृतेन पायसा मद्येरम्लेरुष्णोदकेन वा॥४॥ पिबेत्काकापनत्रोक्तां गुटिकां गुल्म
नाशनी॥ मद्येन वातिकं गुल्मं गोक्षीरेण च पैत्तिकं॥५॥ मूत्रेण कफगुल्मं च दश

५५ दो

मूलेस्त्रियोपाजैः॥ ७ चूर्णदुग्धेन नारीणां रक्तगुल्मं निवारयेत्॥ ६॥ हृद्रोगं ग्रहणीशूलं कृमीन् अर्शांसि नाशयेत्॥ ॥ कांकायनगुटिका॥ ॥ नागरं पिप्पली मूलं पिप्पली च व्याघ्रिचित्रकं॥ भृष्टहिंग्व जमोदा च सर्षपा जीरकद्वयं॥ ७॥ रेणुकेंद्रयवा पाठा विडंगं गजपिप्पली॥ कटुका तिविषा भार्गी विचाम्लवेतिभागतः॥ ८॥ प्रसेकं चूर्णानि कार्णिस्युर्द्रव्याणि मानविंशतिः॥ द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत्॥ ९॥ एभिश्चूर्णीकृतैः सर्वैः समो देयस्तु गुग्गुलुः॥ एकं पिंडं ततः कृत्वा धारयेत् घृतभाजने॥ १०॥ गुटिकाः शाणमात्रास्तु कृत्वा ग्राह्या यथोचितः॥ गुग्गुलुः सेगिराजोयं त्रिदोषघ्नो रसायनः॥ ११॥ मैथुनाहारपानानां नियमं चैवात्र कारयेत्॥ सर्वान्वातामयान्कुष्टमर्शांसि ग्रहणीगदं॥ १२॥ प्रमेहवातरक्तं च नाभिशूलं भगंदरं॥ उदावर्तं क्षयं गुल्ममपस्मारं मुखग्रहं॥ १३॥ मंदाग्निश्वासकासांश्च नाशयेदरुचिं तथा॥ रेतोदोषहरं पुंसां रजोदोषहरस्त्रियः॥ १४॥ पुंसामपत्यजनको वंध्यानां गर्भदस्तथा॥ रास्ना

५५

दिक्काथसहितो विबंधं हंति मारुतं ॥१५॥ काकोल्यादिसृतासिक्तं कफमारग्वधादि
ना॥ दार्वीसृतं प्रमेहांश्च गोमूत्रेण च पांडुतां ॥१६॥ मेदोवृद्धिं च मधुना कुष्ठं निंबसृते
न च॥ छिन्नाकाथेन वातास्रं शोथं मूलककाश्रुतान् ॥१७॥ पाटलीक्वाथसहितो विषम्
षकं जयेत्॥ त्रिफलाक्वाथसहितो नेत्रार्तिहं निराकृणं ॥१८॥ पुनर्नवादेः क्वाथेन हन्या
त्सर्वोदराणि च॥ ॥इति योगराजगुग्गुलुः॥ ॥त्रिफलायाः त्रयप्रस्थाः प्रस्थैकम
मृताभवेत्॥ संक्षुद्य लोहपात्रेण सार्धद्रोणांभसा पचेत् ॥१९॥ जलमर्धं सृतं ज्ञात्वा
गृहीयाद्वस्त्रगालितं॥ ततः क्वाथे क्षिपेच्छुद्धं गुग्गुलं प्रस्थसंमितं ॥२०॥ पुनः पचेद
यःपात्रे दर्व्या संघट्टयेन्मुहुः॥ सांद्रीभूतं च तज्ज्ञात्वा गुडपाकसमाकृतिं॥२१॥ चूर्णीकृ
तान्ततस्तत्र द्रव्याणीमानि निक्षिपेत्॥ त्रिफला द्विपला ज्ञेया गुडूची पलिका मता ॥२२॥
षडक्षं त्र्यूषणं प्रोक्तं विडंगानां पलार्धकं॥ दंती कर्षमिता कार्या त्रिवृत्कर्षमिता स्मृता॥
॥२३॥ ततः पिंडीकृतं सर्वं घृतपात्रे विनिक्षिपेत्॥ गुटिकां त्राणि कांकृताभुज्याद्दोषा

५६

धुपेक्षया ॥ २४ ॥ अनुपानं भिषक्कुर्द्यात् कोष्णं नीरं पयोऽथवा ॥ मंजिष्ठादिरसं तं वापि यु
क्तिः युक्तमतः परं ॥ २५ ॥ जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजं ॥ सर्वव्रणान् गुल्मांश्च
प्रमेहपिटिकास्तथा ॥ २६ ॥ प्रमेहोदरमंदाग्निकासश्वयथुपांडुता ॥ हंति सर्वामयानि
सम्यक्प्रयुक्तो रसायनः ॥ २७ ॥ कैशोरकाभिधानोऽयं गुग्गुलुः कांतिकारकः ॥ वासादि
नानेत्रगदान् गुल्मादीन्व्रणादिनो ॥ २८ ॥ क्वाथेन खदिरस्यापि तृणां कुष्ठानि नाशा
येत् ॥ अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपं ॥ २९ ॥ मद्यं रोषं संत्यजेत्सम्यक् गुणार्थी पु
रसेवकः ॥ ॥ कैशोरगुग्गुलुः ॥ ॥ त्रिफलं त्रिफलाचूर्णं कृष्णाचूर्णपलोन्मितं ॥ गु
ग्गुलः पंचपलिकः क्षौद्रयुतः समेककृतः ॥ ३० ॥ ततस्तु गुटिकां कृत्वा प्रयुंज्यात् वह्न्यपेक्षया
॥ भगंदरं गुल्मशोथमर्शांसि च विनाशयेत् ॥ ३१ ॥ ॥ त्रिफलागुग्गुलुः ॥ ॥ अष्टावि
शतिसंख्यानि पलान्यानीय गोक्षुरे ॥ पचेदष्टगुणे नीरे क्वाथार्धावशेषितः ॥ ३२ ॥
ततः पुनः पचेत्तत्र पुरं सप्त पलं क्षिपेत् ॥ गुडपाकसमाकारं ज्ञात्वा तं तत्र निक्षिपेत् ॥ ३३ ॥ ५६

त्रिकटु त्रिफलामुस्तं चूर्णितं पलसप्तकं ॥ ततः पिंडीकृतं स्यास्य गुटिकामुपयोजयेत् ॥

॥ ३४ ॥ हन्यास्त्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकं ॥ वातास्त्रं वातरोगाश्च भुक्तदोषं तथाश्मरीं ॥

॥ ३५ ॥ ॥ गोक्षुरादिगुटिका ॥ ॥ त्रिफलाष्टपला कार्याभिल्लातकचतुःपलं ॥ बाकुची

पंचपलिका विडंगानां चतुःपलं ॥ ३६ ॥ हतं लोहं त्रि [illegible] कं चैव गुग्गुलुश्च शिलाजतुः ॥

एकैकं पलमात्रं स्यात्सल्लार्धं पौष्करं भवेत् ॥ ३७ ॥ चित्रकस्य पलार्धं स्यात् हिंगुणां मरि

चं भवेत् ॥ नागरं पिप्पली मुस्तं त्वगेलापत्रकुंकुमं ॥ ३८ ॥ ज्ञात्वाग्निं तं स्यादेकैकं चूर्णयेत्स

र्वमेकतः ॥ ततस्तु प्रक्षिपेच्चूर्णं पक्वं खंडं च तत्समं ॥ ३९ ॥ मोदकान् पालिकान् कृत्वा प्रयुं

जीत यथाग्निं ॥ हन्युः सर्वाणि कुष्ठानि त्रिदोषप्रभवान्यपि ॥ ४० ॥ भगंदरं प्लीहगुल्मा

न् द्विहालुं तोगलामयान् ॥ त्रीन् सिध्मगतान् रोगानन्यानपि दृष्टगदाननपी ॥ ४१ ॥ प्रा

कुभोजनं त्याः परिग्यात्याम् मूर्ध्वजत्रुगदेषु च ॥ ॥ त्रिफलामोदकः ॥ ॥ कांचनार

त्वचोग्रात्यं पल विंशतिकं बुधैः ॥ त्रिकटु द्वादशपलं त्रिफला षट्पला भवेत् ॥ ४२ ॥ प

५७

दैकेको वरुणः कार्यएरंडाप्त कृपत्रकं तथा ॥ एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चूर्णयेत्
॥४३॥ यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः ॥ संचूर्ण्य सर्वमेकत्र पिंडं कृत्वा च धा
रयेत् ॥४४॥ गुटिकाः शाणिकाः कृत्वा प्रातर्ग्राह्या पयोचिता ॥ गंडमालां जयत्युग्राम प
चीमर्बुदानि च ॥४५॥ ग्रंथीन्व्रणानि गुल्मांश्च कुष्ठानि च भगंदरं ॥ प्रदेयमनुपानार्थं
क्वाथो मुंडितिकाभवः ॥४६॥ वा ॥ क्वाथः खदिरसारस्य पथ्याक्वाथोथवोष्णकं ॥ ॥
कांचनारगुग्गुलुः ॥ ॥ निस्तुषं माषचूर्णं स्यात्तथा गोधूमसंभवं ॥ निस्तुषं पव
चूर्णं च शालितंदुलजं तथा ॥४७॥ सूक्ष्मं च पिप्पलीचूर्णं पलिकान्युपकल्पयेत् ॥ तत
एकीकृतं सर्वं भर्जयेद्घृतेन च ॥४८॥ अर्धमात्रेण सर्वेभ्यस्ततः खंडं समं क्षिपेत् ॥ ज
लं च द्विगुणं कृत्वा पाचयेच्च शनैः शनैः ॥४९॥ ततः पक्वं समुद्धृत्य कृत्वान्कुर्वीत मोदकान्
॥ चुक्रासायं पलैकं च पिबेत्क्षीरं चतुर्गुणं ॥५०॥ वर्जनीयो विशेषेण क्षाराम्लौ क्षारसाव
पि ॥ कृतेवं रमयेन्नारीं बह्वीं न क्षियते नरः ॥५१॥ ॥ माषादिमोदकं ॥ ॥ इति श्री दामो॰ ५७

शा॰ दि॰ चि॰ ॥ सास्थानेवटककल्पनाध्यायः॥ ॥ ॥ क्वाथादेर्यत्पुनः पा
कात्घनत्वं सा रसक्रिया॥ सोवलेहश्च लेहश्च तन्मात्रास्यात्पलोन्मिता॥५२॥ सिता
चतुर्गुणा देया चूर्णाच्चद्विगुणोगुडः॥ द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः॥५३॥ सु
पक्वे तंतुमत्वं स्यादवलेहप्सु मज्जनं॥ स्थिरत्वं पीडने मुद्रा गंधवर्णरसोद्भवः॥५४॥ दु
ग्धमिक्षुरसं यूषं पंचमूलकषायकं॥ वासाक्वाथं यथा योग्यमनुपानं प्रशस्यते॥५५॥
॥ ॥सयथा॥ ॥कंटकारीतुलानीरे द्रोणे पक्त्वा कषायकः॥ पादशेषं गृहीत्वा तु त
स्मिन् चूर्णानि दापयेत्॥५६॥ पृथक् पलांशां संमितानि गुडूची चव्य चित्रकाः॥ मुस्तक
र्कटशृंगी च त्र्यूषणं धन्वयासकः॥५७॥ भार्गीरास्नासठीचैव शर्करा पलविंशतिः॥
प्रत्येकं च पलान्यष्टौ प्रदद्यात् घृततैलयोः॥५८॥ पक्वाले हवमानीयशीते मधुपला
ष्टकं॥ चतुःपलं तुगाक्षीर्याः पिप्पलीनां चतुःपलं॥५९॥ क्षिप्त्वा निदध्यात्सुदृढे मृ
न्मये भाजने शुभे॥ लेहोयं हंति हिक्कार्ति कासश्वासानशेषतः॥६०॥ ॥कंटकार्य
वलेहः॥ ॥पाटलारणिकाश्मर्य बिल्वारलुक गोक्षुराः॥ पर्णपाद्विहस्तोपिप्पल्योष्टं

गोद्राक्षामृताभयाः॥६१॥ बलाभूम्यामलीवासाऋद्धिजीवंतिकासठी॥ जीवकर्षभ
कौमुस्तं पौष्करकाकनाशिका॥६२॥ मुद्गपर्णीमाषपर्णी विदारी च पुनर्नवा॥ काकोली
कमलं मेदासूक्ष्मैलागुरुचंदनं॥६३॥ एकैकं पलमानं च स्थूलचूर्णितमौषधं॥ ए
कीकृत्य महलात्रेपं चामलशतानि च॥६४॥ निष्कुलीकृतकूष्मांडखंडास्पलशतं प
चेत्॥ निक्षिप्य द्विगुणानीरमर्धशिष्टं च गृह्यते॥६५॥ तानि कूष्मांडखंडानि पिंड
येद्दृढवाससा॥ आतपे शोषयेत्किंचित् छूलाग्रे बहुशो व्यधेत्॥६६॥ सिद्धा नाम्न क
टाहे च दद्दीमाष्टपलं घृतं॥ तेन किंचिन्मर्दयित्वा पूर्वोक्तं च जलं क्षिपेत्॥६७॥ खंडा
सत्वशतं दत्वा सर्वमेकत्र पाचयेत्॥ सुपक्वे पिप्पलीशुंठीजीरकाणां द्विपलं पृथक्॥
॥६८॥ पृथक् पलार्धं धान्याकपत्रैलामरिचत्वचः॥ चूर्णीकृत्य क्षिपेत्तत्र घृतार्धं क्षौ
द्रमावपेत्॥६९॥ खादेदग्निबलं दृष्ट्वा रक्तपित्ती ज्वरी क्षयी॥ शोषतृष्णातमःश्छर्दि
कासश्वासक्षतातुरः॥७०॥ कूष्मांडकावलेहोयं बालवृद्धेषु योजयेत्॥ उरःसंधान

५८

कृत् वृष्यो बृंहणो बलवृन्मतः ॥७१॥ ॥कूष्मांडकावलेहः॥ ॥युक्त्या कूष्मां
डखंडस्य सूरणं विपचेत्सुधीः ॥ अर्शसां मूढवातानां मंदाग्नीनां च युज्यते ॥७२॥
॥ ॥सूरणावलेहः॥ ॥हरीतकीत्रात्रंभ व्यंपवानामादकं तथा ॥ पलानि द्व्रा
मूलस्य विंशतिस्तु नियोजयेत् ॥७३॥ चित्रकः पिप्पलीमूलमपामार्गसठी तथा ॥
कपिकच्छू शंखपुष्पी भार्गी च गजपिप्पली ॥७४॥ बलापुष्करमूलं च पृथक्
द्वि पलमात्रया ॥ पचेत्संवाढकेनीरस्य वैः स्विन्नैः स्तनंनयेत् ॥७५॥ तच्चाभयाश
तं दद्यात् काथेतस्मिन्विचक्षणः ॥ सर्पिस्तैलाष्टपलकं क्षिपेद्गुडतुलां तथा ॥७६॥
पक्वालेहत्वमानीय सिद्धशीते पृथक् पृथक् ॥ क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया ॥७७॥
हरीतकीद्वयं खादेन्नेन लेहेन नित्यशः ॥ क्षयकासज्वरंश्वासंहिक्काशोरुचिपीनसा
न् ॥७८॥ ग्रहणीनाशायसषेवलीपलितनाशनः ॥ बलवर्णकरः पुंसामवलेहोर

५२

विहितोगस्त्यमुनिनासर्वरोगप्र[illegible]णाशनः॥ पादशेषः कषायो

सोपनः॥७९॥ अगस्त्यहरीतकी

अथ हरीतकीवृनागवाह्यो॥ ॥अगस्त्यहरीतक्या

त्रस्विन्नाचात्रहरीतकी॥८०॥ कषायंपादशेषंचग्र

वलेहः॥ ॥कुटजत्वक्तुलांद्रोणेजलस्यविपचेत्सुधीः॥

सांद्रत्वमागतंद्र

कीयाद्रस्त्रणालितं॥८१॥ त्रिंशत्पलंगुडस्यात्रदत्वाचविपचेत्पुनः॥ लज्जालु

छूर्णानिमानिनिक्षिपेत्॥८२॥ रसांजनंमोचरसंत्रिकटुत्रिफलांतथा॥ चवालकं॥

त्रिकटुपाठांबिल्वमिंद्रियवान्वचां॥८३॥ भल्लातकंप्रतिविषांविडंगानिचवालकं॥ कुटवंतथा॥

प्रत्येकंपलमात्रंचघृतस्यकुडवंतथा॥८४॥ सिद्धेशीतेततोरधान्मधुनःकुडवंतथा॥ तीसारमुरा

अयंदेषावलेहस्तुसर्वाण्यर्शांसिवेगतः॥८५॥ दुर्नामप्रभवान्रोगान्तीसारमुरा

ग्रहणीपांडुरोगंचरक्तपित्तंचकामलां॥८६॥ आम्लपित्तंतथाशोषंकार्श्यंच

चकं॥ अनुपानप्रयोक्तव्यमजंतक्रंपयोदधि॥८७॥ घृतंजलंवाजीर्णेच

वप्रवाहिकां॥ ॥कुटजावलेहः॥ ॥कुटजत्वक्तुलामाद्रोद्रोणनीरे

पथ्यभोजीभवेन्नरः॥ ॥कुटजाद्यावलेहः॥

५२

विपाचयेत्॥ पादशेषं भृतं नीलाचूर्णान्येतानि सापयेत्॥८८॥ लज्जालू धातकी बिल्वं पा
ठा मोचरसस्तथा॥ मुस्तं प्रतिविषा चैव प्रसेकं स्यासलं गतः॥८९॥ ततस्तु विपचेद् यावद्
दर्वीप्रलेपनं॥ जलेन छागदुग्धेन पीतो मंडेन वा जयेत्॥९०॥ सर्वातिसारान् घोरां॥ स्तुनो
नो वर्णान्सवेदनान्॥ असृग्दरं समस्तं च सर्वार्शांसि प्रवाहिका॥९१॥ बलेहमाध्याये
तेषां कथ्यं सर्वान्प्यनुक्रमात्॥९२॥ ॥इति श्री दामो॰ शा॰ वि॰ चिकित्सास्थाने अवले
हकल्पनाध्यायः॥ ॥ ॥अथ घृतकल्पना॥ ॥कल्कांच्चतुर्गुणी कृत्य घृतं
वा तैलमेव वा॥ चतुर्गुणे द्रवे साध्यं तस्य मात्रा पलोन्मिता॥ निक्षिप्य क्वाथयेत्तोयं
क्वाथ्यद्रव्याच्चतुर्गुणं॥ पादशिष्टं गृहीत्वा च स्नेहं तेनैव साधयेत्॥९४॥ चतुर्गुणं मृ
दुद्रव्ये कठिनेष्टगुणं जलं॥ तथा च मध्यमे द्रव्ये दद्यादष्टगुणं पयः॥९५॥ अत्यंत
कठिने द्रव्ये नीरं षोडशिकं मतं॥ कर्षादितः पलं यावत् क्षिपेत्षोडशिकं जलं॥९६॥ तदू
र्ध्वं कुडवं यावत्तभवेदष्टगुणं पयः॥ प्रस्थादितः क्षिपेन्नीरं खारियावच्चतुर्गुणं॥९७॥ अं
बु क्वाथरसैर्यत्र पृथक्स्नेहस्य साधनं॥ कल्कस्यांशं तत्र दद्याच्चतुर्थं षष्ठमष्टकं॥९८॥

दुग्धेदधिरसेतक्रेकल्कोदेयोष्टमांशकः॥ कल्कस्यसम्यक्पाकार्थंतोयमत्रचतु
र्गुणं॥९९॥ द्रव्याणियत्रस्नेहेस्युःपंचादीनिभवंतिहि॥ तत्रस्नेहसमान्याहुर्यथापूर्वं
चतुर्गुणं॥१००॥ द्रवेणकेवलेनैवस्नेहपाकोभवेद्यदि॥ तत्रांबुपिष्टःकल्कःस्याज्ज
लंचात्रचतुर्गुणं॥१॥ क्वाथेनकेवलेनैवपाकोयत्रेरितःक्वचित्॥ क्वाथ्यद्रव्यस्यक
ल्कोपितत्रस्नेहेप्रयुज्यते॥२॥ कल्कहीनस्तुयःस्नेहःससाध्यःकेवलेद्रवे॥ पुष्प
कल्कस्तुयःस्नेहस्तत्रतोयंचतुर्गुणं॥३॥ स्नेहात्स्नेहाष्टमांशश्चपुष्पकल्कःप्रयुज्यते
॥ वर्तिवत्स्नेहकल्कःस्याद्यदांगुल्याविमर्दितः॥४॥ शब्दहीनोग्निनिक्षिप्तःस्नेहःसिद्धो
भवेत्तदा॥ यदाफेनोद्गमस्तैलेफेनशांतिश्चसर्पिषि॥५॥ वर्णगंधरसोत्पत्तिःस्नेहसि
द्धिस्तदाभवेत्॥ स्नेहपाकस्त्रिधाप्रोक्तोमृदुर्मध्यःखरस्तथा॥६॥ ईषत्सरसकल्कस्तुस्ने
हपाकोमृदुर्भवेत्॥ मध्यपाक[illegible]स्यसिद्धिश्चकल्केनीरसकोमले॥ ईषत्कठिनकल्क
श्चस्नेहपाकोभवेत्खरः॥ तदूर्ध्वंदग्धपाकःस्याद्दाहकृत्निःप्रयोजनः॥८॥ आमपाक

थ निर्वीर्यो वह्निमांद्यकृद्रोगुरुः॥ न स्यार्थ स्यान्मृदुः पाको मध्यमः सर्वकर्मसु॥ ९॥ अ
भ्यंगार्थं स्वरः प्रोक्तो युंज्यादेवं यथोचितं॥ घृततैलगुडादीं श्च साधयेन्नैकवासरे॥ १०॥
प्रकुर्वंत्सुषितास्वेते विशेषाद्गुणसंचयं॥ ॥ सथया॥ पिप्पली पिप्पलीमूलं चव्य
चित्रक नागरैः॥ स सैंधवैश्च पलिकैर्घृतप्रस्थं विपाचयेत्॥ ११॥ क्षीरं चतुर्गुणं द
त्वा तद्घृतं प्लीहनाशनं॥ विषमज्वरमंदाग्निहरं रुचिकरं परं॥ १२॥ इति जीर्णज्वरे क्षा
रषट्पलंघृतं॥ ॥ पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली॥ श्वदंष्ट्रा नागरं
धान्यं पाठा बिल्वयवानिका॥ द्रव्येश्च पालिकैरेतैश्चतुःषष्टिपलं घृतं॥ घृताच्चतुर्गु
णं दद्याच्चांगेरीस्वरसं बुधः॥ तथा चतुर्गुणं दद्याद्दधि सर्पिर्विपाचयेत्॥ शनैः शनैः
र्विपक्वं च चांगेरीघृतमुत्तमं॥ १५॥ तद्घृतं कफवातघ्नं ग्रहण्यर्शोविकारजित्॥ हंत्य
नाहं गुदभ्रंशं मूत्रकृच्छ्रं प्रवाहिकां॥ १६॥ ॥ चांगेरीघृतं॥ ॥ मरस्त्रराणां पलशतं
नीरद्रोणे विपाचयेत्॥ पादशेषं शृतं नीत्वा दद्यात्बिल्वं फलाष्टकं॥ १७॥ घृतप्रस्थं

६१

महणीभिन्नविट्कं च नाशयेच्च प्रवाहिकां ॥१८॥ ॥

पञ्चतेन सर्वातीसारनाशनं ॥ ग्रहणीभिन्नविट्कं च नाशयेच्च प्रवाहिकां ॥ बलामृ नाशालि
मसूराद्यंघृतं ॥ ॥अश्वगंधाचुल्लैकस्या तद्धोगोक्षुरस्तथा ॥ बलामृ नाशालि
पर्णीविदारी च शतावरी ॥१९॥ पुनर्नवाश्वथशुंठीकाश्मर्याश्च पलान्यपि ॥ पद्मबी
जं माषबीजं दधाद्दशपलं पृथक् ॥२०॥ चतुर्द्रोणं भसु पक्वा पादशेषं स्रतं नयेत्
॥ जीवनीयगणः कुष्ठं पद्मकं रक्तचंदनं ॥२१॥ पत्रकं पिप्पलीद्राक्षा कपिकच्छूफलं
पथा ॥ नीलोत्पलं नागपुष्पं सारिवे द्वे तथा बला ॥२२॥ पृथक् कर्षसमा भागा शर्करायाः प
लद्वयं ॥ रसस्य पौंड्रकेक्षूणां आढकं समाहरेत् ॥२३॥ घृतस्य चाढकं दत्वा पाचयेन्म
दुवह्निना ॥ घृतमेतन्निहंत्यासृग्रक्तपित्तमुरःक्षतं ॥२४॥ हलीमकं पांडुरोगं वर्णभेदस्वरक्ष
यं ॥ वातरक्तं मूत्रकृच्छ्रं पार्श्वशूलं सकामलं ॥२५॥ शुक्रक्षयमुरोदाहं कार्श्यमोजःक्ष
यं तथा ॥ स्त्रीणां चैवाप्रजातानां गर्भदं शुक्रवर्धनं ॥२६॥ कामदेवघृतं नाम बंध्यबल्य
रसायनं ॥२७॥ ॥कामदेवघृतं ॥ ॥त्रिफलाद्धे निशे कोनीसारिवे प्रियंगुका ॥
द्वे

६१

शालिपर्णी पृष्टपर्णी देवदार्वेलवालुकं ॥ २९ ॥ नतं विशाला दंती च दाडिमं नागकेसरं ॥
नीलोत्पलैलामंजिष्ठाविडंगपद्मकुष्टकं ॥ जातिपुष्पं चंदनं च तालीसं बृहती तथा ॥ एतैः
कर्षसमैः कल्कैर्जलं दत्वा चतुर्गुणं ॥ ३० ॥ घृतप्रस्थं पचेद्धीमानपस्मारज्वरक्षये ॥ उन्मादे
वातरक्ते च कासमंदानले तथा ॥ ३१ ॥ प्रतिश्यायेकरी भूले तृतीयक चतुर्थके ॥ मूत्रकृच्छ्रे वि
सर्पे च कंडूपांडुामये तथा ॥ ३२ ॥ विषघ्ने प्रमेहेषु सर्वथैव प्रयुज्यते ॥ वंध्यानां पुत्रदं भूत
यक्षरक्षोहरं नृणां ॥ ३३ ॥ ॥ पानीयकल्याणघृतं ॥ ॥ अमृताक्काथकल्काभ्यां सक्षीरं
विपचेत् घृतं ॥ वातरक्तं जयत्याशु कुष्टं जयति दुस्तरं ॥ ३४ ॥ ॥ अमृताद्यं घृतं ॥ ॥
सप्तछदप्रतिविषासम्याकं कटुरोहिणी ॥ पाठामुस्तमुशीरं च त्रिफलापर्पटस्तथा ॥ ३५ ॥
पटोलानिंबमंजिष्ठापिप्पलीपद्मकं सठी ॥ चंदनं धन्वयासश्च विशालाद्वे निशे तथा ॥ ३६ ॥
गुडूचीसारिवे द्वे च मूर्वा वासा शतावरी ॥ त्रायंती इन्द्रयवा यष्टीभूनिंबाश्च द्विभागिका ॥ ३७ ॥
घृतं चतुर्गुणं दद्यान्घृतात्मामलकीरसः ॥ द्विगुणः सर्पिषः श्चात्र जलमष्टगुणं भवेत् ॥ ३८ ॥

६२

न स्निग्धं पाययेत्सर्पिर्विनरक्तेषु सर्वथा॥ कुष्ठानि रक्तपित्तं च रक्तार्शांसि च पांडुतां॥४९॥
हन्याद् गुल्मं विसर्पं च प्रदरं गंडमालिकां॥ क्षुद्ररोगानुज्वरं चैव महातिक्तमिदं जयेत्॥
॥५०॥ ॥महातिक्तकं घृतं॥ ॥ कासीसं द्वे निशे मुस्तं हरितालं मनःशिलां॥
कंपिल्लकं गंधकं च विडंगं गुग्गुलुं तथा॥५१॥ सिक्थकं मरिचं कुष्टं तुत्थकं गौरस
र्षपान्॥ रसांजनं च सिंदूरं श्रीवासं रक्तचंदनं॥५२॥ इरिमेदं निंबपत्रं करंजं सारिवा
वचा॥ मंजिष्टा मधुकं मांसी शिरीषं लोध्रपद्मकं॥५३॥ हरीतकी प्रपुन्नाटं चूर्णयेत्का
र्षिकान्पृथक्॥ ततस्तच्चूर्णमालोड्य त्रिंशत्पलमितेन घृतेनः॥५४॥ स्थापयेत्ताम्रपात्रे
ण घर्मे सप्तदिनानि च॥ अस्याभ्यंगेन कुष्ठानि दद्रुपामाविचर्चिका॥५५॥ शूक
दोषविसर्पाश्च विस्फोटा वातरक्तजाः॥ शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च॥
॥५६॥ शोथो भगंदरश्चास्य वलूता प्रशाम्यंति देहिनां॥ शोधनं रोपणं चैव सवर्णकरं
घृतं॥५७॥ ॥कासीसाद्यं घृतं॥ ॥ जाती निंबपटोलं च द्वे निशे कटुकी तथा॥ म

६२

ज्ञिष्टामधुकंसिक्थंकरंजोशीरसारिवा॥४८॥ तुत्थंचविपचेत्सम्यकूकल्कैरेभिर्घृ
तंबुधः॥अस्यलेपाद्विरोहंती सूक्ष्मनाडीव्रणाअपि॥४९॥मर्माश्रिताक्लेदिनश्चगंभी
राःसहजोव्रणाः॥ ॥जात्यादिघृतं॥ ॥चित्रकःशंखिनीपथ्याकंपिल्लात्रिवृता
पुनः॥वृद्धदारुश्चसंम्याकोदंतीकुंभंफलंतथा॥५०॥कोशातकीदेवदालिनिलिनी
गिरिकर्णिका॥सातलापिप्पलीमूलं विडंगंकटुकंतथा॥५१॥हेमक्षीरीचविपचेत्कल्कैरे
भिःपलोन्मितैः॥घृतप्रस्थंस्नुहिक्षीरेषट्फलंतुपलद्वये॥५२॥अर्कक्षीरस्तुमति
मास्वकृत्सिद्धंगुल्मकुष्टहृत्॥हंतिशूलमुदावर्तंशोथाध्मानंभगंदरं॥५३॥शमय
त्युदराण्यष्टौतत्पित्तंबिंदुसंख्यया॥गोदुग्धेनोष्णदुग्धेनकोलस्थेनष्टेनवा॥५४॥उ
ष्णोदकेनवापीत्वाबिंदुवेगैर्विरिच्यते॥एतद्बिंदुघृतंनाममनाभिलेपाद्विरिच्यते॥५५॥
॥ ॥बिंदुघृतं॥ ॥त्रिफलायारसप्रस्थंप्रस्थंवासारसोद्भवं॥भृंगराजरसप्र
स्थंप्रस्थमाजंपयःस्मृतं॥५६॥दशानत्रघृतप्रस्थंकल्कैःकर्षमितैःपृथक्॥त्रिफ

६३

शर्करापुं
त्वाचिष्पलीद्राक्षाचंदनंसैंधवंबला॥ काकोलीक्षीरकाकोलीमेदामरिचनागरं॥ शर्करापुं
उरीकंचकमलंचपुनर्नवा॥५८॥ निशायुग्मंचमधुकंरवैरेभिर्विपाचयेत्॥ नक्तांध्यंनकुलां
ध्यंचकंडूपित्तंतपैवच॥५९॥ जयेकाचंचतिमिरंनेत्रस्रावंचपाटलां॥ अन्येचप्रशम
यांतिनेत्ररोगाःसुदारुणाः॥६०॥ त्रैफलंघृतमेतद्धिपानेनस्याद्धितंसचिरं॥ ॥त्रैफलघृतं॥
॥ ॥द्वेहरिद्रेस्थिरामूर्वासारिवाचंदनद्वयं॥ मोहपर्णीमधूकंचपद्मकेसरपद्मकेः॥पु
स्पलोशीरमेदाग्नित्रिफलापंचवल्कलैः॥ पृथक्कर्षमितैरेतैर्घृतप्रस्थंविपाचयेत्॥
॥६२॥ विसर्पलूताविस्फोटविषकीटव्रणापहं॥ गौराद्यमितिविख्यातंसर्पिर्विषहरंस्मृ
तं॥६३॥ ॥गौराद्यंघृतं॥ ॥बलामधुकरास्नाभिर्दशमूलफलत्रिकैः॥ पृथक्द्विपलि
तैरेभिर्द्रोणनीरेणपाचयेत्॥६४॥ ब्राह्मीरसेवचाकुष्ठशंखपुष्पीभिरेवच॥ पक्कंपुराण
नंसर्पिरपस्मारभवंध्रुवं॥६५॥ ॥बलाद्यंघृतं॥ ॥मयूरंपक्षपित्तांत्रशकृत्पादा
स्यवर्जितः॥ पादशेषंसृतंनीत्वाक्षीरंदत्वाचतुर्गुणं॥६६॥ घृतप्रस्थंपचेत्सम्यक्जीवनी

६३

पलोन्मितैः॥ नस्ति सिद्धं शिरसः पीडामन्यापृष्ठ ग्रहं तथा॥ ६७॥ अर्दितं कर्णनासाक्षि सीजि
ह्वागलरुजोजयेत्॥ पानेनस्येनतथाभ्यंगेकर्णपूरेषुयोजयेत्॥ ६८॥ हेमंतकालेशिशिरेव
संतेषु प्रशस्यते॥ ६९॥ ॥ मयूराद्यं घृतं॥ ॥ त्रिफलामधुकं कुष्ठं द्वे निशेकटुरोहिणी॥
विडंगंपिप्पलीमुस्तंविशालाकट्फलंवचा॥ ७०॥ द्वे मेदे द्वे चकाकोल्यौ सारिवे द्वे प्रियंगुका॥
॥ शतपुष्पा हिंगुरास्ना चंदनंरक्तचंदनं॥ ७१॥ जातिपुष्पं तुगाक्षीरी कमलं शर्करा तथा॥
अजमोदा चदंतीच कल्कैरेतैश्चकर्षिकैः॥ ७२॥ जीववत्सैकवर्णानां घृतप्रस्थंगवांपचे
त्॥ चतुर्गुणेन पयसा पचेदारण्यगोमयैः॥ ७३॥ सुतिथौ पुष्यनक्षत्रे मङ्गले नाम्रजेथवा॥
ततः पिबेच्च सुदिने नारीवापुरुषोथवा॥ ७४॥ एतत्सर्पिर्वरं पीत्वा स्त्रीषु नित्यं वरापते॥
पुत्रानुत्पादयेद्धीमान्वंध्यापिलभते सुतं॥ ७५॥ दीर्घायुषं पाजनपेद्याच सत्वापुनस्थि
ता॥ पुत्रमाप्नोति सा नारी बुद्धिमंतं शतायुषं॥ ७६॥ एतत्फलघृतंनामभारद्वाजेन भाषितं
॥ लक्ष्मणामूलंनदत्राभे रिंगणीमूलं क्षिपेत्तत्र चिकित्सकाः॥ ॥ त्रिफलाद्यं॥ ॥

६४

वृषनिंबामृता व्याघ्रीपटोलानां रसेन च ॥ कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान् ॥ ॥७७॥ पांडुकुष्टं विसर्पं च कृमिरोगं विनाशयेत् ॥७८॥ ॥पंचतिक्तं घृतं॥ ॥त्रिफलाद्वे सहचरे गुडूची च पुनर्नवा ॥ शुकनासा हरिद्रे द्वे रास्ना कुष्टं शतावरी ॥७९॥ कल्कीकृस घृतप्रस्थं पचेत्क्षीरे चतुर्गुणे ॥ पिबेद्वृंध्या च या नारी योनिदोषनिपीडिता ॥८०॥ चलिता या च निर्गता त्वरस्कृपिता नृपादिना ॥ स्फुरयोनिश्च विभ्रांता खंडयोनिश्च या स्मृता ॥८१॥ प्रपद्यं ने हिता स्यानं गर्भं गृह्णाति चासंकृत ॥ एतत्फलघृतं नाम योनिदोषहरं परं ॥८२॥ ॥ ॥फलघृतं॥ ॥इति श्रीदामो॰ शां॰ चि॰ चिकित्सास्थाने घृतकल्पनाध्यायः॥ ॥ ॥ ॥अथ तैलानि॥ ॥लाक्षाढकं क्वाथयित्वा जलस्य चतुराढके ॥ चतुर्थांशं स्थिते तेनी लाने तैलप्रस्थं विनिक्षिपेत् ॥८३॥ मस्त्वाढकं च गोदध्नस्तत्रैवं विनियोजयेत् ॥ शतपुष्पा मश्वगंधां हरिद्रां देवदारु च ॥८४॥ कटुकां रेणुकां मूर्वां कुष्टं च मधुयष्टिकां ॥ चंदनं मुस्तकं रास्नां पृथक् कर्षप्रमाणतः ॥८५॥ चूर्णयेत्तत्र निक्षिप्य साधयेन्मृदुवह्निना ॥ अ ६४

स्याभ्यंगाच्छ्राम्यंतिसर्वेपिविषमज्वराः॥ कासश्वासप्रतिश्यायत्रिकपृष्ठकटिग्रहाः॥
वातपित्तमपस्मारमुन्मादंयक्षराक्षसान्॥८७॥ कंडूशूलंचदौर्गंध्यंगात्राणांस्फुटनंज
येत्॥पुष्टगर्भभिवेदस्यगर्भिण्याभ्यंगतोभृशं॥८८॥ ॥लाक्षाद्यंतैलं॥ ॥अश्वगंधा
बलाबिल्वंपाटलांबृहतीद्वयं॥श्वदंष्ट्रातिबलानिंबश्योनाकंचपुनर्नवा॥८९॥प्रसा
रणीमग्निमंथंकुर्याद्दशपलंपृथक्॥चतुर्द्रोणजलेपक्त्वापादशेषंश्रृतंनयेत्॥९०॥
तैलाढकेनसंयोज्यशतावर्यारसाढकं॥क्षिपेत्तत्रचगोक्षीरंतैलाच्चैवचतुर्गुणं॥९१॥
शनैर्विपाचयेदेभिःकल्कैश्चद्विपलैःपृथक्॥कुष्ठैलाचंदनंवालामांसीशैलेयसैंधवैः॥
॥९२॥अश्वगंधाबलारास्नाशतपुष्पेंद्रदारुभिः॥पर्णीचतुष्टयेनैवतगरेणचसाध
येत्॥९३॥तत्तैलंनावनेभ्यंगेपानबस्तौचयोजयेत्॥पक्षघातंहनुस्तंभंमन्यास्तंभंग
लग्रहं॥९४॥खंजत्वंबधिरत्वंचगतिभंगंकटिग्रहं॥गात्रशोषेंद्रियध्वंसौनष्टशुक्र
क्षतक्षयान्॥९५॥अंडवृद्धिंकुरंडंचदंतरोगंशिरोग्रहं॥पार्श्वशूलंचपांगुल्यंबुद्धिहा

६५

निंचगृध्रसी ॥९६॥ अन्यांश्च विषमान्वातानूजयेत्सर्वांगिसंश्रयान् ॥ अस्यप्रभा
वाद्वंध्यापीनारीपुत्रंप्रसूयते ॥९७॥ मर्त्योगजोवातुरगस्तैलादस्मात्सुखीभवेत् ॥ यथा
नारायणोदेवोदुष्टदैत्यविनाशनः ॥९८॥ तथेदंवातरोगाणांनाशनेतैलमुत्तमं ॥ ॥
॥ नारायणतैलं ॥ ॥ बलामूलकषायेणदशमूलरसेनच ॥ कुलित्थयवकोलानां
क्वाथेनपयसातथा ॥ अष्टाष्टभागयुक्तेनभागमेकंतैलतः ॥ गणेनजीवनीयेनशतावर्
यैंद्रवारुणी ॥१००॥ मंजिष्टाबिल्वशैलेयतगरागुरुसैंधवैः ॥ वचापुनर्नवामांसीसा
रिवाद्वयपत्रकैः ॥१॥ शतपुष्पाश्वगंधाभ्यांएलयाचविपाचयेत् ॥ गर्भार्थिनीनांना
रीणांपुंसांचक्षीणरेतसां ॥२॥ व्यायामक्षीणगात्राणांसूतिकानांचयुज्यते ॥ राज्ञांयो
ग्यमिदंतैलंसुखिनंचविशेषतः ॥३॥ बलातैलमितिख्यातंसर्ववातामयापहं ॥४॥
॥ बलातैलं ॥ ॥ प्रसारिणीपलशतंजलद्रोणेविपाचयेत् ॥ पादशिष्टः स्तत्रग्राह्यः
स्तैलंदधि[illegible]समं ॥५॥ कांजिकंचसमंतेनक्षीरंतैलाच्चतुर्गुणं ॥ तैलात्तथाष्टमां

६५

शान सर्वकल्कानि योजयेत् ॥६॥ मधुकं पिप्पलीमूलं चित्रकः सैंधवं वचा ॥ प्रसारणी
देवदारु रास्ना च गजपिप्पली ॥७॥ भल्लातः शतपुष्पा च मांसी चैभिर्विपाचयेत् ॥ एतत्तै
लवरं पक्कं वातश्लेष्मामयापहं ॥८॥ कुब्जं खंजत्वपंगुत्वं गृध्रसीमर्दितं तथा ॥ हनुपृष्ठ
शिरोग्रीवाकटिस्तंभं च नाशयेत् ॥९॥ अन्यांश्च विषमान्वातान्सर्वानाशु व्यपोहति ॥ ॥
प्रसारिणीतैलं ॥ ॥माषाः यवा तसी क्षुद्रा मर्कटी च कुरंटकः ॥ गोकंठः टुंटुकश्चैव कु
र्यात्सप्त पलं पृथक् ॥१०॥ चतुर्गुणांपक्का पादशेषं शृतं नयेत् ॥ कार्पासिकास्थि बदरं
शणबीजं कुलत्थकं ॥११॥ पृथक् चतुर्दशपलं चतुर्गुणजले पचेत् ॥ चतुर्थांशावशि
ष्टं च गृह्णीयात्क्वाथमुत्तमं ॥१२॥ प्रस्थैकं छागमांसस्य चतुःषष्टिपले जले ॥ निक्षिप्य
पाचयेद्धीमान्पादशेषं रसं नयेत् ॥१३॥ तैलप्रस्थं ततः क्वाथान्सर्वानेतान्विनिक्षिपेत्
॥ कल्कैरेभिश्च विपचेत् हस्रता कुष्ठनागरैः ॥१४॥ रास्ना पुनर्नवैरंडः पिप्पल्याः शतपु
ष्पया ॥ बला प्रसारिणीभ्यां च मांसी कटुकया तया ॥१५॥ पृथगर्धपलैरेतैः साधयेत्ने

दुव ह्निना॥ हस्तातैलमिदं शीघ्रं ग्रीवास्तंभावबाहुके॥१६॥ अर्धांगशोषमाक्षेपाउरुस्तं
भापतानके॥ मुखवाकंपशिरः कंपविश्वाचीमर्दितं नयेत्॥१७॥ माषादिकमिदं तैलं सर्व
वातविकारनुत्॥१८॥ ॥माषाद्यं तैलं॥ ॥शतावरीबलायुग्मं पर्णीगंधर्वहस्त
कः॥अश्वगंधाश्वदंष्ट्रा च बिल्वकाश्मःकुरंटकः॥ए षां सार्धपलान्भागान्कल्कये
न्नियोज्य तैलप्रस्थेन
च विपाचयेत्॥ चतुर्गुणेन नीरेण पादशेषं शृतं नयेत्॥२०॥ नियोज्य तैलप्रस्थेन
च विपाचयेत्॥ चतुर्गुणेन नीरेण पादशेषं शृतं नयेत्॥२१॥ शतावरीद
क्षीरप्रस्थं विनिक्षिपेत्॥ शतावरीरसप्रस्थं जलप्रस्थं च योजयेत्॥२२॥ ऋद्धीमेदा च
वदारु मांसी तगरं चंदनं॥ शतपुष्पा बलाकुष्ठमेदा शैलेयमुसलं॥२३॥ पचेन्नास्ति
मधुकं काकोली जीवकस्तथा॥ एषां कर्षसमैः कल्कैस्तैलं गोमयवह्निना॥२४॥ अंगशूल
घ्नं तैलेन नरस्त्रीषु प्रपायते॥ नारी च लभते पुत्रं योनिशूलं च नश्यति॥२४॥ अंगशूल
शिरःशूलं कामलां पांडुतां जयेत्॥ गृध्रसीप्लीहशोफांश्च मेहान्दंडापतानकं॥२५॥ सह
हं वातरक्तं च वातरक्तगदार्दितं॥ असृग्दरं तथाध्मानं रक्तपित्तं नियच्छति॥२६॥ शताव

सीतैलमिदं कृष्णात्रेयेन भाषितं॥ ॥ॐ नमो नारायणाय स्वाहा॥ उत्तराभिमुखो भूत्वा
खनेत्खदिरशंकुना॥ ॐ सर्वव्याधिसाधनीये स्वाहा॥ येन त्वां खनते ब्रह्मा येन त्वां खनते हरिः
॥तेन त्वां खनयिष्यामि औषधी कार्यसाधिके॥२७॥ ॥इसुसादनमंत्रः॥ कुमारजीवन॥
पस्वाहा॥ ॥इति पाचनमंत्रः॥ शतावरीसादिव्योषध्या॥ ॥शतावरीतैलं॥ ॥कासी
संलांगलीकुष्ठं शुंठी कृष्णा च सैंधवैः॥ मनःशिलाश्वमारश्च विडंगं चित्रको वृषः॥२८॥ दं
ती कोशातकी बीज हेमाह्वा हरितालकः॥ कल्कैः कर्षमितैरेभिस्तैलप्रस्थं विपाचयेत्॥२९॥
स्नुह्यर्कपयसा दद्यात्पृथक् द्विपलसंमितं॥ चतुर्गुणं गवां मूत्रं दत्वा सम्यक् प्रसाधयेत्॥
॥३०॥ क्वथितं खरनादेन तैलमर्शोविनाशनं॥ क्षारवत्पातयत्येनदुर्नांस्यभ्यंगतो भृशं॥
॥३१॥ बलं न दूषयत्येव क्षारकर्मकरं स्मृतं॥३२॥ ॥कासीसाद्यं तैलं॥ ॥मंजिष्ठासा
रिवासर्जयष्टी सिक्थैः पलोन्मितैः॥ पिंडाख्यं साधयेत्तैलमभ्यंगाद्दाहरक्तनुत्॥३३॥
॥ ॥पिंडाख्यं तैलं॥ ॥अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतं॥ नाशयेत्सर्षपं तैलं

पामाकछ्छू विचर्चिका॥ ॥अर्कतैलं॥ ॥मरिचं हरितालं च त्रिवृन्नारक्तचंदनं॥
मुस्तं मनःशिला मांसी द्वे निशे देवदारु च॥२४॥ विशाला करवीरं च कुष्ठमर्कपयस्त
था॥ तथैव गोमयरसं कुर्यात्कर्षमितान्पृथक्॥२५॥ विषं चार्धपलं देयं प्रस्थं च कटु
तैलकं॥ गोमूत्रं द्विगुणं दद्याज्जलं च द्विगुणं भवेत्॥३६॥ मरिचाद्यमिदं तैलं सर्वकु
ष्ठप्रणाशनं॥ जयेत्स्वित्राणि कुष्ठानि पुंडरीकं विचर्चिका॥३७॥ पामां सिध्मानि र
कसां दद्रुं कछ्छुं च नाशयेत्॥३८॥ ॥मरिचाद्यं तैलं॥ ॥त्रिफलारिष्टभूनिंबद्वेनि
शे रक्तचंदनं॥ एतैः सिद्धमरूषीनां तैलमभ्यंजने हितं॥३९॥ ॥त्रैफलं तैलं॥ ॥
भावयेन्निंबबीजानि भृंगराजरसेन हि॥ तथासनस्य तोयेन तत्तैलं हंति नस्यतः॥४०॥
अकालपलितं सद्यः पुंसां दुग्धान्नभोजिनां॥४१॥ ॥निंबबीजतैलं॥ ॥यष्टीमधुक
साराभ्यां नवधात्रीफलैः स्मृतं॥ तैलं नस्ये कृतं कुर्यात्केशान्मश्रूणि सद्यशः॥४२॥ ॥
यष्टीमधुकं तैलं॥ ॥करंजाश्वित्रकोजाती करवीरैश्च पाचितं॥ तैलमेभिर्दुनं हन्या

दभ्यंगादिं इन्द्रलुप्तकं ॥४३॥ ॥करंजाद्यं तैलं॥ ॥निलिकाकेतकीकंदभृंगराजः कुरंट
कः ॥ तथार्जुनस्य पुष्पाणि बीजकाल्कुसुमान्यपि ॥४४॥ कृष्णातिलाश्चनगरं समूलं कमलं
तथा ॥ अघोरजः प्रियंगुश्च दाडिमत्वग्गुडूचिका ॥४५॥ त्रिफलापद्मकं दाश्वकल्कैः कृयस्थि
थक् पृथक् ॥ कर्षमाणैः पचेत्तैलं त्रिफलाक्वाथसंयुतं ॥४६॥ भृंगराजरसेनैव सिद्धं केशास्थि
रीकृतं ॥ अकालपलितं हंती दारुणां चोपजिह्विकां ॥४७॥ ॥निलिकाद्यं तैलं॥ ॥भृंग
राजरसेनैव लोहकीटं फलत्रिकं ॥ सारिवा च पचेत्कल्कैः स्तैलं दारुणनाशनं ॥४८॥ अका
लपलितं कंडूमिंद्रलुप्तं च नाशनं ॥ ॥भृंगराज तैलं॥ ॥इरिमेदत्वचक्षुण्णां पचेद
शतपलोन्मितं ॥ जलद्रोणेन तत्क्वाथं गृह्णीयात्पादशेषितं ॥४९॥ तैलस्य ह्यर्धढकं दत्वाद
त्वा कल्कैः कर्षमितैः पचेत् ॥ इरिमेदलवंगाभ्यां गैरिकागुरुपद्मकैः ॥५०॥ मंजिष्ठालो
ध्रमधुकलाक्षान्यग्रोधमुस्तकैः ॥ त्वक्जातीफलकर्पूरंकंकोलखदिरैस्तथा ॥५१॥ प
तंगधातकीपुष्पसूक्ष्मैलानागकेसरैः ॥ कट्फलेन च संसिद्धं तैलं मुखरुजं जयेत् ॥५२॥

६८

प्रदुष्टमांसं चलितं शीर्णदंतं च शोषितं ॥ शीतादं दंतहर्षं च विद्रधी कृमिदंतकौ ॥५३॥ दंत

स्फुटनदौर्गंध्यं जिह्वाताल्वोष्टजां रुजां ॥५४॥ ॥इरिमेदाद्यं तैलं॥ ॥हिंगुतुंबुरुशुंठी

भिः कटुतैलं विपाचयेत् ॥ तस्य पूरणमात्रेण कर्णशूलं विनश्यति ॥५५॥ ॥हिंग्वाद्यं

तैलं॥ ॥बालबिल्वानि गोमूत्रे पिष्ट्वा तैलं विपाचयेत् ॥ साजाक्षीरं सनीरं च बाधिर्ये

कर्णपूरणं ॥५६॥ ॥बिल्वतैलं॥ ॥बालमूलकशुंठीनां क्षारं क्षीरं सुतं तथा ॥ लव

णानि तु पंचैव हिंगु शिग्रु महौषधं ॥५७॥ देवदारु वचा कुष्टं शतपुष्पा रसांजनं ॥ ग्रंथि

कं भद्रमुस्तं च कल्कैः कर्षमितं पृथक् ॥५८॥ तैलप्रस्थं च विपचेत् कदलीबीजपूरयोः ॥

रसाभ्यां मधुयुक्तेन चातुर्गुणमितेन च ॥५९॥ पूयस्रावं कर्णनादं शूलं बधिरतां कृमीन् ॥

अन्यांश्च कर्णजान्रोगान्मुखरोगं च नाशयेत् ॥६०॥ जंबीराणां फलरसे प्रस्थकः कुडवान्मि

तं ॥ माक्षिकं तत्र दातव्यं पलैकं पिप्पलीस्मृतं ॥६१॥ एतदेकीकृतं सर्वं मधुभांडे निधाप

येत् ॥ धान्यराशौ स्थितं मासं मधुसूक्तमुदाहृतं ॥६२॥ ॥इति मधुसूक्तविधानं क्षार

६८

तैलं॥ ॥पाठाद्वे च निशे मूर्वा पिप्पली जातिपल्लवैः दंत्या च तैलं संसिद्धं नस्यं स्यात् दुष्ट
पीनसे॥६३॥ ॥पाठाद्यं तैलं॥ ॥व्याघ्रीदंतीवचाशिग्रुतुलसीव्योषसैंधवैः॥पाचितं
नावनं तैलं पूतिनासागदापहं॥६४॥ ॥व्याघ्रीतैलं॥ ॥कुष्टबिल्वकणाशुंठीद्राक्षा
कल्ककषायकं॥साधितं तैलमाज्यं वा नस्यात्क्षवथुनाशनं॥ ॥कुष्टतैलं॥ ॥गृहधू
मकणादारुक्षारनक्ताह्वसैंधवैः॥सिद्धं शिरषबीजैश्च तैलं नासार्शसां हितं॥६६॥ ॥
गृहधूमतैलं॥ ॥वज्रीक्षीरं रविक्षीरं द्वयं धत्तूरपत्रजं॥महिषीविट्भवं द्रावं सर्वांशं
तिलतैलकं॥६७॥पचेत्तैलावशेषं च गोमूत्रे च चतुर्गुणे॥तैलावशेषं पक्वाच्च तत्तैलं प्र
स्यमात्रकं॥६८॥गंधकाग्निशिलातालाविडंगातिविषा विषं॥तिक्तकोशातकीकुष्टं
वचामांसीकटुत्रिकं॥६९॥चित्रदारु च पथ्या हुस्वर्जिकाक्षारजीरकं॥देवदारु च कर्षां
शं चूर्णं तैले विमिश्रयेत्॥७०॥वज्रतैलमिति ख्यातमभ्यंगात्सर्वकुष्टनुत्॥७१॥ ॥
॥वज्रीतैलं॥ ॥करवीरशिफा दंती तकलोशातकीफलं॥रंभाक्षारो हकं तैलं प्रशस्तं

६१

लोमशांतये॥ ॥करवीराद्यंतैलं॥ ॥इति श्रीदामो॰शा॰वि॰चिकित्सास्थाने
तैलकल्पनाध्यायः॥ ॥ ॥द्रवेषु चिरकालस्थं द्रव्यं यत्साधितं भवेत्॥आस
वारिष्टभेदैस्तु प्रोच्यते भेषजोचितं॥७३॥यदपक्कौषधांबुभ्यां सिद्धमद्यं स आसवः
॥अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं॥७४॥अनुक्तमानारिष्टेषु द्रवद्रोणे
गुडात्तुलां॥क्षौद्रं क्षिपेद्गुडादर्धं प्रक्षेपं दशमांशकं॥७५॥ज्ञेयः शीतरसः सिंधुरपक्क
मधुरद्रवैः॥सिद्धः पक्करसः सिंधुः संपक्कमधुरद्रवैः॥७६॥परिपक्वान्नसंधानसमु
त्पन्नां सुरां जगुः॥सुरामंडः प्रसन्ना स्यात्ततः कादंबरी घना॥७७॥तदधो जगलो ज्ञेयो
मेदको जगलाद्घनः॥पक्कसोहृतसारः स्यात्सुराबीजं च किण्वकं॥७८॥पुनर्नवाशा
लिपिष्टैर्विहितो वारुणी मता॥यत्तालखर्जूररसैः संधिता सापि वारुणी॥७९॥कंदमू
लफलादीनि सस्नेहलवणानि च॥यत्र द्रवेऽभिषूयंते तच्छुक्तमभिधीयते॥८०॥यत्र द्रवा
भिधीयंते तदुक्तमभिधीयते॥विनिष्टमम्लतां यातं मद्यं वा मधुरद्रवः॥८१॥विनिष्टः

६१

139

संधितोयस्तु तच्छुक्तमभिधीयते ॥ गुडांबुना सतैलेन कंदशाकफलैस्तथा ॥ संधितं चाम्ल
तां जातं गुडशुक्तं प्रशस्यते ॥ एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा ॥८३॥ तुषांबु संधि
तं ज्ञेयं मामैर्विदलितैर्यवैः ॥ यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् ॥८४॥ कुल्माष
धान्यमंडादिसाधितं कांजिकं विदुः ॥ संडाकी संधितं ज्ञेया मूलकैः सर्षपादिभिः ॥८५॥
॥ ॥ अथासवः ॥ ॥ उशीरं वालकं पद्मं काश्मरी नीलमुत्पलं ॥ प्रियंगु पद्मकं लोध्रं
मंजिष्ठा धन्वयासकं ॥८६॥ पाठा कैरात तिक्तं च न्यग्रोधोदुंबरो सठी ॥ पटोलं पुंडरीकं
च पर्पटं कांचनारकं ॥८७॥ जंबुशाल्मलिनिर्यासं प्रसेकं पलसंमितान् ॥ भागान्तच्चूर्णि
तां कृत्वा द्राक्षायाः पलविंशतिः ॥८८॥ धातकी षोडशपलां जलद्रोणे विनिक्षिपेत् ॥ शर्क
रायाः तुलां दत्वा क्षौद्रस्यैक तुलां तथा ॥८९॥ मासं च स्थापयेद्भांडे मांसीमरिच धूपिते ॥
उसीरासव इत्येषु रक्तपित्तनिवारणः ॥९०॥ पांडुकुष्टप्रमेहार्शः कृमिशोथहरस्तथा ॥ ॥
उशीरासवः ॥ ॥ पिप्पली मरिचं चव्यं हरिद्रे वालकं घनः ॥ विडंगं क्रमुकं लोध्रं पाठा
धात्र्येलवालुकं ॥९१॥ उशीरं चंदनं कुष्टं लवंगं नागरं तथा ॥ मांसि त्वगेलापत्रं च प्रियं

७०

गुनागकेसरं ॥९२॥ एषामर्धपलान्भागान्सूक्ष्मचूर्णीकृतान्पृथक् ॥ जलद्रोणद्वये
क्षिप्त्वा दद्यात्गुडतुलात्रयं ॥९३॥ पलानि दश धातक्याद्राक्षाषष्टिपलाभवेत् ॥ सर्वाण्ये
कत्र संयोज्य मृद्भांडे च विनिक्षिपेत् ॥९४॥ स्थापयित्वा गतरसं पाययेदग्न्यपेक्षया ॥ क्ष
यंगुल्मोदरं कार्श्यं ग्रहणीपांडुतां तथा ॥९५॥ अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासव
स्त्वयं ॥९६॥ ॥पिप्पल्यासवः॥ ॥लोहचूर्णत्रिकटुकं त्रिफलां च यवानिका ॥ वि
डंगं मुस्तकं चित्रं चतुःसंख्यापलं पृथक् ॥ चूर्णीकृत्य ततः क्षौद्रं चतुःषष्टिपलं क्षि
पेत् ॥ दद्याद्गुडतुलां चैव जलद्रोणद्वयं तथा ॥९८॥ घृतभांडे विनिक्षिप्य विदध्या
न्मासमात्रकं ॥ लोहासवममुं मर्त्यः पिबेद्वह्निकरं परं ॥९९॥ पांडुरं श्वयथुगुल्मानि
जठराण्यर्शसां रुजां ॥ कुष्टं प्लीहामयं कंडुकासश्वासं भगंदरं ॥१००॥ अरोचकं च
ग्रहणीहृद्रोगं च विनाशयेत् ॥१॥ ॥लोहासवः॥ ॥अथ अरिष्टाः॥ ॥तुलां कु
टजमूलस्य मृद्वीकाध तुलां तथा ॥ मधूकपुष्पकाश्मर्यभागान्दशपलोन्मितान् ॥१॥ ७०

चतुर्द्रोणेंभसः पक्त्वा क्वाथे द्रोणावशेषिते ॥ धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ॥
॥२॥ मासमात्रस्थिते भांडे कुटजारिष्ट संज्ञितः ॥ अतिसारान् प्रशमयेत्कुर्यात्तीक्ष्णं धनंजयं
॥३॥ ॥ कुटजारिष्टः ॥ ॥ विडंगं ग्रंथिकं रास्ना कुटजत्वक् पलानि च ॥ पटोला वालु
कं धात्री भागान्पंच पलोन्मितान् ॥४॥ अष्टद्रोणेंभसः पक्त्वा कुर्याद्द्रोणावशेषितं
॥ पूते तस्मिन्क्षिपेत्तत्र क्षौद्रं पलशतत्रयं ॥५॥ धातकी विंशतिपलं त्रिजातं द्विपलं त
था ॥ प्रियंगु कांचनारं च सलोध्रं च पलं पलं ॥६॥ व्योषस्य च पलान्यष्टौ चूर्णीकृत्य
प्रदापयेत् ॥ घृतभांडे विनिक्षिप्य मासमेकं विधारयेत् ॥७॥ ततः पिबेद्यथार्हं तु जयेत्
द्विद्रधि मुष्टितं ॥ उरुस्तंभाश्मरीमेहान्मूत्रकृच्छ्रान्भगंदरान् ॥८॥ गंडमालां हनुस्तंभं
विडंगारिष्टसंज्ञितः ॥ ॥ विडंगारिष्टः ॥ ॥ तुलार्धं देवदारुस्याद्वासा च पलविंश
तिः ॥ मंजिष्ठेंद्रयवा दंतीतगरं रजनीद्वयं ॥९॥ रास्ना कृमिघ्नमुस्तं च शिरीषं खदिरार्जु
नौ ॥ भागान्दशपलान्दद्यात्सवान्याः वत्सकस्य च ॥१०॥ चंदनस्य गुडूच्याश्च रोहिण्याश्चि

७१

त्रकस्य च ॥ भागानष्टपलानेतानष्टद्रोणेंभसां पचेत् ॥ ११ ॥ द्रोणशेषे कषाये
च पूते शीते प्रदापयेत् ॥ धातक्याः षोडशपलं माक्षिकस्य पलत्रयं ॥ १२ ॥ व्योषस्य
द्विपलं दद्यात् त्रिजातं चतुःपलं ॥ चतुःपलं प्रियंगोश्च द्विपलं नागकेसरं ॥ १३ ॥
सर्वाण्येतानि संचूर्ण्य घृतभांडे विधारयेत् ॥ मासादूर्ध्वं पिबेदेतं प्रमेहं हंति
दुर्जयं ॥ वातरोगान् ग्रहण्यर्शो मूत्रकृच्छ्रं विनाशयेत् ॥ देवदार्वादिकारिष्टो द
द्रुकुष्टविनाशनः ॥ १५ ॥ ॥ देवदार्वाद्यरिष्टः ॥ ॥ खदिरस्यातुलार्धं तु देव
दारुश्च तत्समं ॥ बाकुचीद्वादशपलं दार्वीस्यात् पल विंशतिः ॥ १६ ॥ त्रिफला विंशति
पलान्यष्टद्रोणेंभसः पचेत् ॥ कषाये द्रोणशेषे च पूते शीते विनिक्षिपेत् ॥ १७ ॥
तुलाद्वयं माक्षिकस्य तुलैका शर्करा मता ॥ धातक्या विंशति पलं कंकोलं नागकेसरं ॥
॥ १८ ॥ जातीफलं लवंगं लाहकूपत्राणि पृथक् पृथक् ॥ पलोन्मितानि कृष्णायाः दद्या
त्पलचतुष्टयं ॥ १९ ॥ घृतभांडे विनिक्षिप्य मासादूर्ध्वं पिबेन्नरः ॥ महाकुष्टानि हृद्रोगं

७१

पांडुरोगार्बुदं तथा ॥ गुल्मग्रंथीन् कृमीन्कासं तथा प्लीहोदरं जयेत् ॥ एषवै खदिरा
रिष्टः सर्वकुष्टीनिवारणः ॥११॥ ॥ खदिरारिष्टः ॥ तुलार्द्धं पंचबबुल्याश्चतु द्रोणे
जले पचेत् ॥ द्रोणशेषे रसे शीते गुडस्य त्रितुलां क्षिपेत् ॥१२॥ धातकी षोडशापलं कृ
ष्णाचद्विपलांशकान् ॥ जातीफलानि कं कोलमेलात्वकपत्रकेसरं ॥१३॥ लवंगं म
रिचं चैव पलिकान्युपकल्पयेत् ॥ शुभे भांडे स्थितं मासं बबुल्यारिष्टको जयेत् ॥
॥१४॥ शुभे मांडे स्थितं ~~[illegible]~~ क्षयकुष्टमतीसारप्रमेहं श्वासकासजित् ॥१५॥ ॥
बबुल्यारिष्टः ॥ ॥ द्राक्षातुलार्धं द्वे द्रोणे जलस्य विपचेत्सुधीः ॥ पादशेषे कषा
ये च पूते सीते विनिक्षिपेत् ॥१६॥ गुडस्य द्वितुलां तत्र तत्र त्वगेलापत्रकेसरं ॥ प्रियं
गुमरिचं कृष्णा विडंगं चेति चूर्णयेत् ॥१७॥ पृथक्पलोन्मितै भागैस्ततो भांडे निधा
रयेत् ॥ स्थापयित्वा ततो मासे पिबेज्जातरसं तथा ॥१८॥ उरःक्षतं क्षयं हंति कासं श्वासं

गल्लामयान्॥ द्राक्षारिष्टद्वयः प्रोक्तो बलकृन्मलशोधनः॥१९॥ ॥द्राक्षारिष्टः॥ ॥
रोहीतकतुलामेकां चतुर्द्रोणजले पचेत्॥ पादशेषे जले पूते शीते पलशतद्वयं॥२०॥ दद्या
द्गुडस्य धातक्याः पलषोडशिकामता॥ पंचकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत्॥२१॥ चू
र्णयित्वा पलांशेन ततो भांडे निधारयेत्॥ मासादूर्ध्वं च पिबतां गुदजा यांति संक्षयं॥२२॥ ग्र
हणी पांडुहृद्रोगं प्लीहगुल्मोदराणि च॥ कुष्टशोथारुचिहरो रोहितारिष्टसंज्ञिता॥२३॥ ॥
रोहितारिष्टः॥ ॥ पण्र्यो बृहत्योगोकं गोबिल्वाग्निमंथ्यनोरलुः॥ पाटलाश्मरी चोत्तीद
त्रामूलमिहोच्यते॥२४॥ दशमूलानि कुर्वीत भागैकं च पलैः पृथक्॥ पंचविंशत्पलं कुर्या
च्चित्रकं पोष्करं तथा॥२५॥ कुर्याद्विंशत्पलं लोध्रं गुडूचीं तत्समां भवेत्॥ पलैः षोडशभि
र्धात्री रविसंख्यैर्दुरालभा॥२६॥ खदिरो बीजसारश्च पथ्या चेति पृथक्पलैः॥ अष्टभि
र्गुणितं कुष्टं मंजिष्टा देवदारु च॥२७॥ विडंगं मधुकं भार्गी कपित्थाक्ष्य पुनर्नवा॥ चव्यं मां
सी प्रियंगुश्च सारिवा कृष्णजीरकं॥२८॥ त्रिवृतारेणुका रास्ना पिप्पली क्रमुकं सठी॥ ह

रिद्रा त्वग्मपुष्पा च पद्मकं नागकेसरं ॥ २९ ॥ मुस्तमिंद्रयवा भृंगी जीवकर्षभकौ तथा ॥
मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके ॥ ३० ॥ कुर्यात्स्थपकू द्विपलिकान्पचेदष्टगुणे ज
ले ॥ चतुर्थांशं स्रुतं नीत्वा मृद्भांडे संनिधापयेत् ॥ ३१ ॥ ततः षष्टिपलान् द्राक्षान् पचेन्नीरे च
तुर्गुणे ॥ त्रिपादशेषशीतं च पूर्वक्वाथे स्रुतं क्षिपेत् ॥ ३२ ॥ द्वात्रिंशत्पलिकं क्षौद्रं दद्याद्गु
डचतुःशतं ॥ त्रिंशत्पलानि धातक्याः कंकोलं जलचंदने ॥ ३३ ॥ जातीफलं लवंगं च त्वगे
लापत्रकेसरं ॥ पिप्पली चेति संचूर्ण्य भागैर्द्विपलिकैः पृथक् ॥ ३४ ॥ शाणमात्रां च कस्तू
रिं सर्वमेकत्र निक्षिपेत् ॥ भूमौ निखानयेद्भांडं ततो जातरसं पिबेत् ॥ ३५ ॥ कनकस्य फ
लं क्षिप्त्वा रसं निर्मलतां नयेत् ॥ ग्रहणीमरुचीं शूलं श्वासकासभगंदरान् ॥ ३६ ॥ वातव्या
धीं क्षयं छर्दीं पांडुरोगं च कामलां ॥ कुष्ठान्यर्शांसि मेहांश्च मंदाग्निमुदराणि च ॥ ३७ ॥ शर्क
रामश्मरीं मूत्रकृच्छ्रं धातुक्षयं जयेत् ॥ कृशानां पुष्टिजननो वंध्यानां पुत्रदः परं ॥ ३८ ॥ आ
रिष्टो दशमूलाख्यस्तेजःशुक्रबलप्रदः ॥ आसवारिष्टविख्यातं गुणकृद्रोगनाशनं ॥ ३९ ॥

॥ ॥इति द्राक्षासवारिष्टः॥ ॥इति श्रीरामो॰शा॰वि॰चिकित्सास्थाने आसवारिष्टकल्पनाध्यायः॥ ॥ ॥अथ धातुशोधनं॥ ॥सुवर्ण तार ताम्रार नाग वंगो च तीक्ष्णकं॥ धातवः सप्त विज्ञेयास्ततस्तान् शोधयेद्बुधैः॥४०॥ स्वर्णतारारताम्राणां पत्राण्यग्नौ प्रतापयेत्॥ निषिंचयेत्तानि तप्तानि तैले तक्रे च कांजिके॥४१॥ गोमूत्रे च कुलित्थानां कषाये च त्रिधा त्रिधा॥ एवं स्वर्णादिलोहानां विशुद्धिः स्यात् संप्रजायते॥४२॥ नागवंगौ प्रतप्तौ च गालितौ तौ निषेचयेत्॥ त्रिधा त्रिधा विशुद्धिः स्यात् रविदुग्धेन च त्रिधा॥४३॥ ॥अथ धातुवधे स्वर्णमारणं॥ ॥स्वर्णस्याद्द्विगुणं सूतमम्लेन सह मर्दयेत्॥ न होलकसमं गंधं निदध्यादधरोत्तरं॥४४॥ गोलकं च ततो रुध्वा शरावदृढसंपुटे॥ त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश॥४५॥ निरुत्थं जायते भस्म गंधो देयः पुनः पुनः॥४६॥ ॥अथ पथ्यापरो विधिः॥ ॥कांचने गालिते नागं षोडशांशं विनिक्षिपेत्॥४७॥ चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा च गोलकं॥ गोलकेन

समंगंधंदत्वाचैवाधरोत्तरं॥४८॥ तारावसंपुटेध्मात्वापु[illegible]टेत्त्रिंशद्वनोत्पलैः॥
एवंसप्तपुटैर्हेमंनिरुत्थंभस्मजायते॥४९॥ शिलागंधार्कदुग्धाक्तस्वर्णपत्राणिलेप
येत्॥ भ्रीयंतेद्वादशपुटैःसत्यंगुरुवचोयथा॥५०॥ ॥अन्यच्च॥ ॥कांचनाररसे
र्घृष्टासमसूतकगंधयोः॥ कज्जल्याहिमपत्राणिलेपयेत्समयातथा॥ कांचनारि
त्वचःकल्कमूषायुग्मंप्रकल्पयेत्॥ घृत्वातत्संपुटेगोलंमन्मूषासंपुटेपचेत्॥५२॥
विधायसंधिरोधंचकृत्वासंशोष्यगोलकं॥ वह्निंखरतरंकुर्यात्द्वदंदघासु[illegible]टत्रयं
॥५३॥ निरुत्थंजायतेभस्मसर्वकार्येषुयोजयेत्॥ कांचनारिप्रकारेणलांगलीहंति
कांचनं॥५४॥ ज्वालामुखीतथाहन्यात्तथाहंतिमनःशिला॥ ॥अन्यच॥ शिलासिं
दूरयोश्चूर्णंसमयोरर्कदुग्धकैः॥५५॥ सप्तधाभावनांदद्यात्शोषयेच्चपुनःपुनः॥
॥तेनस्वुगोलितेहेम्नीकल्कोपंईयतेसमः॥५६॥ पुनर्धर्मेदत्तितरांपथाकल्काविली
पयेत्॥ एवंवेलात्रयंदद्यात्कल्कंहेममृत्तिभवेत्॥५७॥ ॥तथाच॥ ॥पारावतम

७४

लेलिंपेद्दथवा कुक्कुरोद्भवैः॥ हेमपत्राणि मे तेषां प्रदद्यादधरोत्तरं॥ गंधचूर्ण
समं कृत्वा शरावयुगसंपुटे॥ प्रदद्यात्कुक्कुटपुटं पंचभिर्गोमयोपलैः॥५९॥ एवं नव
पुटं दद्याद्दशमं च महापुटं॥ त्रिंशद्वनोपलैर्देयं जायते हेमभस्मसात्॥६०॥ ॥अ
थ तारमारणं॥ ॥भागैकं तालकं मर्द्यं याममम्लेन केनचित्॥ तेन भागत्रयं ता
रंपत्राणि परिलेपयेत्॥६१॥ धृत्वा मूषापुटे रुध्वा पुटेत्त्रिंशद्वनोपलैः॥ समुध्वस
पुनस्तावद्दत्वा रुध्वा पुटे पचेत्॥६२॥ एवं चतुर्दशपुटैस्तारं भस्म प्रजायते॥ ॥
अन्यच्च॥ ॥स्नुहिक्षीरेण संपिष्ट्वा माक्षिकं तेन लेपयेत्॥ तालकस्य प्रकारेण ता
रपत्राणि बुद्धिमान्॥ पुटेच्चतुर्दशपुटैः स्तारं भस्म प्रजायते॥६४॥ ॥अथ ताम्र
मारणं॥ ॥सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः॥ वासरत्रयमम्लेन ततः
खल्वे विनिक्षिपेत्॥६५॥ पादांशं सूतकं दत्वा याममम्लेन मर्दयेत्॥ तत उध्वस
पत्राणि लेपयेद्द्विगुणेन च॥६६॥ गंधकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकं॥ ते

७४

149

तः पिष्टाच मीनाक्षी चांगेरी वा पुनर्नवं ॥६७॥ तत्कल्केन बहिर्गोलं लेपयेद्द्व्यंगुलो
न्मितं ॥ धृत्वान द्रोलकं भांडे शरावेन च रोधयेत् ॥६८॥ वालुकाभिः प्रपूर्याथ विभूतिल
वणांबुभिः ॥ दत्वा भांडमुखे मुद्रां ततश्चुल्यां विपाचयेत् ॥६९॥ क्रमवृद्धाग्निना सम्यक् कु
पाव द्याम चतुष्टयं ॥ स्वांगशीतं समुद्धृत्य समर्दये सुरणद्रवैः ॥७०॥ दिनैकं गोलकं कु
र्यात्तु दूर्ध्वं गंधलेपयेत् ॥ सघृतेन ततो मूषागतं गजपुटं पचेत् ॥७१॥ स्वांगशीतं
समुद्धृत्य सम्यक् तंताम्रं शुभं भवेत् ॥ वांतिभ्रांतिक्लमेरेचं न करोति कदाचन ॥७२॥ ॥
अथारमारणं ॥ ॥ अर्कक्षीरेण संपिष्टो गंधकस्तेन लेपयेत् ॥ समेनारस्य पात्रा
णि शुद्धान्यम्लेद्रवैर्मुहुः ॥७३॥ ततो मुषापुटे धृत्वा पचेद्गजपुटेन च ॥ एवं पुटद्वये
नैव भस्मारं भवति ध्रुवं ॥७४॥ आरवत्कांसमप्येवं भस्म तां याति निश्चितं ॥ अर्कक्षी
रवटाश्वत्थक्षीरं नि गुंडिका तथा ॥७५॥ सा ताम्ररीतिनिवधे सम गंधकयोगतः ॥
॥ ॥ अथ नागमारणं ॥ ॥ तांबूलीरससंपिष्टशिलालेपात्पुनः पुनः ॥ द्वात्रिंश

७५

द्भिः पुटैर्नागो निरुत्थो याति भस्मतां॥७६॥ ॥अन्यच्च॥ ॥अश्वत्थचिंचात्वक्चू
र्णं चतुर्थांशेन निक्षिपेत्॥ मृत्पात्रे द्राविते वंगे चिंचाश्वत्थ विद्रुतं नागं लोहदर्व्या विचा
लयेत्॥ यामैकेन भवेद्भस्म तत्तुल्या च मनःशिला॥ कांजिकेन द्वयं पिष्ट्वा पचेद्दृढ
पुटेन च॥७८॥ स्वांगशीतं पुनः पिष्ट्वा शिलायां कांजिकेन च॥ पुनः पुटेच्छरावाभ्यां ए
वं षष्टिपुटैर्मृतिः॥७९॥ ॥अथ वंगमारणं॥ ॥मृत्पात्रे द्राविते वंगे चिंचाश्वत्थत्व
चोरजः॥ क्षिप्त्वा क्षिप्त्वा चतुर्थांशं अयोदर्व्या प्रघर्षयेत्॥८०॥ ततो द्वियाममात्रेण वंग
भस्म प्रजायते॥ अथ भस्मसमं तालं क्षिप्त्वाम्लेन प्रमर्दयेत्॥८१॥ ततो गजपुटैः पक्वो
वंगस्तु म्रियते ध्रुवं॥८२॥ ॥अथ लोहमारणं॥ ॥शुद्धं लोहभवं चूर्णं पाताल
गरुडीरसैः॥ मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयं॥८३॥ पुटत्रयं कुमार्याश्च कुठा
राछिन्नकारसैः॥ पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्॥८४॥ ॥अन्यच्च॥ ॥
क्षिपेद्द्वादशांशेन दरदं तीक्ष्णचूर्णयेत्॥ मर्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्॥८५॥

७५

151

एवंसप्तपुटैर्भस्मसुलोहचूर्णमवाप्नुयात्॥ रसःकुठारच्छिन्नायाःपातालगरुडीरसैः॥८६॥
खल्वेनचार्कदुग्धेनतीक्ष्णस्यैवंमृतिर्भवेत्॥८७॥ ॥अन्यदपि॥ ॥सूतकाद्द्विगुणंगंधं
दत्वाकृत्वाचकज्जली॥ द्वयोःसमंलोहचूर्णंमर्दयेत्कन्यकाद्रवैः॥८८॥ यामयुग्मंततःपिं
डंकृत्वाताम्रस्यपात्रके॥ घर्मेधृत्वोरुबुकस्यपत्रैराच्छादयेद्बुधः॥८९॥ यामार्धंनोष्णता
भूयात्धान्यराशौन्यसेत्ततः॥ दत्वोपरिशरावंचत्रिदिनांतेसमुद्धरेत्॥९०॥ पिष्ट्वाचग
लयेद्वस्त्रादेवंवारितरंभवेत्॥ एवंसर्वाणिलोहानिस्वर्णादीन्यपिमारयेत्॥९१॥ शिला
गंधार्कदुग्धाक्ताःस्वर्णाद्याःसर्वधातवः॥ म्रीयंतेद्वादशपुटैःसत्यंगुरुवाक्योवचोयथा॥
॥९२॥ ॥अथधातुशोधनं॥ ॥माक्षिकंतुत्थकान्तंचनीलांजनशिलालकाः॥ रस
कश्चेतिविज्ञेयाएतेसप्तोपधातवः॥९३॥ ॥अथस्वर्णमाक्षिकमारणं॥ ॥माक्षि
कस्यत्रयोभागाभागेकंसैंधवस्यच॥ मातुलिंगद्रवैर्वापिजंबीरस्यद्रवैःपचेत्॥९४॥
चालयन्लोहपात्रेणयावत्ताम्रसुलोहितं॥ भवेत्ततस्तुसंशुद्धंम्रीयतेस्वर्णमाक्षिकं॥९५॥

कुलिक्षस्यकषायेणघृष्ट्वातैलेनवापुटेत् ॥ तत्रेणवाजमृत्रेणम्रीयतेस्वर्णमाक्षिकं ॥९६॥
॥ ॥अथताराभाक्षिकशोधनं ॥ ॥कर्कोटीमेषशृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनं ॥भावयेदात
पेतीव्रं विमलाशुध्यतिध्रुवं ॥९७॥ ॥अथतुत्थशोधनं ॥ ॥विष्टयामर्दयेत्तुत्थंमार्जा
रककपोतयोः ॥दशांशं टंकणंदत्वापचेल्लघुपुटेततः ॥९८॥पुटंदध्यात्पुटंक्षौद्रैर्देयंतुत्थं
विशुद्धये ॥९९॥ ॥अथअभ्रकशोधनमारणं ॥ ॥कृष्णाभ्रकंधमेद्वह्नौततःक्षी
रेविनिक्षिपेत् ॥ भिन्नपात्रंतुतत्कृत्वातंदुलीयाम्लयोर्द्रवैः ॥१००॥भावयेदष्टयामंतद्वं
शुध्यतिचाभ्रकं ॥ कृत्वाधान्याभ्रकंतत्तुशोषयित्वाचमर्दयेत् ॥१॥अर्कक्षीरैर्दिनंखल्वेच
क्राकारंचकारयेत् ॥ वेष्टयेदर्कपत्रैश्चसम्यग्गजपुटेपचेत् ॥२॥पुनर्मर्द्यंपुनःपाच्यं
सप्तवारंपुनःपुनः ॥ ततोवटजटाक्काथैस्तद्वद्देयंपुटत्रयं ॥३॥म्रीयतेनात्रसंदेहःसर्व
योगेषुयोजयेत् ॥ [illegible] तुल्यंघृतंमृताभ्रेणलोहपात्रेविपाचयेत् ॥४॥घृतेजीर्णे
तदभ्रंतुस [illegible] र्वयोगेषुयोजयेत् ॥ मृतंतदभ्रंहरेन्मृत्युंजरापलितनाशनं ॥५॥अनु

पानेश्च संयुक्तं तत्त्व व्याधिहरं परं ॥६॥ ॥अथान्यप्रकारः॥ ॥शुद्धं धान्याभ्र
कं मुस्ता शुंठी षड्भाग योजितं ॥ मर्दयेत् कांजिके नैव दिनं चित्रक जैरसैः॥७॥ ततो गज
पुटे दग्धात्तस्मादुद्धृत्य मर्दयेत्॥ त्रिफलावारिणा तद्वत् पुटेदेवं पुटे स्त्रिभिः॥८॥ बला
गोमूत्र मुसली तुलसी सूरण द्रवैः॥ मर्दितं पुटितं वह्नौ त्रिवेलं च व्रजेन्मृती॥९॥ ॥
अथान्यप्रकारः॥ ॥धान्याभ्रकस्य भागैकं द्वौ भागौ टंकणस्य च॥ पिष्ट्वा तद्ंधमूषायां रुद्ध्वा तीव्राग्निना पचेत्॥१०॥ स्वभाववीतलं चूर्णं सर्वयोगेषु योजयेत्॥ ॥अ
थ नीलांजनशोधनं॥ ॥नीलांजनं चूर्णयित्वा जंबीरद्रवभावितं॥ दिनैकमातपे शु
द्धं भवेत् कार्येषु योजयेत्॥११॥ एवं गैरीकं कासीसं टंकणानि वराटिका॥ शंखं तुरीव
कं कुष्ठं शुद्धिमायाति निश्चितं॥१२॥ ॥अथ मनःशीलाशोधनं॥ ॥पचेत् त्र्यहं मजात
मूत्रे दोलायंत्रे मनःशिलां॥ भावयेत् सप्तधा पित्तैरजायाः शुद्धिमृच्छति॥१३॥ ॥
अथ तालकशुद्धिः॥ ॥तालकं कणशः कृत्वा सं चूर्णं कांजिके पचेत्॥ दोलायंत्रेण

७७

यामेकं ततः कूष्मांडजैर्द्रवैः॥तिलतैलेपचेद्यामंयामंचत्रिफलाद्रवे॥एवंयंत्रेचतु
र्यामंपाच्यंशुध्यतितालकं॥१५॥ ॥अथरसकशुद्धिः॥ ॥नरमूत्रेतुगोमूत्रेसप्ता
हंरसकंपचेत्॥दोलायंत्रेणशुद्धस्यात्ततःकार्येषुयोजयेत्॥१६॥ ॥अथसत्वनिर्ग
मः॥ ॥लाक्षामिनाःपयश्छागटंकणंमृगशृंगकं॥पिण्याकंसर्षपाःशिग्रुगुंजो
र्णागुडसैंधवैः॥१७॥पवतिक्वाथनंक्षौद्रंयथालाभंविचूर्णयेत्॥एभिर्विमिश्रि
ताःसर्वेधातवोगाढवह्निना॥१८॥मूषाध्माताःप्रजायंतेमुक्तसत्वानसंशयः॥
॥१९॥ ॥अथरत्नानांशोधनमारणं॥ ॥कुलिथंकोद्रवक्काथदोलायंत्रेविपाच
येत्॥व्याघ्रीकंदगतंवज्रंत्रिदिनंशुद्धिमृच्छति॥२०॥नप्रंतप्रंचनद्वज्रंखरमूत्रेवि
पाचयेत्॥पुनस्ताप्यंपुनःसेच्यमेवंकुर्यात्त्रिसप्तधा॥मत्कुणैस्तालकंपिष्ट्वायावद्
वनिगोलकं॥नदोलेनिहितंवज्रंनदोलबाधितंधमेत्॥२२॥सेचयेदश्वमूत्रेण
तद्वालीचपुनःक्षिपेत्॥रुध्वाध्मानंपुनःसेच्यमेवंकुर्यात्त्रिसप्तधा॥२३॥एवंचेत्री

पते वज्रं चूर्णं सर्वत्र योजयेत् ॥२४॥ ॥अन्यदपि॥ ॥हिंगुसैंधवसंयुक्ते क्वा
थे कौलथ्यजे क्षिपेत् ॥ तप्तं तप्तं पुनर्वज्रं भूयाच्चूर्णं त्रिसप्तधा ॥२५॥ ॥अन्यच्च॥
॥ ॥मंडूकं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः ॥ सतोभिमूत्रयेत्तत्र तन्मूत्रे कुलि
मावपेत् ॥२६॥ तप्तं तप्तं पंचबहुधा वज्रस्य वंमृतिर्भवेत् ॥२७॥ ॥अथ वैक्रांत
मारणं॥ ॥वैक्रांतं वज्रवत्साध्यं नीलं वा लोहितं तथा ॥ हयमूत्रेण तत्सेव्यं तप्तं
तप्तं द्विसप्तधा ॥२८॥ ततस्तु मेषदुग्धास्तु पंचांगे गोलके क्षिपेत् ॥ पुटेन्मूषा या
पुटे रुध्वा कुयादेवं द्विसप्तधा ॥२९॥ वैक्रांतं भस्मतां याति सर्वस्थाने नियोज
येत् ॥३०॥ ॥अथ शेषरत्नशोधनमारणं॥ ॥स्वेदयेद्दोलिकायंत्रे जयंत्याः
स्वरसेन च ॥ मणिमुक्ताप्रवालानि यामैके शोधनं भवेत् ॥३१॥ कुमार्या तंदु
लीयेन स्तन्येन च निषेचनात् ॥ प्रत्येकं सप्तवेलं च तप्तं तप्तानि कृत्स्नशः ॥३२॥
मणिमुक्ताप्रवालानि तथा रत्नान्यशेषतः ॥ क्षुण्णं द्विविधवर्णानि म्लीयंते नात्र

७८

संशयः॥३३॥ उक्तमाक्षिकवन्मुक्ताप्रवालानि च मारयेत्॥ वज्रवत्सर्वरत्नानि शो

धयेन्मारयेत्तथा॥३४॥ ॥अथ शिलाजतुशोधनं॥ ॥हेमाद्याः सूर्यसंतापाद्र

वं ति गिरिधातवः॥ तच्चांभोमृदु मृत्स्नाभं नद्रवेच्च शिलाजतु॥३५॥ शिलाजतु समा

नीयं ग्रीष्मतप्तशिलाच्युतं॥ गोदुग्धे त्रिफलाक्वाथे भृंगद्रावैश्च मर्दयेत्॥३६॥ आ

तपे दिनमेकैकं तच्छुष्कं शुद्धतां व्रजेत्॥३७॥ ॥अथान्यः शिलाजतुशुद्धकरणप्रका

रः॥ ॥मुख्यां शिलाजतुशिलां सूक्ष्मखंडप्रकल्पितां॥ निक्षिप्यात्युष्णपानीये यामे

कं स्थापयेत्सुधीः॥३८॥ मर्दयित्वा ततो नीरं गृहीत्वा हि वस्त्रगालितं॥ स्थापयित्वा च मृत्पा

त्रे धारयेदातपे बुधः॥३९॥ उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके॥ धारयेदातपे

तस्मादुपरिस्थं घनं नयेत्॥४०॥ एवं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजतु॥ भस्माल्प

यक्षमं बहो क्षिप्तं लिंगोपमं भवेत्॥४१॥ निर्धूमं चूर्णितं शुद्धं सर्वकर्मसु योजयेत्॥ अध

स्थितं च यत्तत्र शोषं तस्मिन्नीरं विनिक्षिपेत्॥४२॥ विमर्दधारयेत्धर्मे पूर्ववच्चैव तत्तन

७८

येत्॥ ॥अथमंडूरकरणं॥ ॥अक्षांगारैर्धमेत्किट्टं लोहजं तद्द्रवां जलैः॥ सेचयेत्त
प्तत्पंचसप्तवारं पुनः पुनः॥४३॥ चूर्णयित्वा ततः क्वाथे द्विगुणे त्रिफलोद्भवे॥ आलो
ड्य भर्जयेद्वह्नौ मंडूरं जायते वरं॥४४॥ ॥अथक्षारकल्पना॥ ॥क्षारवृक्षस्य काष्ठा
नि शुष्काण्यग्नौ प्रदीपयेत्॥ नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे॥४५॥ विमर्द्य धा
रयेद्रात्रौ प्रातः स्वच्छजलं नयेत्॥ तन्नीरं क्वाथयेदग्नौ यावत्सर्वं विशुष्यति॥४६॥ ततः पा
त्रात्समुल्लिख्य क्षारो ग्राह्यः सितप्रभः॥ चूर्णाभः प्रतिसार्यः स्यात्सपेयः क्वाथवत्स्थितः
॥४७॥ इति क्षारद्वयं धीमान्युक्तकार्येषु योजयेत्॥४८॥ ॥इति श्रीरा॰ज्ञा॰ चिकित्सा
स्थाने धातुशोधनमारणक्षारकल्पनोध्यायः॥ ॥ ॥पारदः सर्वरोगाणां जेता पु
ष्टिकरः परः॥ सूतेन साधितः कुर्यात्संसिद्धिं देहलोहयोः॥४९॥ रसेंद्रः पारदः सूतो ह
रजः सूतको रसः॥ कुमुदश्चेति नामानि ज्ञेयानि रसकर्मसु॥५०॥ ताम्रतारारनागाश्च
हेमवंगौ च तीक्ष्णकं॥ कांस्यकं खरलोहं च धातवो नव ये स्मृताः॥५१॥ सूर्यादीनां ग्रहा

नां नेक पिना नामभिः क्रमात् ॥५२॥ ॥अथ रससंशोधनं॥ ॥राजीं रसोनमू
षायां रसं क्षिप्त्वा विबंधयेत् ॥ वस्त्रेण दोलिकायंत्रे कांजिके स्थापयेत्र्यहं ॥५३॥ दि
नेक मर्दयेत्सूतं कुमारीसंभवै द्रवैः ॥ तथा चित्रकजैः क्वाथै मर्दयेदेकवासरं ॥५४॥
काकमाचीरसैस्तद्वद्दिनमेकं च मर्दयेत् ॥ त्रिफलायास्तथा क्वाथे रसो मर्द्यः प्रयत्नतः ॥
॥५५॥ ततस्तेभ्यः पृथक्कुर्यात्सूतं प्रक्षाल्य कांजिकैः ॥ ततः क्षिप्त्वा रसं खल्वे रसाद्धर्धं च
सैंधवं ॥५६॥ मर्दयेन्निंबुकरसैर्दिनमेकं मनारतं ॥ ततो राजीरसोनं च मुख्यं च नव
सादरः ॥५७॥ एतै रससमैः खल्वे सूतो मर्द्यस्तुषांबुना ॥ ततः संशोध्य चक्राभं कृत्वाली
प्ता च हिंगुना ॥५८॥ द्विस्थालीसंपुटे ध्वा पूरयेल्लवणेन च ॥ अधः स्थालीततो मु
द्राद्द्याद्दृढतरां बुधा ॥५९॥ किंचोष्णाग्निं विधायाधो निषिंचेदंबुनोपरि ॥ ततस्तु कु
र्यात्तीव्राग्निं तद्धधः प्रहरत्रयं ॥६०॥ एवं निपतया दूर्ध्वं रसो दोषविवर्जितः ॥ अधो
र्ध्वपिठरमध्ये लग्नो ग्राह्यो रसोत्तमः ॥६१॥ ॥अथ गंधकशोधनं॥ ॥लोहपा

त्रेविनिःक्षिप्यघट्टनमग्नौ प्रतापयेत् ॥ तप्तेघट्टनेनतत्समानंक्षिपेद्गंधकजंरजः ॥ ६२ ॥
विद्रुतंगंधकंज्ञात्वादुग्धमध्येविनिःक्षिपेत् ॥ एवंगंधकशुद्धिःस्यात्सर्वकार्येषुयोज
येत् ॥ ६३ ॥ ॥ अथदरदशोधनं ॥ ॥ मेषीक्षीरेणदरदंमम्लवर्गैश्चभावितं ॥ स
प्तवारंप्रयत्नेनशुद्धिमायातिनिश्चितं ॥ ६४ ॥ ॥ अथदरदाद्रसाकृष्टिः ॥ ॥
निंबूरसेर्निंबपत्ररसेर्वायाममात्रकं ॥ पिष्ट्वादरदमूर्ध्वंचपातयेत्सुतपुक्तिवत् ॥
॥ ६५ ॥ ततःशुद्धरसस्तस्माद्रसकार्येषुयोजयेत् ॥ ६६ ॥ ॥ अथशुद्धरसस्यमुख
करणं ॥ ॥ कालकूटोवत्सनागःशृंगकश्चप्रदीपनः ॥ हलाहलोब्रह्मपुत्रोह
रिद्रःशक्तुकस्तथा ॥ ६७ ॥ सौराष्ट्रिकइतिप्रोक्ताविषभेदाअमीनव ॥ अर्कधत्तूरस्ने
हुंडालांगलीकरवीरकाः ॥ ६८ ॥ गुंजाहिफेनाविसेनाःसप्तोपविषजातयः ॥ एतैर्बिम
र्दितःसूतःछिन्नपक्षःप्रजायते ॥ ६९ ॥ मुखंचजायतेतस्यधातूंश्चग्रसतेत्वरा ॥ ७० ॥

॥ ॥अन्यदपि॥ ॥अथवा त्रिकटुक्षारौ राजी लवणपंचकं॥ रसोनो नवसारश्च शिग्रु
श्चैकत्र चूर्णितैः॥७१॥ समांशैः पारदं दत्त्वा जंबीरेण द्रवेण च॥ निंबुतोयैः कांजिके वा सोष्ण
खल्ले विचूर्णयेत्॥७२॥ अजाशकृत्तुषाग्नौ तु स्तु गर्ते तत्र निक्षिपेत्॥ तस्योपरि स्थितं
खल्वं तत्र खल्वे चामिदं भवेत्॥७३॥ ॥अन्यदपि॥ ॥अथवा बिदुरीकीटै रसो मर्दः
स्त्रिवासरं॥ लवणाम्लैर्मुखं तस्य जायते धातुघस्मरं॥७४॥ ॥अथ गंधकजारणं॥
॥ ॥अथ कच्छपयंत्रेण गंधकजारणमुच्यते॥ ॥मृत्कुंडे निक्षिपेन्नीरं तन्मध्ये च
शरावकं॥ मृत्कुंडं पिधानाभं मध्ये मेखलयान्वितं॥ क्षिप्त्वा च मेखलामध्यं चूर्णेनात्र
रसं निक्षिपेत्॥ रसस्योपरि गंधस्य रजो दद्यात्समांशकं॥ दत्वोपरि शरावं च भस्ममुद्रां प्र
दापयेत्॥ तस्योपरि पुटं दद्याच्चतुर्भिर्गोमयोपलैः॥७७॥ एवं पुनः पुनर्गंधं षड्गुणं
जारयेद्बुधः॥ गंधे जीर्णे भवेत्सूतस्तीक्ष्णाग्निः सर्वकर्मसु॥७८॥ ॥अथ रससमारणं॥ ॥
धूमसारं रसं तारीं गंधकं नवसादरं॥ पामैकं मर्दयेदम्ले भागं कुलाससमं समं॥७९॥ का
चकुप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया॥ विलिप्य परितो वक्त्रे मुद्रां दत्वा च शोषयेत्॥८०॥

अधः सच्छिद्रपिठरीमध्ये कूपिं निवेशयेत्॥ पिठरीं वालुकापूरे भर्त्वा चाकूपिकागलं॥८१॥ निवेश्य चूल्यां तदधः कुर्याद्वह्निं शनैः शनैः॥ तस्मादप्यधिकं किंचित्तावकं दापयेत् क्रमात्॥८२॥ एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः॥ स्फोटयेत्स्वांगशीतं तत्र मूर्ध्वगं गंधकं त्यजेत्॥८३॥ अधस्थमसूतं च सर्वकर्मसु योजयेत्॥८४॥ ॥ ॥तथा च॥ ॥अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत्॥ तत्संपुटे न्यसेत्सूतं मलयूदुग्धमिश्रितं॥८५॥ द्रोणपुष्पीप्रसूनानि विडंगमिरिमेदकः॥ एतच्चूर्णमधोर्ध्वं च दत्वा मुद्रां प्रदीयते॥८६॥ तं गोलं मुद्रयेत्सम्यक् मृन्मुखा संपुटे सुधीः॥ मुद्रां दत्वा शोषयित्वा तं गजपुटे पचेत्॥८७॥ एवमेकपुटेनैव जायते भस्म सूतकं॥ ॥काकोदुंबर॥ ॥ ॥ ॥अन्यदपि॥ ॥काकोदुंबरिकादुग्धे रसं किंचिद्विमर्दयेत्॥ क्षिप्त्वा तत्संपुटे सूतं मुद्रेत्त तत्र मुद्रांतद्दुग्धघृष्टहिंगोश्च मूषायुग्मं प्रकल्पयेत्॥ क्षिप्त्वा तत्संपुटे सूतं [illegible] ... प्र[illegible]दापयेत्॥८८॥ घृष्ट्वा तत्संपुटं प्राज्ञो मृन्मुखासंपुटे दृढे॥ पचेन्मृदुपुटेनैव सूतको याति भस्मतां॥८९॥ ॥अन्यच्च॥ ॥नागवल्लीरसे घृष्टः कर्कोटीकंदगर्भितः ...

८१

तः॥ मृन्मुखा संपुटे पक्वः सूतो यासेव भस्मतां॥९०॥ ॥अथ ज्वरांकुशः॥ ॥खंड
येद्धारिणं शृंगं ज्वालामुख्यारसैः समं॥ रुध्वा भांडे पचेच्चूल्यां यामयुग्मं ततो न येत्॥
॥९१॥ अष्टांशं त्रिकटुं दद्यान्निष्कमात्रं च भक्षयेत्॥ नागवल्यारसैः सार्धं वातपित्तज्वराप
हं॥९२॥ अयं ज्वरांकुशो नाम रसः सर्वज्वरापहः॥९३॥ ॥अथ ज्वरारीरसः॥ ॥पारदं रस
कं तालं तुत्थं टंकणं गंधकं॥ सर्वमेतत्समं शुद्धं कारवेल्यारसैर्दिनं॥९४॥ मर्दयेल्लेपयेत्तेन
ताम्रपात्रोदरं भिषक्॥ अंगुल्यार्धप्रमाणेन ततो रुध्वा च तन्मुखं॥९५॥ पचेत्तं वालुकायं
त्रे शिखाधान्यानि तन्मुखे॥ यदा स्फुटंति धान्यानि तदा सिद्धिं च विनिर्दिशेत्॥९६॥ ततो
नमेत्स्वांगशीतं ताम्रपात्रोदराद्भिषक्॥ रसो ज्वरादिनामायं संचूर्ण्य मरिचैः समं॥
माषैकं कर्षखंडेन भक्षयेद्भार्गीये ज्वरे॥ त्रिदिने विषमं तीव्रमेकद्वित्रिचतुर्थकं॥९८॥
॥ ॥अथ शीतज्वरे॥ ॥तालकं तुत्थकं ताम्रं रसं गंधं मनःशिलां॥ कर्षं कर्षं प्रयोक्तव्यं म
र्द्येत्त्रिफलांबुभिः॥९९॥ गोलं न्यस्तं संपुटके पुटं दद्यात्प्रयत्नतः॥ ततो नीत्वार्कदुग्धेन चूर्णी

दुग्धेन सप्तधा॥१००॥ क्वाथेन हंसपाद्यामायाभावयेत्सप्तधा पुनः॥ मासमात्रं रसं दिव्य

८१

री

पंचाशन्मासिचैयुतिं ॥१॥ गुडुंगद्यानकं चैव तुलसीदलयुग्मकं ॥ भक्षयेत्त्रिदिनं भक्त्यारी नांडुलैर्भिरसं ॥२॥ पथ्यं दध्योदनं देयं विषमशीतपूर्वकं ॥ दाहपूर्वं हरसाभुतनीपकं चतुर्थकौ ॥३॥ दाहिकं सननं चैव वयैवर्ण्यं च निमच्छति ॥४॥ ॥अथ ज्वरघ्नी गुटिका॥ ॥

भागकैः स्याद्रसात्शुद्धात्द्वे च पिप्पलिकात्रयं ॥ आकारकरभाद्दंगंकटुतैलेनशोधितं ॥४॥ फलानि चेंद्रवारुण्यां चतुर्भागैर्मितान्यमा ॥ एकत्र मर्दयेच्चूर्णमिंद्रवारुणिकारसैः ॥५॥ माषोन्मितां गुटीं कृत्वा दद्यात्सद्योज्वरे बुधः ॥ छिन्नारसोनुपानेन ज्वरघ्नी गुटिकामता ॥६॥ ॥अथ लोकनाथो रसः॥ ॥शुद्धो बुभुक्षितः सूतो भागद्वयमितो भवेत् ॥ तथा गंधस्य भागौ द्वौ कुर्यात्कज्जलिकां तयोः ॥७॥ सुताच्च तुर्गुणे चैव कपर्दं बुविनिक्षिपेत् ॥ भागैकं टंकणं दत्वा गोक्षीरेण विमर्दयेत् ॥८॥ तथाशंखस्य खंडानां भागानष्टो प्रकल्पयेत् ॥ क्षिपेत्सर्वं पुरस्यात्चूर्णलिप्तशरावयोः ॥९॥ गर्ते हस्तोन्मिते धृत्वा पुटे दजपुटेन च ॥ स्वांगशीतं समुध्दृत्य पिष्ट्वा तत्सममेकतः ॥१०॥ षट्गुंजासंमितं चूर्णमेकोनत्रिंशदूषणैः ॥ घृतेन वातजे दद्यान्नवनीतेन पित्तजे ॥११॥ क्षौद्रेण श्लेष्मजे दद्या

८२

यतो नभः॥२३॥ [faint, partly visible line at top]

दनि सारेक्षयेत्तथा॥ अरुचौ ग्रहणी रोगे कार्श्ये मंदानले तथा॥१२॥ कासश्वासे षु गु

ल्मेषु लोकनाथरसं क्षिपेत्॥ तस्यापरि घृताभ्यंच भुंजीत कवलत्रयं॥१३॥ मंचे क्षणे क

त्मेषु लोकनाथरसं क्षिपेत्॥ तस्यापरि घृताभ्यंच भुंजीत कवलत्रयं॥१४॥ प्रायेण जां

मुत्तानः शायितानुपधानकं॥ अनम्लमन्नं भुंजीत घृतं च मधुरं दधि॥१४॥ प्रायेणजां

गलं मांसं प्रदेयं घृतपाचितं॥ सदुग्धभक्तं दद्याच्च जानेऽग्नौ साध्य भोजने॥१५॥ सघृता

म्लहृद्य वकान्व्यंजनेषु वचारयेत्॥ निलामलककल्केन स्नापयेत्सर्पिषाथवा॥१६॥ अ

भ्यंजयेत्सर्पिषा च स्नानं कोष्णोदकेन च॥ कचित्तैलं न गृह्णीयान्न बिल्वं कारवेल्लकं॥

॥१७॥ वृंताकं शफरीं चिंचां सजेद्व्यायाममैथुने॥ मद्यं संधानकं हिंगुसुंठीमाषान्म

सूरकं॥१८॥ कूश्मांडं राजिकं कोलं कांजिकं चैव वर्जयेत्॥ सजेद्दपुक्तं निद्रां च कांस्य

पात्रे च भोजनं॥१९॥ ककरादि च यत्सर्वं सजेच्छाकफलादिकं॥ ग्राह्यं लोकना

थस्तु शुभ नक्षत्र वासरे॥२०॥ पूर्णातिथौ शुक्लपक्षे यात्ते चंद्रबले तथा॥ पूजयित्वा

लोकनाथं कुमारीं भोजयेत्ततः॥२१॥ पूज [struck out: विप्र] दानं दत्वा च द्विघटिकां मध्ये ग्राह्यो

८२

रसोत्तमः॥ रसाद्धिजायतेतापस्तद्दाच्छर्करयायुतं॥२२॥ सतंगुडूच्यागरूपीपानवं
शालोचनयायुतं॥ खर्जूरंहाडिमंद्राक्षामिक्षुरवंडानिदापयेत्॥२३॥ उशीरचौनिस्तुषं
धान्यंघनभष्टसशर्करं॥ दद्यात्तथाज्वरेधान्यगुडूचीक्वाथमाहरेत्॥२४॥ उशी
रवासकक्वाथंदद्यात्समधुशर्करं॥ रक्तपित्तेकफेश्वासेकासेच्चस्वरसंक्षये॥२५॥
अग्निभ्रष्टंजयाचूर्णंमधुनानिशिदापयेत्॥ निद्रानाशेतिसारेवग्रहण्यांमंद
पावके॥२६॥ सौवर्चलाभयाकृष्णाचूर्णमुष्णोजलंपिबेत्॥ दूर्वायास्वरसंनस्यं
प्रदद्याच्छर्करायुतं॥२७॥ कोलमज्जाकणाबर्हिपक्षभस्मचशर्करं॥ मधुनालेह
येच्छर्दिंहिक्काकोपस्यशांतये॥२८॥ विधिरेवप्रयोक्तव्यःसर्वस्मिन्पोटलीरसे॥ मृगांके
हेमगर्भेचमौक्तिकाख्येपरेषुच॥२९॥ इत्येवलोकनाथोक्तोरसःसर्वरुजोजयेत्॥
॥३०॥ ॥अथमृगांकपोटलीरसः॥ ॥भूर्जवत्तनुपत्राणिहेम्नःसूक्ष्माणिकारये
त्॥ तुल्यानितानिसूतेनखल्वेक्षिप्त्वाविमर्दयेत्॥३१॥ कांचनारीरसेनैवज्वालामुखा

८३ ४८

रसेनच॥ लांगल्यावारसैस्तावद्यावद्द्रवतिपिष्टिका॥३२॥ ततोहे[illegible]चतुर्थांशंटंकणंतत्र
निक्षिपेत्॥ पिष्टेमौक्तिकचूर्णंच हेमद्विगुणमावपेत्॥३३॥ तेषुसर्वसमंगंधंक्षिप्त्वाचैकत्र
मर्दयेत्॥ तेषांकृत्वाततोगोलंवासोभिःपरिवेष्टयेत्॥३४॥ पश्चान्मृदावेष्टयित्वाशोषयित्वा
चधारयेत्॥ शरावसंपुटेस्थाप्यततस्तंमुद्रांप्रदापयेत्॥३५॥ लवणापूरितेभांडेधारयेत्तच्च
संपुटं॥ मुद्रांदत्वाशोषयित्वाबहुभिर्गोमयैःपुटेत्॥३६॥ ततःशीतेसमाकृष्यगंधंसूत
समंक्षिपेत्॥ घृष्ट्वाचपूर्ववत्तद्वत्स्वेपुटेगजपुटेनच॥३७॥ स्वांगशीतंततोनीत्वावाग्गुंजा
युग्मंप्रयोजयेत्॥ अष्टभिर्मरिचैर्युक्तःकृष्णात्रयसुतोथवा॥३८॥ बिलोक्यदेशाद्दोषादि
नेकाकाररसरक्षिका॥ सर्पिषामधुनावापिदद्याद्दोषाद्यपेक्षया॥३९॥ लोकनाथसमंपथ्यं
कुर्यात्त्विस्थमनाःशुचिः॥ श्लेष्माणंग्रहणीकासंश्वासंक्षयमरोचकं॥४०॥ मृगांकोयंरसं
हन्यात्कृशत्वंबलहानिंच॥४१॥ ॥अथहेमगर्भपोट्टलीरसः॥ ॥सूतात्पादप्रमाणेन
हेम्नःपिष्टिंप्रकल्पयेत्॥ ततोस्याद्विगुणोगंधोमर्दयेत्कांचनारिकैः॥४२॥ कृत्वागोलिलिप्ति

८३

पेन्मूखांसंपुटेन्मुद्रयेत्ततः॥पचेद्भूधरयंत्रेणवासरत्रितयंबुधः॥४३॥ततउध्धृत्य
त्सर्वंदद्याद्दुग्धंचतत्समं॥मर्दयेद्द्रवैकिरसैश्चित्रकस्यरसेनच॥४४॥स्थूलपिंडवराटां
श्चपूरयेत्तेनमुद्रितः॥एतस्माद्दोषधात्कुर्यादिष्टमात्रेणटंकणं॥४५॥टंकणार्धंविषंदत्वा
पिष्ट्वासेहुडदुग्धकैः॥मुद्रयेत्तेनकल्केनवराटांनामुखेनच॥४६॥भांडेचूर्णप्रलीप्तेथ
त्वमुद्रांप्रदापयेत्॥गर्तेहस्तोन्मितेधृत्वापुटेद्गजपुटेनच॥४७॥स्वांगशीतंरसंदत्वाग्र
दद्याल्लोकनाथवत्॥पथ्यंमृगांकवत्तज्ज्ञेयंत्रिदिनंलवणंत्यजेत्॥४८॥यद्वाछर्दीभवेत्तस्यद
द्याच्छिन्नाम्रतेनसा॥मधुयुक्तंतथाश्लेष्मकोपेदद्याद्गुडार्द्रकं॥४९॥विरेकेभजितोभृंगीत्र
देयादधिसंयुता॥उपेक्षासंक्षयंश्वाससंग्रहणीमरुचींतथा॥५०॥अग्निंचकुरुतेदीप्तंक
फवातंनियच्छती॥हेमगर्भपरोह्येषरसःपोटलिकाभिधः॥५१॥ ॥अथहेमगर्भपोटलि
कारसोद्वितीयः॥ ॥रसस्यभागाश्चत्वारस्तावतःकनकस्यच॥तयोश्चपिष्टिकांकृ[illegible]त्वागं
धोद्वादशभागिकः॥कुर्यात्कज्जलिकांतेषांमुक्ताभागाश्चषोडश॥चतुर्विंशश्चशंखस्यभा
गेकंटंकणस्यच॥५२॥एकत्रमर्दयेत्सर्वंपक्वनिंबुकजैरसैः॥कृत्वातेषांततोगोलंतन्मुखा

८४

मुद्रां दत्वा ततो हस्तमात्रे गर्ते च गोमयैः ॥ पुटे द्गजपुटेनैव स्वां
संपुटे न्यसेत् ॥ ५४ ॥ मुद्रां दत्वा ततो हस्तमात्रे गर्ते च गोमयैः ॥ पुटे द्गजपुटेनैव स्वां
गशीतं समुद्धरेत् ॥ ५५ ॥ पिष्ट्वा गुंजा चतुर्मानं दद्यात् द्व्याज्यसंयुतं ॥ एकोनत्रिंशद्
न्मानं मरिचैः सह दीयते ॥ ५६ ॥ राजते मृन्मये पात्रे कांचने वावलेहयेत् ॥ लोकनाथरस
मपथ्यं कुर्यात्प्रियते मानसः ॥ ५७ ॥ कासश्वासक्षयं वाते कफे ग्रहणिकागदे ॥ अतिसा
रे प्रयोक्तव्या पोटली हेमगर्भिका ॥ ५८ ॥ ॥ अथ महोदधिरसः ॥ ॥ सौभाग्यं त्रिफला
व्योषं तालगंधरसाम्रतं ॥ प्रत्येकमेकभागं च जैपालं सप्तभागिकं ॥ ५९ ॥ भृंगराजरसे
नैव किंशुकस्वरसेन वा ॥ पामयुग्मं विमर्द्याथ कुर्याद्गुंजोपमा वटी ॥ ६० ॥ अजीर्णं कट
कः सौपरसराजः समुच्यते ॥ ६१ ॥ ॥ अथ महाज्वरांकुशो रसः ॥ ॥ शुद्धसूतं विषं
गंधं प्रत्येकं शाणसंमितं ॥ धूर्तबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणा भवेत् ॥ हेमाह्वा कार
पेद्देषा चूर्णं सूक्ष्मं प्रयत्नतः ॥ द्यं जंबीरमज्जाभिश्चूर्णं गुंजाद्वयोन्मितं ॥ ६३ ॥ उष्णादक
स्यरसे वापि ज्वरं हंति त्रिदोषजं ॥ एकाहिकं द्व्याहिकं त्र्याहिकं वा चतुर्थकं ॥ ६४ ॥ विषमं
चज्वरं हन्याद्धिरव्यातो ज्वरांकुशः ॥ ६५ ॥ ॥ अथातिसारे आनंदभैरवः ॥ ॥ दरदं

८४

169

वत्सनागं च मरिचं टंकणं कणा ॥ चूर्णयेत्समभागेन रसो ह्यानंदभैरवः ॥ ६६ ॥ गुंजैकं वाद्वि
गुंजं वा बलं ज्ञात्वा प्रयोजयेत् ॥ मधुना लेहयेच्चानु कुटजस्य फलं त्वचं ॥ ६७ ॥ चूर्णितं कर्षमा
त्रं तु त्रिदोषोत्थातिसारजित् ॥ दध्यन्नं दापयेत्पथ्यं गवाजं तक्रमेव च ॥ ६८ ॥ पिपासायां ज
लं शीतं विजया च हिता निशि ॥ ६९ ॥ ॥ अथ द्वितीय आनंदभैरवः ॥ ॥ त्रिकटु त्रिफला
सूतं विषगंधकटंकणं ॥ भद्रमुस्तसमा युक्तं रसमानंदभैरवं ॥ ७० ॥ श्वासकासावजी
र्णं च ज्वरमष्टादिकं तथा ॥ गुल्मशूलं हरत्याशु गुंजैकं भक्षणादपि ॥ ७१ ॥ ॥ अथ लघुसू
चिकाभरणो रसः ॥ ॥ विषं पलमितं सूतं शाणिकं चूर्णयेद्द्वयं ॥ तच्चूर्णं संपुटे क्षिप्त्वा का
चलिप्तशरावयोः ॥ ७२ ॥ मुद्रां दत्वा च संशोष्य ततश्चूल्यां निवेशयेत् ॥ वह्निं शनैः शनैः कु
र्यात्प्रहरद्वयसंख्यया ॥ ७३ ॥ ततउध्धृत्य तन्मुद्रामुपरिस्थशरावके ॥ संलग्नो यो भवेत्सू
तस्तं गृह्णीयाच्छनैः शनैः ॥ ७४ ॥ वायुस्पर्शो यथा न स्यात्ततः कुप्यां निवेशयेत् ॥ यावत्सू
च्यामुखं लग्नं कूप्यां निपातिभेषजं ॥ ७५ ॥ तावन्मात्रो रसो देयो मूर्छिते सन्निपातिनी ॥

८५

क्षुरेण प्रच्छ्ते मूर्ध्नि तस्मिंश्च गुल्मावघर्षयेत् ॥ रक्तभेषजसंपर्कान्मूर्छितोऽपि हि जीवति ॥ यदा तापो भवेत्तस्य मधुरं तत्र दीयते ॥७६॥ तथैव सर्पदष्टस्तु मृतावस्थोऽपि जीवति ॥ भस्म सूतं समं गंधं गंधपादं मनःशिला ॥७७॥ ॥अथ जलचूडारसः॥ ॥चूर्णयेद्द्रावयेत्सिक्तं मर्दयेत्समापूते ॥ माक्षिकं पिप्पली व्योषं प्रसेकं शिलया सह ॥७८॥ तालपर्णीरसं चानु पंचकोलरसं भवेत् ॥ सप्तधा भावयेच्छुष्कं द्विगुंजाद्यं प्रहितं ॥७९॥ जलयोगश्च कर्तव्यस्तेन वीर्यं भवेत् ॥ जलचूडरसो नाम सन्निपातं नियच्छति ॥८०॥ ॥अथ पंचवक्त्रो रसः॥ ॥शुद्धसूतं विषं गंधं मरीचं टंकणं कणा ॥ धूर्तद्रवे ॥८१॥ मर्दयेद्धूर्तजैर्द्रावैर्दिनमेकं च शोषयेत् ॥८२॥ पंचवक्त्ररसो नाम द्विगुंजः सन्निपातनुत् ॥ अर्कमूलं कषायं तु सव्योषमनुपाययेत् ॥८३॥ युक्तं दध्योदनं पथ्यं जलयोगं तु कारयेत् ॥८४॥ मध्वार्द्रकरसं चानु पिबेद्दाहनिवृत्तये ॥ ॥अथ उन्मत्तभैरवो रसः॥ ॥रसे रसेनानेन शाम्यंति सस्तोद्रेणकफादयः ॥८५॥ ॥यथेष्टं घृतमांसाशी शक्तो भवति पावकः ॥

८५

गंधकं तुल्यांशं धत्तूरफलजैरसैः ॥ मर्द्दयेद्दिनमेकं तु तत्तुल्यं त्रिकटु क्षिपेत् ॥ ८६ ॥ उन्मत्ता
ख्यो रसो नाम्ना नस्ये स्यात्सन्निपातजित् ॥ निस्तुषं जैपालबीजं यद्दनिष्कं च चूर्णयेत् ॥ ८७ ॥ मरिचं
पिप्पलीसूतं प्रतिनिष्कं विनिक्षिपेत् ॥ मेर्द्दयेज्जंबीरजैर्द्रवैः सप्ताहं सप्रयत्नेन तः ॥ ८८ ॥ रसोयं
मंजनेहन्तः सन्निपातं विनाशयेत् ॥ ८९ ॥ ॥ अथ नाराचो रसः ॥ ॥ सूतं टंकणकं तुल्यं मरि
चं सूतनतुल्यकं ॥ गंधकं पिप्पली सुंठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ ९० ॥ सर्वतुल्यं क्षिपेद्दंतीबी
जं निस्तुषितं भिषक् ॥ द्विगुंजं रेचनं शुध्दं नाराचोयं महारसः ॥ ९१ ॥ आध्मानं मलविष्टंभं
मुद्राव र्नं च नाशयेत् ॥ ॥ अथ इच्छाभेदी रसः ॥ ॥ टंकणं सुंठी पिप्पली चैव कार्षि
काः ॥ हेमाह्वा पलमात्रा स्याद्दंतीबीजं च तत्समं ॥ विचूर्ण्यैकत्र सर्वाणि गोदुग्धेनैव साध
येत् ॥ त्रिगुंजं रेचनं दद्या द्धि(?)भाध्मान रोगिषु ॥ ९३ ॥ ॥ अथ राजमृगांको रसः ॥ ॥
भस्मसूतात्त्रयो भागा भागैकं हेमभस्मकं ॥ मृततास्रस्य भागैकं शिलागंधकतालकं ॥ ९४ ॥
प्रतिभागद्वयं शुद्धं मेकीकृत्य विचूर्णयेत् ॥ वराटीः पूरयेत्तेन छागीक्षीरेण टंकणं ॥ ९५ ॥
पिष्ट्वा तेन मुखं वासां भांडे सन्निरोधयेत् ॥ शुष्कं गजपुटे पक्त्वा चूर्णयेत्स्वांगशीतलं ॥ ९६ ॥

८६

रसोराजमृगांकोयं च तुर्युंजः क्षयापहः॥ दद्यात्पिप्पलिकाक्षौद्रैः कासे त्रिदोषदूषणे॥ ९७॥ ॥
अथ श्वासकुठारो रसः॥ ॥ रसगंधौ विषं चैव टंकणं च मनःशिला॥ एतानि सम भागा
नि मरिचं चाष्टटंकक॥ ९८॥ एकैकं मरिचं दत्वा खल्वे सूक्ष्मं विधाय च॥ त्रिकटुटंकषट् कं च
दत्वा पश्चाद्धि चूर्णयेत्॥ ९९॥ सर्वमेकत्र संयोज्य काचकूप्यां विनिक्षिपेत्॥ श्वासे कासे च मंदा
ग्नौ तथा श्लेष्मामयेषु च॥ १००॥ गुंजामात्रं प्रदातव्यं पूर्णखंडेन बुद्धिमान्॥ सन्निपातेषु मूर्छा
यां अपस्मारे तथा पुनः॥ १॥ अतिमोहसमापन्ने नस्यं दद्याद्विचक्षण॥ रसः श्वासविकारोयं
सर्वश्वासविकारजित्॥ २॥ ॥ अथाग्नितुंडो रसः॥ ॥ शुद्धसूतं द्विधा गंधं कुर्यात्खल्वे
न कज्जलीं॥ तयोः समं तीक्ष्णलोहं मर्दयेत्कन्यकाद्रवैः॥ ३॥ द्वियामांते कृतं गोलं ताम्रपात्रे
विनिक्षिपेत्॥ अच्छाद्यैरंडपत्रेण यामार्धं यस्तु तां व्रजेत्॥ ४॥ धान्यराशौ न्यसेत्पश्चाद्दहोरा
त्रात्समुद्धरेत्॥ संपीष्य गालयेद्वस्त्रे स स्याद्वारितरं भवेत्॥ ५॥ त्रिकटु त्रिफलैलाभिर्जातीफ
ललवंगकैः॥ नवभागोन्मितैरेभिः समः पूर्वरसो भवेत्॥ ६॥ संचूर्ण्य पलोद्यत्क्षौद्रे भक्ष्ये
निष्कद्वयं द्वयं॥ अयमग्नितुंडो नाम्ना श्वासकासनिकृंतनः॥ ७॥ ॥ अथ सूर्यावर्तो रसः॥ ॥

८६

173

सूताधेगंधकोमर्द्येयामैकंकन्यकाद्रवैः॥ द्वयोस्तुल्यंताम्रपत्रंपूर्वकल्केनयोजयेत्
॥८॥ दिनैकंस्थालिकायंत्रेपक्वमाहृत्यचूर्णयेत्॥ सूपविनेरिसेम्सेष द्विगुंजःश्वासजिद्भवे
त्॥९॥ ॥अथस्वच्छंदभैरवोरसः॥ ॥शुद्धसूतंमृतंलोहंताप्यंगंधकतालकं॥ प
थ्याग्निमंथनिर्गुंडीत्र्यूषणंटंकणंविषं॥१०॥ तुल्यांशंमर्दयेत्खल्वेदिनंनिर्गुंडिकाद्रवैः
॥मुंडिद्रावैर्दिनैकंतुद्विगुंजवटिकाकृतं॥११॥ भक्षयेद्वातरोगार्त्तोनाम्नास्वच्छंदभैरवः
॥रास्नामृतादेवदारुशुंठीवातारिजंशृतं॥१२॥ सगुग्गुलंपिबेत्कोष्णंअनुपानंसुखा
वहं॥१३॥ ॥अथहंसपोटलीरसः॥ ॥दग्धान्कपर्दिकान्पिष्ट्वात्र्यूषणंटंकणंवि
षं॥गंधकंशुद्धसूतंचतुल्यंजंबीरजैर्द्रवैः॥१४॥ मर्दयेन्भक्षयेन्माषंमरिचाज्यंलि
हेदनु॥ निहंतिग्रहणीरोगंपथ्यंतक्रौदनंहितं॥१५॥ ॥अथत्रिविक्रमोरसः॥ ॥
मृतताम्रमजाक्षीरैःपाच्यंतुल्यंगतद्रवे॥ तत्ताम्रंशुद्धसूतंचगंधकंचसमंसमं॥१६॥
निर्गुंडीस्वरसेमर्द्यंदिनैकंगोलमंधयेत्॥ यामैकंवालुकायंत्रेपाच्यंभक्ष्यंद्विगुंजकं॥१७॥

८७

बीजपूरकमूलं च सजलं चानुपाययेत् ॥ रसस्त्रिविक्रमो नाम्ना माषैकं नाश्मरीप्रणुत् ॥१८॥
॥ ॥अथ महातालेश्वरो रसः॥ ॥तालं ताप्यं शिला सूतं शुद्धं सैंधवटंकणं॥ समांशं चू
र्णयेत् खल्वे सूता द्विगुणगंधकं ॥१९॥ गंधतुल्यं मृतं ताम्रं जंबीरैर्दिनपंचकं ॥ मर्दयेत् षड्भिः पु
टैः पाच्यं मूषरे संपुटोदरे ॥२०॥ पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत् तुषट्पलं ॥ द्विपलं मारितं ता
म्रं लोहभस्म चतुःपलं ॥२१॥ जंबीराम्लेन सत्त्वं वैरिनमर्द्यं पुटे लघुः॥ त्रिंशदंशं विषं चा
स्य क्षिप्त्वा सर्वं विचूर्णयेत् ॥२२॥ महिषाज्येन संमिश्रं निष्कार्धं भक्षयेन्नरः॥ मध्वाज्यैर्बाकुची
चूर्णं कर्षमात्रं लिहेदनु ॥२३॥ सर्वकुष्ठानि हंत्याशु महातालेश्वरो रसः ॥२४॥ ॥अथ
कुष्ठकुठारो रसः॥ ॥भस्मसूतं समो गंधो मृतायस्ताम्रगुग्गुलु ॥ त्रिफला च महा
निंबश्चित्रकश्च शिलाजतु ॥२५॥ एतेषां चूर्णितं कुर्यात् प्रत्येकं शाणषोडश॥ चतुःषष्टिकरंज
स्य बीजचूर्णं प्रकल्पयेत् ॥२६॥ चतुःषष्टिमितं चाम्रं मध्वाज्याभ्यां विलोडयेत् ॥ स्निग्धभांडे
घृतं खादेद्द्विनिष्कं सर्वकुष्ठनुत् ॥२७॥ रसः कुष्ठकुठारोयं गलत्कुष्ठनिवारणः ॥२८॥ ॥अथ

८७

175

उदयादित्योरसः॥ ॥शुद्धसूतं द्विधागंधं मर्दयेत्कन्याद्रवैर्दिनं॥ तद्गोलं पीठरीमध्ये ता
म्रपात्रेण रोधयेत्॥२९॥ सूतकात्त्रिगुणेनैव शुद्धेनाधोमुखेन च॥ पार्श्वे भूमिनिधायाथ
पात्रोर्ध्वं गोमयं जलं॥३०॥ किंचित्किंचित्प्रदातव्यं चूल्यां यामद्वयं पचेत्॥ चंडाग्निना तदुध्ध
त्य स्वांगशीतं विचूर्णयेत्॥३१॥ दिने कं उदयादित्यारसो देयो द्विगुंजकः॥ काष्ठोदुंबरिकावह्नि
त्रिफलाराजवृक्षकैः॥३२॥ विडंगं बाकुचीबीजं क्वाथयेत्तेन भावयेत्॥ दिनैकं मुदयादित्यो र
सो देयो द्विगुंजकः॥३३॥ विचर्चिकादद्रुकुष्टं मंडलं च विनाशयेत्॥ अनुपानं च कर्तव्यं बा
कुचीफलचूर्णकं॥३४॥ खादिरस्य कषायेण समेन परिपाचितं॥ त्रिशाणं तद्रवं क्षीरैः
क्वाथैर्वा त्रैफलैः पिबेत्॥३५॥ त्रिदिनांते भवेत्स्फोटसम्यग्लाहाहा किलासके॥ नीलीगुंजा च कासी
संधकं रंहंसपादिकां॥३६॥ सूर्यभक्तां च चांगेरी पिष्टा तुल्या निलेपयेत्॥ स्फोटस्थानं प्रशां
त्यर्थं सप्तपत्रे पुनः पुनः॥३७॥ श्वेतकुष्टं निहंत्याशु साध्यासाध्यं न संशयः॥३८॥ ॥अथ श्वि
त्रलेपः॥ ॥गुंजाफलाग्निचूर्णं च लेपितं सर्वकुष्टनुत्॥ शिलापामार्गभस्मापि लिह्या

८८

श्वित्रं विनाशयेत् ॥३९॥ ॥अथ सर्वेश्वरो रसः॥ ॥शुद्धं सूतं चतुर्गंधं पलया
मं विचूर्णयेत् ॥ मृतनागाभ्रलोहानां दरदं च पलं पलं ॥४०॥ सुवर्णं रजतं चैव प्रत्ये
कं दश निष्ककं ॥ माषैकं मृतवज्रं च तालसत्वं पलद्वयं ॥४१॥ जंबीरोन्मत्तवासाभि
कं दश निष्ककं ॥ माषैकं मृतवज्रं च तालसत्वं पलद्वयं ॥४१॥ जंबीरोन्मत्तवासाभि
र्नुह्यर्कविषमुष्टिभिः ॥ मर्दयेद्धयारिजैर्द्रावैः प्रत्येकं च दिनं दिनं ॥४२॥ एवं सप्तदिनं मर्दितं
त्रिलं वस्त्रवेष्टितं ॥ वालुकायंत्रगं स्वेद्यं त्रिदिनं लघुवह्निना ॥४३॥ आदाय चूर्णयेत्तत्र
क्ष्णं पलैकं योजयेद्विषं ॥ द्विपलं पिप्पलीचूर्णं मिश्रं सर्वेश्वरो रसः ॥४४॥ द्विगुंजो लिह्यते क्षौद्रैः
सुप्तिमंडलकुष्ठनुत् ॥ बाकुची देवकाष्ठं च कर्षमात्रं सुचूर्णयेत् ॥४५॥ लिहेदेरंडतैलाक्तम
नुपानं सुखावहं ॥ ॥अथ स्वर्णक्षीरी रसः॥ ॥हेमाह्वा पंचपलिकां क्षिप्त्वा तक्रघ
टे पचेत् ॥ तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् ॥४६॥ क्षीरे जीर्णे समुद्धृत्य क्षालयि
त्वा विशोषयेत् ॥ चूर्णितां पंचपलिकां मरिचानां पलद्वयं ॥४७॥ पलैकं मूर्छितं सूतं मेकीकृ
त्यानुभक्षयेत् ॥ निष्कैकं सुप्तिकुष्ठानां स्वर्णक्षीरी रसो ह्ययं ॥४८॥ ॥अथ मेहबंधो रसः॥ ॥

८८

भस्मसूतंमृतंकांतंमुंडभस्मशिलाजतु ॥ शुद्धताप्यंशिलाव्योषंत्रिफलांकोलबीज
कं ॥४९॥ कपित्थरजनीचूर्णंभृंगराजेनभावयेत् ॥ त्रिंशद्वारंविशोष्याथमधुयुक्तंलि
हेत्सदा ॥५०॥ निष्कमात्रंहरेन्मेहान्मेहबद्धोरसोमहान् ॥ महानिंबस्यबीजानिपिष्ट्वाष
ट्संमितानिच ॥५१॥ पलतंडुलतोयेनघृतनिष्कद्वयेनच ॥ एकीकृत्यपिबेच्चानुहंतिमे
हंचिरंतनुं ॥५२॥ ॥अथवह्निरसः॥ ॥चतुःसूतस्यगंधोष्टौरजनीत्रिफलाशि
वा ॥ प्रत्येकंचद्विभागंस्यात्त्रिवृज्जैपालचित्रकं ॥५३॥ प्रत्येकंचत्रिभागंस्यात्व्योषदं
तीद्विजीरकं ॥ प्रत्येकमष्टभागंस्यादेकीकृत्यविचूर्णयेत् ॥५४॥ जयंतीस्नुक्पयोभृंग
वह्निवानारितैलकैः ॥ प्रत्येकेनक्रमाद्भाव्यंसप्तवारंपृथक्पृथक् ॥५५॥ महावह्निरसो
नामनिष्कमुष्णजलैःपिबेत् ॥ विरेचनंभवेत्तेनतक्रभक्तंससैंधवं ॥५६॥ दिनांतेपाचये
त्पथ्यंवर्जयेच्छीतलंजलं ॥ सर्वोदरहरःप्रोक्तोमूढवातहरःपरः ॥५७॥ ॥अथविद्या
धरोरसः ॥ ॥गंधकंतालकंताप्यंमृततानंमनःशिलां ॥ शुद्धसूतंचतुल्यांशंमर्द

८९

पेद्गावयेद्दिनं ॥ ५८ ॥ पिप्पल्यास्तु कषायेण वल्लीक्षीरेण भावयेत् ॥ निष्कार्धं भक्षयेत्सौद्रै
गुल्मसिंहादि कंजयेत् ॥ ५९ ॥ रसो विद्याधरो नाम गोमूत्रे च पिबेदनु ॥ ॥ अथ त्रिनेत्रो रसः
॥ ॥ टंकणं हारिणं शृंगं स्वर्णं ताम्रं म्रतं रसं ॥ दिनैकं मार्द्रकै द्रावैर्मर्द्यं रुध्वा पुटे पचेत् ॥
॥ ६० ॥ त्रिनेत्राख्यो रसः सोयं माषं मध्वाज्यके र्लिहेत् ॥ ससैंधवं जीरकं हिंगु मध्वाज्याभ्यां
लिहेदनु ॥ ६१ ॥ पक्तिशूलहरः ख्यातो माषमात्रं न संशयः ॥ ६२ ॥ ॥ अथ शूलगजकेशरी रसः ॥ ॥ शुद्धसूतं द्विधा गंधं यामैकं मर्दयेद्द्वयं ॥ द्वयोस्तुल्यं शुद्धताम्रं संपुटे तं निरो
धयेत् ॥ ६३ ॥ ऊर्ध्वाधोलवणं दत्वा मृद्भांडे धारयेद्भिषक् ॥ ततो गजपुटे पक्त्वा स्वांगशीतं स
मुद्धरेत् ॥ ६४ ॥ संपुटं चूर्णयेत्सूक्ष्मं पर्णखंडे द्विगुंजकं ॥ भक्षयेत्सर्वशूलार्तो हिंगुशुंठीचजी
रकं ॥ ६५ ॥ वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ॥ असाध्यं नाशयेच्छूलं रसस्या शूल
केसरी ॥ ६६ ॥ ॥ अथाग्नितुंडवटी रसः ॥ ॥ शुद्धसूतं विषं गंधं अजमोदा फलत्रि
कं ॥ सर्जिक्षारं यवक्षारं वह्निसैंधवजीरकं ॥ ६७ ॥ सौवर्चलं विडंगानि सामुद्रं त्र्यूषणं स

८९

मं॥ विषमुष्टिंसर्वतुल्यंजंबीराम्लेनमर्दयेत्॥६८॥ मरिचाभांवटींखादेद्द्रुहिमांद्यंप्र
शांतये॥६९॥ ॥अथअजीर्णकंटकोरसः॥ ॥शुद्धंसूतंविषंगंधंसमंसर्वंवि
चूर्णयेत्॥ मरिचंसर्वतुल्यांशंकंटकार्याःफलद्रवैः॥७०॥ मर्दयेद्भावयेत्सर्वमेकू
विंशतिवारकं॥ वटींगुंजात्रयःखादेत्सर्वाजीर्णप्रशांतये॥७१॥ अजीर्णकंटकःसो
यंरसोहंतिविशूचिकां॥७२॥ ॥अथमंथानभैरवोरसः॥ ॥मृतंसूतंमृतंताम्रं
पुनर्नवादेवदाली
हिंगुपुष्करमूलकं॥ सैंधवंगंधकंतालंकटुकीचूर्णयेत्समं॥७३॥
दिनैकंमर्दयेद्दृढं॥७४॥ माषमात्रंलि
निर्गुंडीतंदुलीयकैः॥ त्रिकटोशानकैर्द्रावैर्द
॥अथ
हेद्क्षौद्रैः रसोमंथानभैरवं॥ कफरोगप्रशांत्यर्थंनिंबक्वाथंपिबेदनु॥७५॥
॥सूतहारकवज्राणिताम्रंलोहंचमाक्षिकं॥७६॥ तालंनीलां
वानविध्वंसनोरसः॥
जनंतुत्थमहिफेनसमांशकं॥ ॥पं॥ चानांलवणानांचभागमेकंविमर्दयेत्॥ वज्री
क्षीरैर्दिनैकंतुरूध्वाधोमुद्धरेपचेत्॥ माषैकमार्द्रकद्रावैर्लेहमहागनाशने॥७८॥

९०

पिप्पलीमूलजंक्वाथं सकृष्णमनुपानयेत् ॥ सर्वान्वातविकारांस्तु निहंत्यापेभकादि
कान् ॥७९॥ ॥अथ कनकसुंदरोरसः॥ ॥कनकस्याष्टशाणास्युः सूतोद्वादशाभि
मतिः ॥गंधोपिद्वादशाः प्रोक्तोस्ताम्रं शाणद्वयोन्मितं ॥८०॥ अभ्रकस्य चतुःशाणमा
क्षिकं च द्विशाणिकं ॥ वंगो द्विशाण सौवीरं त्रिशाणं लोहमष्टकं ॥८१॥ विषां त्रिशाणि
कं प्रोक्तं लांगलीपलसंमिता ॥ मर्दयेद्दिनमेकं तु रसेरम्लफलोद्भवैः ॥८२॥ दद्यान्मृदुपुटं
वह्नोतनः सूक्ष्मं विचूर्णयेत् ॥ माषमात्रो रसोदेयः सन्निपातेषु दारुणः ॥८३॥ आर्द्रकस्वर
सेनैव रसोनस्य रसेन वा ॥ विलासं सर्वकुष्ठानि विसर्पं च भगंदरं ॥८४॥ ज्वरं गरमजी
र्णं च जयेद्रोगहरो रसः ॥८५॥ ॥अथ सन्निपातभैरवो रसः॥ ॥विषगंधत्रि
कर्षस्तु कुर्यात्कज्जलिकां द्वयोः ॥ तारारताम्रवंगाहिसाराख्ये के ककार्षिका ॥८६॥ त्रि
गुज्वालामुखीशुंठी बिल्वेभ्यस्तं दुलीयकात् ॥ प्रत्येक स्वरसं कुर्यात् पमेकं विमर्दयेत् ॥
॥८७॥ कृत्वागोलं वृतं वस्त्रे लवणापूरिते न्यसेत् ॥ काचभांडे ततस्थाल्यां काचकुप्यां नि

९०

वेशयेत् ॥८८॥ वालुकाभिः प्रपूर्याथ वह्नियामद्वयं भवेत् ॥ ततउद्धृत्य संतं गोलं चूर्णपि
वाविमिश्रयेत् ॥८९॥ प्रबालचूर्णं कर्षेण शाणमात्रं विषंपुच ॥ कृष्णासर्पस्वगरलैर्द्वि वे
लं भावयेत्तथा ॥९०॥ तगरं मुसली मांसी हेमाह्वा वेतसः कणा ॥ नलिनीपत्रकं चैला चि
त्रकश्चकुठेरकः ॥९१॥ शानपुष्पादेवदाली धत्तूरा गस्त्यमुंडिकाः ॥ मधूकजातीमदनार
सैरेषां विमर्दयेत् ॥९२॥ प्रत्येकमेकवेलं च ततः संशोष्य धारयेत् ॥ बीजपूरार्द्रकद्रावै
मरिचैः षोडशोन्मितैः ॥९३॥ रसोद्वि गुंज प्रमितः सन्निपाते प्रदीयते ॥ प्रसिद्धोयं रसो नाम्ना
सन्निपातस्य भैरवः ॥९४॥ ॥अथग्रहणीकपाटः॥ ॥रक्तमौक्तिकहेमानि सारश्चैकै
कभागिकः ॥ द्विभागो गंधकः सूतस्त्रिभागो मर्दयेद्दिमान् ॥९५॥ कपित्थस्वरसैर्गाढं म
गर्भं गेततः क्षिपेत् ॥ पुटेन्मध्यपुटेनैव ततउद्धृत्य मर्दयेत् ॥९६॥ बलारसैः सप्तवेलम
पामार्गरसैस्त्रिधा ॥ लोध्रप्रतिविषामुस्ताधातकीन्द्रयवाम्रता ॥९७॥ प्रत्येकमेतत्स्वर
सैर्भावनायास्त्रिधास्त्रिधा ॥ माषमात्रो रसोदेयो मधुना मरिचैस्तथा ॥९८॥ हन्यात्सर्वा

९१

नत्रीसारान्ग्रहणीसर्वजामपि॥ कपाटोग्रहणीरोगेरसोयंवह्निदीपनः॥९९॥ ॥
अथग्रहणीवज्रकपाटः॥ ॥मृतसूताभ्रकंगंधंयवक्षारंसटंकणं॥अग्निमंथंवचां
कुर्यात्सूततुल्यानिमान्सुधी॥१००॥ततोजयंतीजंबीरभृंगद्रावैर्विमर्दयेत्॥त्रिवासरंत
तोगोलंकृत्वासंशोष्यधारयेत्॥१॥लोहपात्रेशराबंचदत्तोपरिविमुद्रयेत्॥अधोवह्निश
नैःकुर्यात्तैयामार्धमुद्धरेत्॥२॥रसतुल्यांप्रतिविषांदद्यान्मोचरसंतथा॥कपित्थबीज
पाद्रावैर्भावयेत्सप्तधाभिषक्॥३॥धातकींद्रपवामुस्तालोध्रबिल्वंगुडूचिका॥एतद्रसैर्भा
वयित्वावल्लैकैकंचशोषयेत्॥४॥रसंवज्रकपाटाख्यंशाणैकमधुनालिहेत्॥वह्निंशुंठी
विडंबिल्वंलवणंचूर्णयेत्समं॥५॥पिबेदुष्णांबुनाचानुसर्वजाग्रहणींजयेत्॥६॥ ॥अ
थमदनकामदेवोरसः॥ ॥तारंवज्रंसुवर्णंचताम्रंसूतंचगंधकं॥लोहंक्रमविद्द
द्धानिकुर्याद्दिनानिवैखुसुधीः॥७॥विमर्द्यकन्यकाद्रावैर्न्यसेत्काचमयेघटे॥विमुद्यपीठ
रीमध्येधारयेत्सैंधवैर्मते॥८॥पीठरींमुद्रयेत्सम्यक्तनतभ्रूल्यांनिवेशयेत्॥वह्निंशनैः

९१

शानैः सर्वं दिनैकं तन उध्धरेत् ॥९॥ स्वांगशीते च संचूर्ण्य भावयेदर्कदुग्धकैः ॥ अश्वगं
धा च काकोली वानरी मुसली क्षुरं ॥१०॥ त्रिस्त्रिवेलं रसैरासां शतावर्याश्च भावयेत् ॥ प
द्मकंदकसेरूणां रसैः काशस्य भावना ॥११॥ कस्तूरी व्योषकर्पूरं कंकोलैलालवंगकं ॥
पूर्वचूर्णाद्दशमांशमेन चूर्णं विमिश्रयेत् ॥१२॥ सर्वैः समांशार्करां च दत्वा शाणोन्मितं पिबे
त् ॥ गोदुग्धार्द्धपलेनैव मधुरोहारसेवकः ॥१३॥ अस्य प्रभावात्सौंदर्यं बलं तेजो विवर्धते ॥
तरुणीरमयेद्बह्वीर्न च हानिः प्रजायते ॥१४॥ ॥ अथ कंदर्पसुंदरो रसः ॥ ॥ सूतो वज्र
मणिर्मुक्ता तारं हेम मनाभ्रकं ॥ रसैः कर्षांसिकान्येतान्मर्दयेद्दिरिमेदजैः ॥१५॥ प्रवालचू
र्णं गंधश्च द्विद्विकर्षं विमिश्रयेत् ॥ ततोश्वगंधास्वरसे विमर्द्य मृगशृंगके ॥१६॥ क्षिप्त्वा म
दुपुटे पक्वा भावयेद्वानकीरसैः ॥ काकोली मधुकं मांसी बलायंत्रे विसं गुडं ॥१७॥ द्राक्षापि
प्पलं तं वंदाकं वारिपर्णीचतुष्टयं ॥ परूषकं कसेरुं च मधुकं वानरी तथा ॥ १८॥ भावयित्वा
रसैरेषां शोषयित्वा विचूर्णयेत् ॥ एलात्वक्पत्रकं मांसी लवंगागरुकेसरं ॥१९॥ मुस्तं मग

९२

एतच्चूर्णैः शाणमितैः रसकंदर्पसुंदरं ॥२०॥ खादेच्चा
मर्दं कृष्णं जलं च द्रवि मिश्रयेत् ॥ एतच्चूर्णैः शाणमितैः रसकंदर्पसुंदरं ॥२०॥ रवादेच्चा
णमितं रात्रौ सिताधात्रीविदारिका ॥ एतासां कर्षचूर्णेन सर्पिः कर्षेण संमितं ॥२१॥ त
स्यानु दुग्धपलक्षीरं पिबेत्सुखितमानसः ॥ रमणीरमयेद्बह्वीर्न हानिं क्वापि गच्छति ॥२२॥
॥ ॥अथ लोहरसायनं ॥ ॥शुद्धे रसे द्विभागे के द्विभागं शुद्धगंधकं ॥ क्षिपेत्क
ज्जलिकां कुर्यात्तत्र तीक्ष्णभवं रजः ॥२३॥ क्षिप्त्वा कज्जलिकातुल्यं प्रहरैकं विमर्दयेत्
॥ ततः कन्याद्रवे मर्द्यो घर्मे च त्रिदिनं पुनः ॥२४॥ ततः संजायते तस्य सोष्णो धूमो महान्
॥ अथ तत्पिंडितं कृत्वा ताम्रपात्रे निधापयेत् ॥२५॥ मध्ये धान्यकुशूलस्य त्रिदिनं धारयेद्बुधः ॥
उद्धृत्य तस्मात्खल्वे च क्षिप्त्वा घर्मे निधाय च ॥२६॥ रसैः कुठारछिन्नाया त्रिवेलं परिभावयेत्
॥ संशोष्य घर्मे क्षिप्त्वा भावयेत्त्रिकटोस्त्रिधा ॥२७॥ वासामृता चित्रकानां रसैर्भाव्यं पृथक्पृथक्
॥ लोहपात्रे ततः क्षिप्त्वा भावयेत्त्रिफलारसैः ॥२८॥ निर्गुंडीदाडिमत्वक् भिविसिभंगकुरंटकैः
॥ पलाशशाककदलीद्रावैर्बीजकस्य भृतेन च ॥२९॥ नलिकालंबुषाद्रावैर्बब्बुलफलिकारसैः ॥

९२

185

भावयेत्त्रिस्त्रिवेलं च ततो नागबलारसैः ॥३०॥ शतावरीगोक्षुरुभिः पातालगरुडीद्रवैः ॥ त्रिस्त्रि
वेलं यथालाभं भावयेद्भिरोषधैः ॥३१॥ ततः प्रातर्लिहेद्राज्यमधुना कोलमात्रकं ॥ पलमा
त्रं वराक्वाथमनुपानं पिबेत्ततः ॥३२॥ मासत्रयाच्छीलितं च वलीपलितनाशनं ॥ मंदाग्निं
श्वासकासं च पांडुतां कफमारुतौ ॥३३॥ पिप्पलीमधुसंयुक्तं हन्यादेतन्न संशयः ॥ वातास्रमू
त्रदोषं च ग्रहणीरोगजां रुजां ॥३४॥ अंडवृद्धिं जयेद्दन्ताच्छिन्नोसलमधुप्लुतं ॥ बलवर्णकरं
वृष्यमायुष्यं परमं स्मृतं ॥३५॥ जयेत्सर्वामयान्कोलमितं लोहरसायनं ॥ प्रक्षेप्यौषध
मेतस्मिन्प्रदद्यात्कोलमात्रकं ॥३६॥ कूष्मांडं तिलतैलं च माषान्नं राजिकं तथा ॥ मद्यमम्ल
रसं चैव सज्जे ल्लोहस्य सेवकः ॥३७॥ रसमाध्यायविख्यातं कल्पितं यथामति ॥३८॥ ॥
॥ इति मध्यमखंडः ॥ ॥
॥ इति श्रीदामो॰ शा॰ चिकित्सास्थाने रसकल्पनाध्यायः ॥
॥ अथ तृतीयखंडप्रारंभः ॥
॥ स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ॥ मज्जा च तं पि
बेन्मर्त्यः किंचिदभ्युदिते रवौ ॥३९॥ स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते ॥ तिलतैलं स्था
वरेषु जंगमेषु घृतं वरं ॥४०॥ द्वाभ्यां त्रिभिश्चतुर्भिश्च यमकस्त्रिवृतो महान् ॥ पिबेत्र्यहं च

९३

तुरहं पंचाहं षडहं तथा ॥ सप्तरात्रात्परः स्नेहः सात्मीभवति सेविनः ॥ दोषकाला
ग्निवयसां बलं दृष्ट्वा प्रयोजयेत् ॥ ४२ ॥ हीनां च मध्यमां श्रेष्ठां मात्रां स्नेहस्य बुद्धिमान्
॥ अमात्रया तथाकाले मिथ्याहारविहारतः ॥ ४३ ॥ स्नेहः करोति शोफार्शस्तंद्रानिद्राविसंज्ञ
ताः ॥ दद्याद्दीप्ताग्नये मात्रा स्नेहस्य पलसंमिता ॥ ४४ ॥ मध्यमा तु त्रिकर्षा स्याज्जघन्याच्च द्विक
र्षिका ॥ अथ वा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसंमिताः ॥ ४५ ॥ अहोरात्रेण महती जीर्यवह्नि
तु मध्यमा ॥ जीर्यत्यल्पा दिनार्धेन सा विज्ञेया सुखावहा ॥ ४६ ॥ अल्पा स्याद्दीपनी वृष्या
स्वल्पदोषे च पूजिता ॥ मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी ॥ ४७ ॥ ज्येष्ठा कुष्टविषो
न्मादग्रहापस्मारनाशिनी ॥ केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं ॥ ४८ ॥ पेयं बहुकफे
वापि व्योषक्षारसमन्वितं ॥ रूक्षक्षतविषार्त्तानां वातपित्तविकारिणां ॥ ४९ ॥ हीनमेधास्मृती
नां च सर्पिःपानं प्रशस्यते ॥ कृमिकोष्टानिलाविष्टप्रवृद्धकफमेदसः ॥ ५० ॥ पिबेयुस्तै
लसात्म्याय स्नेलं दीप्ताग्नयस्तु ये ॥ व्यायामकर्षिता शुष्करेतोरक्ता महानुजः ॥ ५१ ॥ महाग्नि

९३

187

मारुतप्राणा वसायोग्या नराः स्मृताः॥ क्रूराशया क्लेशसहा वाताना तीदीप्तवह्नयः॥५२॥म
ज्जानं च पिबेयुस्ते सर्पिर्वा सर्वतोहितं॥ शीतकाले दिवा स्नेहमुष्णकालेपि बेन्निशि॥५३॥
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा॥ तस्याभ्यंजनगंडूषमूर्धकर्णाक्षितर्पणं॥५४॥
तैलं घृतं वा युंजीत दृष्ट्वा दोषबलाबलं॥ घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते॥५५॥वसा
मज्ज्ञोः पिबेन्मंडमनुपानं सुखावहं॥ स्नेहद्विषः शिशून्वृद्धान्सुकुमारान्कृशानपि॥५६॥तृ
ष्णालुकानुष्णकाले च सहभक्तेन दापयेत्॥ सर्पिस्मती बहुतिला यवागूः स्वल्पतंडुला॥५७॥
सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी॥ शर्कराचूर्णसंसृष्टे दोहनस्थे घृते च गां॥५८॥
दुग्धक्षीरं पिबेदुष्णं सद्यः स्नेहनमुच्यते॥ मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति॥५९॥
विष्टभ्य वापि जीर्येत वारिणोष्णेन वामयेत्॥ स्नेहस्याजीर्णशंकायां पिबेदुष्णोदकं नरः॥६०॥
ततो हारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा॥ स्नेहेन पैत्तकस्याग्निर्यदातीक्ष्णकरी कृतः॥६१॥
तदास्योदीरयत्तृष्णां॥ विषमां तस्य पाययेत्॥ शीतं जलं वामयेच्च पिपासा तेन शाम्यति॥६२॥
अजीर्णी विजयेत्स्नेहमुदरी तरुणज्वरी॥ दुर्बलोरोचकी स्थूलो मूर्छार्तो मदपीडितः॥६३॥दत्त

कु

९४

वा स्नेहविरिक्ताश्च कफतृष्णा॥श्रमान्विताः॥अकालप्रसवा नारी दुर्दिने च विवर्जयेत्॥६४॥स्वेद्य
संशोध्यमद्यस्त्रीव्यायामासक्तचिंतकाः॥वृद्धबालकृशा रूक्षाः क्षीणास्त्राः क्षीणरेतसः॥६५॥वा
तार्तास्तिमिरार्ता ये तेषां स्नेहनमुत्तमं॥वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतं॥६६॥मृदु
स्निग्धांगतांगानिः स्नेहोद्वेगोऽथ लाघवं॥विमलेंद्रियता सम्यक्स्निग्धे रूक्षे विपर्ययः॥६७॥
भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिकः॥तंद्रातिसारः पांडुत्वं भृशं स्निग्धस्य लक्षणं॥६८॥
श्यामाकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः॥दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेंद्रियः॥६९॥
निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः॥स्नेही व्यायामसंशीतवेगाघातप्रजागरान्॥७०॥
दिवास्वप्नमभिष्यंदि रूक्षान्नं च विवर्जयेत्॥७१॥ ॥इति श्री शा॰ शा॰ चिकित्सास्थाने स्ने
हपानविधिरध्यायः॥ ॥अथ स्वेदनविधिः॥ ॥स्वेदश्चतुर्विधः प्रोक्तः तापोष्ण
स्वेदसंज्ञितः॥उपनाहद्रवः स्वेदः सर्ववातनिहारिणः॥७२॥स्वेदो तापोष्मजो प्रायः श्लेष्म
घ्नो समुदीरितो॥उपनाहस्तु वातघ्नः पित्तसंगे द्रवो हितः॥७३॥महाबले महाव्याधौ सीते स्वे
दो महान्स्मृतः॥दुर्बले दुर्बलः स्वेदो मध्ये मध्यतमो मतः॥७४॥बलासे रूक्षणः स्वेदो रूक्षस्नि

९४

गधः कफानिले॥ कफमेदावृते वाते कोष्णगेहं रवेः करात्॥७५॥ निरुद्धं मार्गगम
नं गुरुप्रावरणं ध्रुवं॥ चिंताव्यायामभारांश्च सेवेतामयमुक्तये॥७६॥ येषां नस्यं विधा
नव्यं बस्तिश्चापि हि देहिनां॥ शोधनीयाश्च ये केचित् पूर्वं स्वेद्याश्च ते मतां॥७७॥ स्वेद्याः पूर्वं
त्रयोपीह भगंदर्यर्शसी तथा॥ अश्मर्यातुरो जंतुः समर्ये छस्त्रकर्मणा॥७८॥ पश्चात्स्वेद्यो
गते स्वल्पे मूढगर्भे गदे तथा॥ काले प्रजाता काले वा पश्चात्स्वेद्या नितंबिनि॥७९॥ सर्वान्स्वेदा
न्निवाते च जीर्णाहारे च कारयेत्॥ स्वेदाद्धातुगता दोषाः स्नेहक्लिन्नस्य देहिनः॥८०॥ द्रवत्वं प्रा
प्य कोष्ठांतं गत्वा यांति विरेकतां॥ स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत्॥८१॥ स्नेहाभ्य
क्तशरीरस्य शीतैराछाद्य चक्षुषी॥ अजीर्णी दुर्बलो मेही क्षतक्षीणपिपासितः॥८२॥ अतिसा
री रक्तपित्ती पांडुरोगी तथोदरी॥ मेदस्वी गर्भिणी चैव नहि स्वेद्या विजानता॥८३॥ एतान
पि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत्॥ मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टिषु॥८४॥ अतिस्वे
दात्संधिपीडा दाहस्तृष्णा क्लमो भ्रमः॥ पित्तास्रक्पिडकाकोपस्तत्र शीतैरुपाचरेत्॥८५॥ तेषु

९५

कपालकंदुकांगारैर्यथायोग्यं प्रकल्पयेत्॥
तापाभिधः स्वेदो वालुकाशस्त्रपाणिभिः॥ प्रतप्तैरम्लसिक्तैश्च कायेरक्तकवेष्टितेः॥
॥८६॥ उष्मस्वेदः प्रयोक्तव्यो लोहपिंडेष्टकादिभिः॥ उष्णोघटं पूरयित्वा पार्श्वछिद्रं विधाय च
॥८७॥ अथवा वातनिर्नाशिद्रव्यक्वाथरसादिभिः॥ षडंगुलास्यां गोपुच्छं नाडीं युंज्याद्धि हस्ति
॥८८॥ विमुखास्यं त्रिखंडां च धातुजां काष्ठजामुत॥ हस्तिशुंडीकया नाड्या स्वेदयेद्वातरोगिणं
कं॥८९॥ सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं॥ काष्ठेदग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवा
॥९०॥ पुरुषायाममात्रां च भूमिमुत्कीर्य खादिरैः॥ एवं माषादिभिः स्विन्नैः शयानं स्वेदयेन्नरं
रिभिः॥९१॥ वातघ्नपत्रैराछाद्य शयनं स्वेदयेन्नरं॥ प्रदह्य देहं वातार्तं क्षीरमांसरसान्वितैः
॥९२॥ तथोपनाहस्वेदं च कुर्याद्वातहरौषधैः॥ प्रदिह्य तनोग्राम्यानूपमांसैर्जीवनीयगणेन च
॥९३॥ अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः॥ कुलित्थमाषगोधूमैरतसीतिलसर्षपैः
॥९४॥ दधीसौवीरकक्षीरैर्वीरतर्वादिनाथवा॥ एरंडमूलबीजैश्च रास्नामूलकशिग्रु
॥९५॥ शतपुष्पादेवदारुशेफालीस्थूलजीरकैः॥ प्रसारण्यश्वगंधाभ्यां बलाभिर्दशमू
भिः॥९६॥ मिशिकृष्णाकुठैश्च लवणैरम्लसंयुतैः॥

९५

ले के:॥९७॥गुडूच्यावानरीबीजैर्यथालाभं समाहृतैः॥ स्नुणैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेद
येन्नरं॥९८॥महाशाल्वेन संज्ञोयं योगः सर्वानिलार्तिजित्॥ द्रवस्वेदस्तु वातघ्नैः द्रव्यक्वाथेन पू
रिते॥९९॥कटाहे काष्ठके वापि स्नूपविष्टोवगाहयेत्॥ नाभेः षडंगुलं यावन्मग्नः क्वाथस्य धा
रया॥१००॥कोष्णायास्कंधयोः सिक्तस्तिष्ठेत्स्निग्धतनुर्नरः॥ एवं तैलेन दुग्धेन सर्पिषा स्वेदये
न्नरं॥१॥एकांतरे द्व्यंतरे वा स्नेहयुक्तोवगाहने॥ शिरामुखैर्लोमकूपैर्धमनीभिश्च तर्प
येत्॥२॥शरीरे बलमाधत्ते युक्तः स्नेहोवगाहने॥ जलसिक्तस्य वर्धंते यथामूलेंकुरास्तरोः
॥३॥तथा धातुविवृद्धिश्च स्नेहसिक्तस्य जायते॥ नातः परतरः कश्चिदुपायो वातनाशनः
॥४॥शीतशूलव्युपरमे स्तंभगौरवनिग्रहे॥ दीप्तेग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता॥
॥५॥सम्यक्स्विन्नं विमृदितं स्नानमुष्णांबुभिः शनैः॥ भोजयेच्चानभिष्यंदी व्यायामं न च का
रयेत्॥६॥वमनं रेचनं चैव वस्तिकर्म तथैव च॥ वाजीकरं च द्रव्यं च तथा रक्तस्रुतिश्च वै॥
॥७॥यस्य कस्य न कर्माणि न च कारयते भिषक्॥८॥ ॥इति श्रीहा॰ शां॰ चिकित्सास्थाने
स्वेदनविधिकल्पनाध्यायः॥ ॥अथ वमनविधिः॥ ॥शरत्काले वसंते च प्रावृट्का

१६

लेच देहिनां ॥ वमनं [illegible] रेचनं चैव कारयेत्कुशलो भिषक् ॥ ९ ॥ बलवंतं कफव्याप्तं
हृल्लासादीनिपीडितं ॥ तथा वमनसात्म्यं च धीरचित्तं च वामयेत् ॥ १० ॥ विषदोषेस्तन्य
रोगे मंदेग्नौ श्लीपदेर्बुदे ॥ हृद्रोगे कुष्ठविसर्पे मेहाजीर्णभ्रमेषु च ॥ ११ ॥ विदारीकापचीका
सकासपीनसवृद्धिषु ॥ अपस्मारे ज्वरोन्मादे तथा रक्तातिसारिषु ॥ १२ ॥ नासाताल्वोष्ठ
पाकेषु कर्णस्रावे द्विजिह्विके ॥ गलसुंडामनीसारे पित्तश्लेष्मगदे तथा ॥ १३ ॥ मेदोगदे
शिरःशूले तथा मधोधिभिरके ॥ सद्योज्वरे रुचौ चैव वमनं कारयेद्भिषक् ॥ १४ ॥ न वामनी
यस्तिमिरी न गुल्मी नोदरी कृशः ॥ नातिवृद्धो गर्भिणी च न स्थूलो न क्षुधातुरः ॥ १५ ॥ मदा
नेबालको रूक्षः क्षुधितश्च निरूहितः ॥ उदावर्त्तोर्ध्वरक्तिश्च दुःछर्दी केवलानिशि ॥ १६ ॥
पांडुरोगकृमीव्याप्तः पठनात्स्वरघातकः ॥ एतप्यजीर्णव्यथना वाम्य योविषपीडिताः ॥ १७ ॥
कफव्याप्ताश्च ते वाम्या मधुकक्वाथपानतः ॥ सुकुमारं कृशं बालं वृद्धं भीतं न च वामयेत् ॥ १८ ॥
पीत्वाय वागूमाकंठं क्षीरं तक्रं दधीनि वा ॥ असात्म्ये श्लेष्मले भोज्ये दोषानुत्क्लेश्य देहिने ॥ १९ ॥ १६
स्निग्धास्विन्नाय वमनं दत्तं सम्यक्प्रवर्तते ॥ वमनेषु च सर्वेषु सैंधवं मधु नाहितं ॥ २० ॥

।द्विभिस्तं वमनं दद्याद्विपरीतं विरेचनं ॥ क्वाथद्रव्यस्य कुडवं श्रपयित्वा जलाढके ॥२१॥ अ
र्धभागावशेषं तु वमनेष्ववतारयेत् ॥ क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा प्रकीर्तिता ॥२२॥ म
ध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी ॥ कल्कचूर्णावलेहानां त्रिपलं श्रेष्ठमात्रया ॥२३॥
मध्यमं द्विपलं दद्यात्कनीयस्तु पलं भवेत् ॥ वमनं चापि वेगाः स्युरष्टौ पित्तान्तमुत्तमः ॥२४॥
षट् वेगा मध्यमो वेगश्चत्वारस्त्ववरा मताः ॥ वमने च विरेके च तथा शोणितमोक्षणे ॥२५॥
अर्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥ कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ॥२६॥
सस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफं ॥ कृष्णाराठफलसिंधुकफे कोष्णजलं पिबेत् ॥२७॥
पटोलवासानिंबश्च पित्ते शीतजलं पिबेत् ॥ सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् ॥२८॥
अजीर्णे कोष्णपानीयं पीत्वा यच्च वमेत्सुधीः ॥ वमनं पाययित्वा च जानुमात्रासने स्थितं ॥२९॥
कंठमेरंडनालेन स्पृशंतं वामयेद्भिषक् ॥ प्रसेको हृः —— कोष्ठेः कंडूर्दुः छर्दिर्नाभवेत् ॥३०॥
अतिवांतो भवेत्तृष्णा हिक्कोद्गारौ विसंज्ञिता ॥ जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहती ॥३१॥
रक्तछर्दिः ष्ठीवनं च कंठपीडा च जायते ॥ वमनस्य वियोगे तु मृदु कुर्याद्विरेचनं ॥३२॥ व

९७

मनांप्रतिविष्टायां जिह्वायां कवलग्रहः ॥ स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्हितैः ॥३३॥
फलान्यम्लानि खादेयुस्तस्य चान्येन तेन नरः ॥ निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् ॥
॥३४॥ याद्वत्तेक्ष्णी घृताभ्यक्तो पीडयेच्च शनैः शनैः ॥ हनुमोक्षे स्मृतः स्वेदो नस्यं च श्लेष्मवा
तहृत् ॥३५॥ रक्तपित्तविधानेन रक्तछर्दिमुपाचरेत् ॥ धात्रीरसांजनोशीरलाक्षाचंदन शा
रिभिः ॥३६॥ मंथं कृत्वा पाययेच्च घृतक्षौद्रसशर्करं ॥ शाम्यंसेनेन तृष्णाद्याः पीडाछर्दिस
मुद्भवाः ॥३७॥ हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं च लाघवं ॥ कफपित्तविनाशश्च सम्यग्वां
तस्य चेष्टितं ॥३८॥ ततोः पराह्ने दीप्ताग्निं मुद्गषष्टिकशालिभिः ॥ हृद्यैश्च जांगलरसैः कृ
तायूषं च भोजयेत् ॥३९॥ तंद्रा निद्रास्य दौर्गंध्यं कंडूश्च ग्रहणीविषं ॥ सुवांतस्य न पीड
येभवंसेनःकदाचन ॥४०॥ अजीर्णं शीततृपानीयं व्यायामं मैथुनं तथा ॥ स्नेहाभ्यंगं प्रको
पं च दिनैकं वर्जयेत्सुधी ॥४१॥ ॥ इति श्रीशा॰ग्रा॰ चिकित्सास्थाने वमनविधिरध्यायः ॥
॥ ॥अथ विरेचनविधिः ॥ ॥ स्निग्धस्विन्नस्य वांतस्य दद्यात्सम्यक् विरेचनं ॥ अ
वांतस्य त्वधस्स्रस्तो ग्रहणीं छादयेत्कफः ॥४२॥ मंदाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकां ॥

९७

अथवापाचनैरामंबलासंचविपाचयेत्॥स्निग्धस्यस्वेदनंकार्यंस्वेदैःस्विन्नस्यसेच
नं॥शरदृतौवसंतेचदेहशुध्यैविरेचयेत्॥४४॥अन्यदात्ययिकेकार्येशोधनंशीलयेद्बु
धः॥पित्तेविरेचनंयुंज्यादामोद्भूतेतथागदे॥४५॥उदरेचतथाध्मानेकोष्ठशुद्धौविशेषे
तः॥दोषाःकृशाश्चकुर्वंतिजितालंघनपाचनैः॥४६॥यत्तुसंशोधनैःशुद्धानतेषांपुनरु
द्भवः॥बालवृद्धावतिस्निग्धःक्षतक्षीणोभयान्विता॥४७॥श्रांतस्तृषार्तःस्थूलश्चगर्भि
णीचनवज्वरी॥नवप्रसूतानारीचमंदाग्निश्चमदात्ययी॥४८॥शल्यार्दितश्चरूक्षश्चनवि
रेच्याविजानता॥जीर्णज्वरीगरव्याप्तोवातरक्तीभगंदरी॥४९॥अर्शःपांडूदरग्रंथिहृद्रो
गारुच्विपीडितः॥योनिरोगप्रमेहार्तगुल्मप्लीहव्रणार्दितः॥५०॥विद्रधीच्छर्दिविस्फोट
विसूचीकुष्ठसंयुताः॥शूलिनोकर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः॥५१॥प्लीहशोथा
क्षिरोगार्ताःकृमिक्षारानलार्दिताः॥शूलिनोमूत्रघाताश्चविरेकार्हानरामताः॥५२॥बहु
पित्तोमृदुःप्रोक्तोबहुश्लेष्माचमध्यमः॥बहुवातःक्रूरकोष्ठोदुर्विरेच्यःसकथ्यते॥५३॥
मृद्वीमात्रामृदुःकोष्ठेमध्यकोष्ठेचमध्यमा॥क्रूरेतीक्ष्णामताद्रव्यैर्मृदुमध्यमतीक्ष्णकैः

९८

तैः॥४॥मृदुर्द्राक्षापयश्चंचुतैलैरपिविरिच्यते॥मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्विरिच्य
ते॥५५॥क्रूरःस्नुक्पयसाहेमक्षीरीदंतीफलादिभिः॥मात्रोत्तमाविरेकस्यत्रिंशद्वेगैःकफांत
का॥५६॥वेगैर्विंशतिभिर्मध्याहीनोक्तादशवेगिके॥द्विपलंश्रेष्ठमाख्यातंमध्यमंचप
लंभवेत्॥५७॥पलार्धंचकषायाणांकनीयस्तुविरेचनं॥कल्कमोदकचूर्णानांकर्षम
ध्वाज्यलेहनः॥५८॥कर्षद्वयंपलंवापिवयोरोगाद्यपेक्षया॥पित्तोत्तरेत्रिवृच्चूर्णंद्राक्षा
क्वाथादिभिःपिबेत्॥५९॥त्रिफलाक्वाथगोमूत्रैःपिबेद्व्योषंकफार्दितः॥त्रिवृत्सैंधवशुंठी
नांचूर्णमम्लैःपिबेन्नरः॥६०॥वातार्दितोविरेकायजांगलानांरसेनवा॥एरंडतैलंत्रिफला
क्वाथेनद्विगुणेनवा॥६१॥युक्तंपीतंपयोभिर्वानचिरेणविरिच्यते॥त्रिवृताकौटजंबीजं
पिप्पलीविश्वभेषजं॥६२॥समृद्धिकारसक्षौद्रंवर्षाकालेविरेचनं॥त्रिवृद्दुरालभामु
स्ताशर्करोदीच्यचंदनं॥६३॥द्राक्षांबुनासयष्ट्याह्वंशीतलंचघनात्यये॥त्रिवृतांचित्रकं
पाठामजाजींसरलंवचा॥६४॥हेमक्षीरींचहेमंतेचूर्णमुष्णांबुनापिबेत्॥पिप्पलीना
गरंसिंधुंश्यामात्रिवृतयासह॥६५॥लिहेत्क्षौद्रेणशिशिरेवसंतेचविरेचनं॥त्रिवृता

९८

197

तिन्नपर स्रुध्येष
ध्येतैन्नितुनमगम
तेन्नजितीमयेम
मरुनगेतुमरणी
रात्रोगोतुघेतस्या
नेद्यथिमपमतिम्म
तिम्बोगाच्छमभ्यासो

प्रातः स्नेतुगोतुध्यमपा
परमस्थापतपथिय
भद्ध्याणेमध्यमम
तोमपनमिरा।
प

[illegible]

श्री

याद

२ कोष्ठमुद्रिरि ओवस्र

२ धावधीर

२ तेड

२ मडीम्ल

२ जाधर

६ ...मिस्वर

२ तिमि उमिस्तीजीमिपगतठ

२ मस्तुरिमिओठपर

२ कोष्ठमुद्रिरि

२ ...

...तीमिस्त्युगतुतम

गामिधिघिपस्मा...

तेमतगेतुअमताति

शर्करातुल्याग्रीष्मकालेविरेचनं ॥६६॥ ॥अभयामरिचंशुंठी विडंगामलकानिच ॥
पिप्पलीपिप्पलीमूलंत्वग्पत्रंमुस्तमेवच ॥६७॥एतानि समभागानि दंतीच त्रिगुणाभ
वेत् ॥त्रिवृदष्टगुणाज्ञेयाषड्गुणाचात्रशर्करा ॥६८॥मधुनामोदकान्कृत्वा कर्षमात्रप्रमाण
तः ॥एकैकंभक्षयेत्प्रातः शीतंचानुपिबेज्जलं ॥६९॥ताबद्विरिच्यतेजंतुर्यावदुष्णंन
सेवते ॥पानाहारविहारेषु भवेन्निर्यंत्रणः सदा ॥७०॥विषमज्वरमंदाग्निपांडुकास
भगंदरान् ॥दुर्नामिकुष्टगुल्मार्शोगलगंडभ्रमोदरान् ॥७१॥विदाहप्लीहमेहांश्चयक्ष्मा
णंनयनामयान् ॥वातरोगांस्तथाध्मानंमूत्रकृच्छ्राणिचाश्मरी ॥७२॥पृष्टपार्श्वोरुजघ
नजंघोदररुजंजयेत् ॥सततंशीलनादेषः पलितानिप्रणाशयेत् ॥७३॥अभयामोदका
ह्येतेरसायनवरास्मृताः ॥७४॥ ॥इतिअभयामोदकः ॥ ॥पीत्वाविरेचनंशीतज
लैः संसिच्यचक्षुषी ॥सुगंधिकिंचिदाघ्रायतांबूलंशीलयेद्दुरं ॥७५॥निर्वातस्थानवे
गांश्चधारयन्नस्वपेत्तथा ॥शीतांबुनस्पृशेत्क्वापिकोष्णनीरंपिबेन्मुहुः ॥७६॥बलासौष
षधपितानिवायुर्वानेयथाव्रजेत् ॥रेकात्तथामलंपित्तंभेषजंचकफोव्रजेत् ॥७७॥

९९

दुर्विरिक्तस्य नाभेस्तु स्तब्धत्वं कुक्षिशूलता ॥ पुरीषवातसंगश्च कंडूमंडलगौरवं ॥७८॥
विदाहोरुचिराध्मानं भ्रमश्छर्दिश्च जायते ॥ तं पुनः पाचनैः स्नेहैः पक्त्वा संस्नेह्य रेचयेत् ॥
॥७९॥ तेनास्योपद्रवाणां निर्दीप्ताग्निर्लघुता भवेत् ॥ विरेकस्यातियोगेन मूर्छा भ्रंशो गुदस्य च ॥८०॥ शूलं कफातियोगस्यान्मांसधावनसंनिभ ॥ मेदोनिभं जलाभासं रक्तं वापि विरिच्यते ॥८१॥ तस्यासिताम्बुभिः सिक्त्वा शरीरं तंडुलादिभिः ॥ मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥८२॥ सहकारत्वचः कल्कोदध्ना सौवीरकेन च ॥ पिष्ट्वा नाभिप्रलेपनं हन्त्यतीसारमुल्बणं ॥८३॥ अजं क्षीरं गवां वापि रसं वा कुक्कुटादिजः ॥ शालिभिः षष्टिकैः स्वल्पमसुरैर्वापि भोजयेत् ॥८४॥ शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् ॥ लाघवे मनसस्तुष्टावनुलोमं गतेनिले ॥८५॥ सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ॥ इंद्रियाणां बलं बुद्धेः प्रसादो वह्निदीपनं ॥८६॥ धातुस्थैर्यं वयस्थैर्यं भवेद्रेचनसेवनात् ॥ प्रवातसेवां शीतांबुस्नेहाभ्यंगमजीर्णकं ॥८७॥ व्यायाममैथुनं चैव न सेवेत विरेचितः ॥ शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृतां ॥८८॥ जंगलान्त्रविष्किराणां च रसैः शाल्योदनं हितं ॥ ९९

टा

201

॥८९॥ ॥इति श्रीशा॰ शा॰ चिकित्सास्थाने विरेचनकल्पनाध्यायः॥ ॥अथ बस्तिविधिः॥ ॥बस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परं ॥यः स्नेहैर्दीयते स स्यादनुवासननामकः॥१०॥ कषायक्षीरतैलैर्यो निरूहः स निगद्यते॥ बस्तिभिर्दीयते यस्मात्तस्माद्बस्तिरिति स्मृतः॥११॥ तत्रानुवासनाख्यो हि बस्तिर्यस्तोत्र कथ्यते॥ पूर्वमेव ततो बस्तिनिरूहाख्यो भविष्यति॥१२॥ निरूहादुत्तरश्चैव बस्तिस्यादुत्तराभिधः॥ अनुवासनभेदश्च मात्राबस्तिरुदीरितः॥१३॥ पलद्वयं तस्य मात्रा तस्मादर्धोपि वा भवेत्॥ अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिलि॥१४॥ नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी॥ नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः॥१५॥ शोकमूर्छारुचिभयश्वासकासक्षयातुराः॥ नेत्रं कार्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः॥१६॥ नलैर्दंतैर्विषाणाग्रैर्मणिभिर्वा विधीयते॥ एकवर्षात्तु षड्वर्षं यावन्मानं षडंगुलं॥१७॥ ततो द्वादशकं यावन्मानं स्यादष्टसंमितं॥ ततः परं द्वादशभिरंगुलैर्नेत्रदीर्घता॥१८॥ मुद्गछिद्रं कलायाभं छिद्रं कोलास्थिरं ध्रुवं॥ यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसंनिभं॥१९॥ आतुरांगुष्ठमानेन मूले स्थू

तं विधीयते ॥ कनिष्ठिकापरीनाह मग्रेच गुटिकामुखं ॥ १०० ॥ नन्मूले कर्णिकाद्वे
चकार्येभागाच्चतुर्थकान् ॥ योजयेन्नत्रेब स्तिंचबंधद्वयविधानतः ॥ ७ ॥ मृगाजशूकर
गवां महिषस्याथवाभवेत् ॥ मूत्रकोशस्यबस्तिस्तुतदालाभेचचर्मजः ॥ २ ॥ कषायर
क्तः सुमृदु बस्तिस्निग्धोदृढोहितः ॥ व्रणबस्तेस्तुनेत्रंस्यान्श्लक्ष्णामष्टांगुलोन्मि
तं ॥ मुद्गछिद्रंगृध्रपक्षनालिकापरिनाहिच ॥ शरीरोपचयंवर्णंबलमारोग्यमायुषः ॥
कुरुतेपरिवृद्धींच बस्तिः सम्यगुपारितः ॥ दिवाशीतेवसंतेचस्नेहबस्तिः प्रदीयते ॥ ५ ॥
ग्रीष्मवर्षाशरत्कालेरात्रौस्यादनुवासनं ॥ नचातिस्निग्धशामनं भोजयित्वानुवासयेत्
॥ ६ ॥ मदंमूर्छांचजनयेद्विधास्नेहः प्रयोजितः ॥ हीनमात्राबुभौबस्तिनातिकार्यकरौस्म
तौ ॥ ७ ॥ अतिमात्रौतथानाहक्लमातीसारकारको ॥ उत्तमस्यपलैःषड्भिर्मध्यमस्यपलै
स्त्रिभिः ॥ ८ ॥ पलद्वयेनहीनस्यप्रोक्तामात्रानुवासने ॥ शतासैंधवाभ्यांचदेयंस्नेहे
सुचूर्णकं ॥ ९ ॥ तन्मात्रोत्तमेमध्यल्पाषट्चतुर्द्वयमाषके ॥ विरेचनात्सप्तरात्रेगतेजाते
बलायच ॥ १० ॥ भुक्तान्नीयानुवास्यापबस्तिर्देयोनुवासनः ॥ अथानुवास्यंस्व[illegible]भ्यक्तं

मुष्णंबुस्वेदितंशनैः॥११॥ भोजयित्वायथाशास्त्रंकृतंचक्रमणंततः॥ उत्सृष्टानिल

विण्मूत्रंयोजयेत्स्नेहबस्तिना॥१२॥ सुप्तस्यवामपार्श्वेनवामजंघाप्रसारिणः॥ कुंचित

परजंघस्यनेत्रंस्निग्धेगुदेन्यसेत्॥१३॥ बध्वबस्तिमुखंसूत्रेवामहस्तेनधारयेत्॥ पी

डयेद्दक्षिणेनैवमध्यवेगनधीरधीः॥१४॥ जृंभाकासक्षयादींश्चबस्तिकालेनकार

येत्॥ त्रिंशन्मात्रामितःकालःप्रोक्तोबस्तेस्तुपीडने॥१५॥ ततःप्राणिहितस्नेहउत्तानो

वाक्शतंभवेत्॥ प्रसारितैःसर्वगात्रैर्यथावीर्यंप्रसर्पती॥१६॥ ताडयेत्तलयोरेनंत्रींत्री

न्वारान्शनैःशनैः॥ स्फिजोश्चैवंततःश्रोणींशय्यांचैवोत्क्षिपेत्ततः॥१७॥ जाते विधानेतुत

तःकुर्यान्निद्रांयथासुखं॥ सानिलःसपुरीषश्चस्नेहःप्रत्येतियस्यतु॥१८॥ उपद्रवंविना

चैवससम्यगनुवासितः॥ जीर्णान्नमथसायाह्नेस्नेहेप्रत्यागतेपुनः॥१९॥ लघ्वन्नंभोज

येत्कामंदीप्ताग्निस्तुनरोयदि॥ अनुवासितायदातव्यमितरेह्निसुखोदकं॥२०॥ धान्यशुं

ठीकषायंचस्नेहव्यापत्तिनाशनं॥ अनेनविधिनाषड्वासप्तवाष्टौनवापिवा॥२१॥ वि

१०१

धेयावस्त्यपस्तेषामंतरानुनिरूहणं॥ तीक्ष्णंतीक्ष्णौषधैर्युक्ताफलवर्त्तिर्हितातथा॥२१॥
अथवापस्य न तत्कालंस्नेहो निर्यातिकेवलः॥२२॥ तस्मान्योल्पतरोदेयो न हि स्निग्धस्य तिष्ठ
ति॥ अभुक्तस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः॥२३॥ तदाङ्गशैथिल्यमाध्मानंशूलंश्वास
श्चजायते॥ पक्काशयंगुरुत्वंच तत्र दद्यान्निरूहणं॥२४॥ तीक्ष्णंतीक्ष्णौषधैर्युक्तंफलव
र्त्तिर्हितातथा॥ यथानुलोमनंवायुर्मलंस्नेहश्चजायते॥२५॥ यथाविरेचनंदद्यात्तीक्ष्णंन
स्यंचशस्यते॥ यस्यनोपद्रवंकुर्यात्स्नेहबस्तिरनिःसृतः॥२६॥ सर्वाल्पोवावृतोरौक्ष्या
दुपेक्ष्यः सविजानता॥ अनायातंत्वहोरात्रेस्नेहंसंशोधयेच्छनैः॥२७॥ स्नेहबस्ता
वनायातेनान्यस्नेहोविधीयते॥ गुडूच्येरंडपूतीकभार्गीवृषकरोहिषं॥२८॥ शतावरी
सहचरंकाकनासांपलोन्मितां॥ यवमाषातसीकोलकुलत्थान्प्रसृतोन्मितान्॥२९॥ च
तुर्द्रोणेंभसःपक्त्वाद्रोणशेषेणतेनच॥ पचेत्तैलाढकंपिष्टैर्जीवनीयैःपलोन्मितैः॥३०॥ अ
नुवासनमेतद्धिसर्ववातविकारनुत्॥ षट्सप्ततिव्यापदस्तुजायंतेबस्तिकर्मणः॥३१॥ दूषि
नात्समुत्थायेनतांश्चिकित्स्यांश्चसुश्रुतोक्तान्॥ पानाहारविहाराश्चपरिहाराश्चकृच्छ्रतराः॥३२॥

१०१

स्नेहपानसम्यक्कार्यानात्रकार्यविचारणा॥३३॥ ॥इतिश्रीरा॰त्रा॰चिकित्सास्थानेबस्ति
विधिरध्यायः॥ ॥अथनिरूहबस्तिविधिः॥ ॥निरूहबस्तिर्बहुधाभिद्यतेकारणांतरैः॥
तैरेवतस्यनामानिकृतानिमुनिपुंगवैः॥३४॥निरूहस्यापरंनामप्रोक्तमास्थापनंबुधैः॥
स्वस्थानस्थापनाद्दोषधातूनांस्थापनंमतं॥३५॥निरूहस्यप्रमाणंचप्रस्थःपादोत्तरःपरं॥
मध्यमंप्रस्थमुद्दिष्टंहीनंचकुडवास्त्रयः॥३६॥अतिस्निग्धोत्क्लिष्टदोषःक्षतोरस्कःकृशस्त
था॥आध्मानछर्दिहिक्कार्शःकासश्वासप्रपीडितः॥३७॥गुदशोफातिसारार्तोविशूचीकुष्टसंयुतः
॥गर्भिणीमधुमेहीचनास्थाप्यश्चजलोदरी॥३८॥वातव्याधीउदावर्तेवातास्रग्विषमज्वरे
॥मूर्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषुच॥३९॥वृद्ध्यसृग्दरमंदाग्निप्रमेहेषुनिरूहणं
॥शूलेम्लपित्ते हृद्रोगेयोजयेद्विधिवद्बुधः॥४०॥उत्सृष्टानलविण्मूत्रंस्निग्धंस्विन्नमभो
जनं॥मध्याह्नेगृहमध्येचप्राप्तायोग्यंनिरूहयेत्॥४१॥स्नेहबस्तिविधानेनबुधःकुर्यान्निरूह
णं॥जातेनिरूहेचनतोभवेदुत्कटकासनः॥४२॥तिष्ठेन्मुहूर्तमात्रंतुनिरूहागमनेच्छया॥
अनायातंमुहूर्तेतुनिरूहंशोधनैर्हरेत्॥४३॥निरूहैरेवमतिमान्क्षारमूत्राम्लसैंधवैः॥

१०२

लाघवं चोपजायेत सुनिरूढं तमादिशेत्॥

यस्यं क्रमेण गच्छंति विलिनं कफवायवः॥४४॥ लाघवं चोपजायेत सुनिरूढं तमादिशेत्
यस्य यस्याद्भुस्तिर स्यात्ल्प वेगो हीनमलानिलः॥४५॥ मूत्रार्तिजाअरुचिमान्द्यं निरूढं तमादिशेत्
॥ विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः॥४६॥ आस्थापनस्नेहबस्तो: सम्यग्दाने तु ल
क्षणं॥ अनेन विधिना युंज्यान्निरूढं बस्तिदानवित्॥४७॥ द्वितीयं वा तृतीयं वा चतुर्थं वा यथो
चितं॥ सस्नेह एकः पवने पित्ते द्वौ पयसा सह॥४८॥ कषायकटुमूत्राद्याः कफे कोष्णास्त्रयो हि
ताः॥ पित्तश्लेष्मानलाविष्टं क्षीरयूषरसैः क्रमात्॥४९॥ निरूहं भोजयित्वा च ततस्तं त्वनुवासयेत्॥
बस्तिस्तीक्ष्णः प्रयुक्तस्तु नेषां हन्याद्बलायुषं॥ सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः॥५०॥ ए
रण्डाद्युक्लेशनं पूर्वं मध्ये दोषहरं ततः॥५१॥ पश्चात्संशमनीयं च वदन्त्याद्युस्ती विचक्षणः॥५२॥ ए
रण्डबीजं मधुकं पिप्पली सैंधवं वचा॥५३॥ हपुषाफलकल्कश्च बस्तिरुत्क्लेशनः स्मृतः॥५३॥
उत्क्लेशनबस्तिः॥ ॥शताह्वा मधुकं बिल्वं कौटजं फलमेव च॥ सकांजिकः सगोमूत्रो बस्ति
र्दोषहरः स्मृतः॥५४॥ ॥दोषहरबस्तिः॥ ॥प्रियंगु मधुकं मुस्ता तथैव च रसांजनं॥ सक्षी
रः शाम्यते बस्तिर्दोषाणां शमनः स्मृतः॥५५॥ ॥शोधनबस्तयः॥ ॥शोधनद्रव्यनिः क्वा

३०२

ध्यतकल्कैस्नेहसंयुतैः॥युक्त्याग्वदत्तेनमथिता बस्तयः शोधनस्मृताः॥५६॥त्रिफ
लाक्काथगोमूत्रक्षौद्रक्षाररसमायुताः॥उषकादिप्रलीवापावस्तयोबृंहणास्मृताः॥५७॥
॥ ॥लेखनबस्तयः॥ ॥बृंहणद्रव्यनिःक्काथैःकल्कैर्मधुरकैर्युताः॥सर्पिर्मांसिरसो
पेताबस्तयोबृंहणास्मृताः॥५८॥ ॥बृंहणबस्तयः॥ ॥बदर्यैरावतीशेलुःशाल्म
लीधन्वनागराः॥क्षीरसिद्धाःक्षौद्रयुक्तानाम्नापिच्छलबस्तयः॥५९॥अजोरभ्रेणरुधि
रैर्युक्तोदेयाविचक्षणः॥मात्रापिच्छलबस्तीनांपलैर्द्वादशभिःस्मृताः॥६०॥ ॥पिच्छल
बस्तयः॥ ॥हृतादौसैंधवस्याक्षंमधुनःप्रसृतिद्वयं॥विनिर्मथ्यततोदद्यात्स्नेहस्यप्र
सृतित्रयं॥एकीभूतेततःस्नेहेकल्कस्यप्रसृतीक्षिपेत्॥संमूर्छितेकषायंतुचतुःप्रसृति
संमितं॥६२॥क्षिप्त्वाविमथ्यदद्याच्चनिरूहंकुशलोभिषक्॥वातेत्वनुष्पलंक्षौद्रंक्षिपेत्स्ने
हपलत्रयं॥कफेचषट्पलं
दघात्स्नेहस्यषट्पलं॥६३॥पित्तेचतुःपलंक्षौद्रंदद्यात्स्नेहपलत्रयं॥ ॥इतिनिरूढमात्राविधिः॥ ॥क्षोद्रात्स्यक्षीरतैलाना
क्षौद्रंक्षिपेत्स्नेहपलद्वये॥६४॥ ॥एरंडक्काथतुल्यांशांमधुतैलंपलाष्टकं॥शतपुष्पापलार्धेनसैंधवार्धेनसंयुतं॥६५॥

१०२

मेदोगुल्मकृमिप्लीहमेहार्शोवर्त्तनाशनः ॥६६॥
मधुतैलिकसंज्ञोयंबस्तिर्दर्वीविलोडितः ॥ ॥मधुतैलिकबस्तिः॥ ॥क्षौद्राज्यक्षीरतै
बलवर्णकरश्चैववृष्यादीपनबृंहणः ॥६७॥ ॥दीपनस्मृतः ॥६८॥ ॥दीपनब
लानांप्रसृतिःप्रसृतिर्भवेत् ॥हपुषासैंधवक्षारैर्बस्तिस्याद्दीपनस्मृतः ॥ ॥एषयुक्तैरसोबस्तिःसैवचापिप्पली
स्तिः॥ ॥एरंडमूलनिःक्वाथोमधुतैलंससैंधवं ॥पंचमूलस्यनिक्काथैतैलंमागधिकामधु ॥ससैंधवः
पलः॥६९॥ ॥युक्तरथबस्तिः॥ ॥सिद्धबस्तिः॥ ॥स्नानमुष्णोदकैःकुर्याद्दिवा
समधुकःसिद्धबस्तिरितिस्मृतः॥७०॥ ॥इतिश्रीशा॰शा॰चिकि
स्वप्नमजीर्णतां॥वर्जयेदपरंसर्वमाचरेत्स्नेहबस्तिवत् ॥७१॥ ॥अथउत्तरबस्तिः॥ ॥अतःपरंप्रवक्ष्यामि
त्सास्थानेनिरूहबस्तिविधिरध्यायः॥ ॥मालतीपुष्पवृंता
बस्तिमुत्तरसंज्ञितं ॥द्वादशांगुलकंनेत्रंमध्येचकृतकर्णिकां ॥७२॥ तदूर्ध्वपलमा
भच्छिद्रंसर्षपनिर्गमिं ॥पंचविंशतिवर्षाणांआधोमात्राद्विकर्षिकी ॥७३॥ स्थित
त्राचस्नेहस्योक्ताभिषग्वरैः ॥अथास्थापनशुद्धस्यतृप्तस्यस्नानभोजनैः ॥७४॥
स्यजानुमात्रेचपीठेन्विषशलाकया ॥स्निग्धयामेंढ्रमार्गेचततोनेत्रंनियोजयेत् ॥७५॥ १०२

शनैः शनैर्घृताभ्यक्तं मेढ्रे रंध्रेंगुलानि षट्॥ ततोवपीडयेद्बस्तिं शनैर्नेत्रं च निर्ह-
रेत्॥७६॥ ततः प्रत्यागते स्नेहे स्नेहबस्तिक्रमो हितः॥ स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्या-
द्दशांगुलं॥७७॥ मुद्गप्रवेशयोग्यं च योन्यंतश्चतुरंगुलं॥ द्व्यंगुलं मूत्रमार्गे च सूक्ष्मं नेत्रं
नियोजयेत्॥७८॥ मूत्रकृच्छ्रविकारेषु बालानां त्वेकमंगुलं॥ शनैर्निष्कंपमाधेयं सूक्ष्मं
नेत्रं विचक्षणैः॥७९॥ योनिमार्गे च नारीणां स्नेहमात्रा द्विपालिकी॥ मूत्रमार्गे पलोन्मा-
ना बालानां च द्विकर्षिकी॥८०॥ उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः॥ अप्रत्याग-
च्छति भिषग्बस्तावुत्तरसंज्ञिते॥८१॥ भूयो बस्तीं विदध्याच्च संयुक्तं शोधनैर्गुणैः॥ फलव-
र्त्तिं निदध्याद्वा योनिमार्गे दृढं भिषक्॥८२॥ सूत्रैर्विनिर्मितां स्निग्धां शोधनद्रव्यसंयुतां॥
दह्यमाने तथा बस्तौ दद्याद्बस्तीं विचारतः॥८३॥ क्षीरवृक्षकषायेण पयसा शीतलेन वा॥ ब-
स्तिः शुक्ररजःपुंसां स्त्रीणामार्तजा रुजः॥८४॥ हन्यादुत्तरबस्तिस्तु नाचिरान्मेहिनां क्वचित्
॥ सम्यग्गतस्य लिंगानि व्यापादः क्रम एव च॥८५॥ बस्तेरुत्तरसंज्ञस्य समानो स्नेहबस्ति-
ना॥ घृताभ्यक्ते गुदे क्षेप्या श्लक्ष्णा स्वांगुष्ठसंनिभा॥८६॥ मलप्रवर्त्तिनी वृत्तिः फलवर्त्तिश्च

॥इतिश्रीहा॰ग्रं॰चिकित्सास्थानेउत्तरबस्ति

१०४ सात्म्यता॥८७॥ ॥इतिफलवर्तिः॥ ॥नस्यंतत्कथ्यतेधीरैर्नासाग्राह्यंयदौषधं
विधिरध्यायः॥ ॥अथनस्यविधिः॥ ॥नस्यभेदोद्विधाप्रोक्तोरेचनंस्नेहनंतथा
॥नावनंतस्यकर्मेतितस्यनामद्वयंमतं॥८८॥ कफपित्तानिलोद्रेकेपूर्वमध्यपराह्णके
॥रेचनंकर्षणंप्रोक्तंस्नेहनंबृंहणंमतं॥८९॥ नस्यंत्यजेद्भुक्तवतांनेदुर्दिनेचापतर्पणे
॥दिनस्यगतस्यतेनस्यंरात्रावप्युत्कटेगदे॥९०॥ नस्यंत्यजेद्भुक्तवतांनेदुर्दिनेचापतर्पणे
॥तथानवप्रतिश्यायीगर्भिणीगरदूषितः॥९१॥ अजीर्णीदत्तबस्तिश्च पीतस्नेहोदका
॥तथानवप्रतिश्यायीगर्भिणीगरदूषितः॥ वेगावरोधिशः स्नानश्चस्नातुकामश्च
सचः॥क्रुद्धःशोकाभिभूतश्चतृषार्तोवृद्धबालकौ॥९२॥ अशीतिवर्षादूर्ध्वंचनावनंनवर्द्धी
वर्जयेत्॥ अष्टवर्षस्यबालस्यनस्यकर्मसमाचरेत्॥९३॥ तीक्ष्णभेषजसिद्धैर्वास्नेहैःक्वाथे
पतेअथवैरेचनंनस्यंग्राह्यंतैलैःसुतीक्ष्णकैः॥९४॥ प्रत्येकंरेचनंयोज्यंमुख्यमुख्यां
रसैस्तथा॥ नासिकारंध्रयोरष्टौषट्चत्वारश्चबिंदवः॥९५॥ हिंगुस्याद्यवमात्रंतुमाषकं १०४
समात्रया॥ नस्यकर्मणिदातव्यंशाणैकंतीक्ष्णमौषधं॥९६॥ कर्षिकंमधुरंद्रव्यंनस्य
सैंधवंमतं॥ क्षीरंचैवाष्टशाणंस्यात्तानीयंचत्रिवार्षिकं॥९७॥

कृमिणि योजयेत्॥ अवपीडं प्रधमनं द्वौ भेदावपरौ स्मृतौ॥९८॥ शिरोविरेचनस्थाने तौ तु देयौ यथायथं॥ कल्कीकृताद्‌ औषधाद्यः पीडितो निःसृतो रसः॥९९॥ सोऽवपीडः समुद्दिष्टस्तीक्ष्ण द्रव्यसमुद्भवः॥ षडंगुला द्विवक्त्रा या नाडी चूर्णं तया धमेत्॥१००॥ तीक्ष्णं कोलमितं वक्त्रवातेन प्रधमनं हि तत्॥ ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये॥१॥ अरोचके प्रतिश्याये शिरःशूले च पीनसे॥ शोफापस्मारकुष्ठेषु नस्यं वैरेचनं स्मृतं॥२॥ भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते॥ गलरोगे सन्निपाते निद्रायां सविषज्वरे॥३॥ मनोविकारे कृमिषु युज्यते चावपीडनं॥ असंतोऽत्कटदोषेषु विसंज्ञेषु चरीष्यते॥४॥ चूर्णं प्रधमनं धीरैस्तच्छिन्नं तीक्ष्णतरं

यनः॥५॥ ॥विरेचनं नस्यं यथा॥ ॥नस्यं स्यान्मधुकभृंगीभ्यां पिप्पल्या सैंधवेन वा॥ जलपिष्टेन तेनाशु कर्णनासाशिरोगदाः॥६॥ मन्या हनुगलोद्भूता नश्यन्ति भुजपृष्ठजाः॥ मधूकसारकृष्णाभ्यां वचामरिच सैंधवैः॥७॥ नस्यं कोष्णजलैः पिष्टं दद्यात्संज्ञाप्रबोधनं॥ अपस्मारे तथोन्मादे सन्निपाते पतंत्रके॥८॥ सैंधवं श्वेतमरिचं सर्षपाः कुष्ठमेव च॥ बस्तमूत्रेण पिष्टानि नस्यं तन्द्रानिवारणं॥९॥ रोहितं मत्स्यपित्तेन भावितं मरिचं वचा॥ कट्फलं चे

१०५ न्वितश्चूर्णं दद्यात्प्रधमनं बुधैः ॥१०॥ ॥अथ बृंहणनस्यस्य कल्पना कथ्यते बुधैः ॥ ॥ मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ ॥ मर्शस्तु तर्पणो मात्रा मुख्या शाणैः स्मृता
अष्टभिः ॥११॥ मध्यमा च चतुः शाणैः हीनो शाणमिता स्मृता ॥ एकैकस्मिंस्तु मात्रेयं देया
नासापुटे बुधैः ॥१२॥ मर्शोऽस्य द्वित्रिवेलं वा वीक्ष्य दोषबलाबलं ॥ एकान्तरं द्व्यन्तरं वा नस्यं
दद्याद्विचक्षणः ॥१३॥ त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितः ॥ मर्शः शिरोविरेकश्च व्या
पद्येत विधा स्मृताः ॥१४॥ दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ता यथाक्रमं ॥ दोषोत्क्लेशनि
मित्तेषु युञ्ज्याद्वमनशोधनं ॥१५॥ अथ क्षयनिमित्तासु यथास्वं बृंहणं हितं ॥ शिरो नासा
क्षिरोगेषु सूर्यावर्तार्धभेदके ॥१६॥ दन्तरोगे बले हीने मन्याबाहुंसजे गदे ॥ मुखशोषे क
र्णनादे वातपित्तगदे तथा ॥१७॥ अकालपलिते चैव केशश्मश्रुप्रपातने ॥ युञ्ज्यते बृं
हणं नस्यं स्नेहैर्वा मधुरद्रवैः ॥१८॥ ॥ बृंहणं नस्यं यथा ॥ ॥ सशर्करं पयः पिष्टं भृष्ट
माज्येन कुङ्कुमं ॥ नस्यप्रयोगतो हन्याद्वातरक्तभवा रुजः ॥१९॥ भ्रूशंखाक्षिशिरः कर्णसू
र्यावर्तार्धभेदकान् ॥ नस्यं स्यादणुतैलेन तथा नारायणेन वा ॥२०॥ माषादिना वा सर्पिभि १०५

स्तन द्रेषजसाधितैः ॥ तैलं कफे स्याद्वाते च केवले पवने वसा ॥२१॥ दद्यान्नस्यं सदा पित्ते
सर्पिर्मज्जानमेव च ॥ माषात्मगुप्तारास्नाभिर्बलारुबुकरोहिषैः ॥२२॥ कृतेनाश्वगंधया क्वा
थो हिंगुसैंधवसंयुतः ॥ कोष्णो नस्यप्रयोगेण पक्षाघातं सकंपनं ॥२३॥ जयेदर्दितवातं
च मन्यास्तंभावबाहुकौ ॥ प्रतिमर्शस्य मात्रा तु द्विद्विबिंदुमिता मता ॥२४॥ प्रसेको नासि
कयोः स्नेहेनेति विनिश्चितः ॥ स्नेहेऽगुष्ठपर्वप्रावनिमग्ने च्योतितं ततः ॥२५॥ तर्जनीपर्वव
हिंदुसा मात्रा बिंदुसंज्ञिता ॥ एवंविधैर्बिंदुसंख्यैरष्टभिः शाणउच्यते ॥२६॥ सद्योमर्शेन
स्येषु प्रतिमर्शे द्विबिंदुकः ॥ समयाः प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश ॥२७॥ प्रभाते दंत
काष्ठांते गृहान्निर्गमने तथा ॥ व्यायामाध्वव्यवायांते विण्मूत्रांजनेकृते ॥२८॥ कवलांते
भोजनांते दिवास्वप्नोत्थिते तथा ॥ वमनांते तथा सायं प्रतिमर्शः प्रयुज्यते ॥२९॥ ईषदुच्छिं
दना स्नेहो यदा वक्त्रं प्रपद्यते ॥ नस्ये निषिक्तं तं विद्यात्प्रतिमर्शप्रमाणतः ॥३०॥ उच्छिंदन्न
पिबेच्चैतन्निष्ठीवेन्मुखमागतं ॥ क्षीणे तृष्णास्यशोषार्त्ते बाले वृद्धे च युज्यते ॥३१॥ प्रतिम
र्शेन शाम्यंती रोगाश्चैवोर्ध्वजत्रुजाः ॥ वलीपलितनाशश्च बलमिंद्रियजं भवेत् ॥३२॥ बि

१०६

भीतनिंबकंभारीशिवाशैलुश्चकाकिनी॥ एकैकं तैलनस्येन पलितं नस्यति ध्रुवं॥३३॥
॥अथनस्यविधिंवक्ष्ये नस्यग्रहणहेतवे॥ द्विशोवानरजोमुक्ते कृतदंतनिघर्षणं॥३४॥
विशुद्धं धूमपाने नस्विन्नभालगलंतथा॥ उत्तानशायिनं किंचित्प्रबलं शिरसन्नरं॥३५॥
आस्तीर्णहस्तपादंचवस्त्रछादितलोचनं॥ समुन्नमीतनासाग्रं वैद्योनस्येनयोजयेत्॥३६॥
कोष्णमच्छिन्नधारंच हेमताराद्रिशुक्तिभिः॥ शुक्त्यावापत्रशुक्त्यावा श्लोनैवानिस्यमाचरेत्॥
॥३७॥ नस्येष्वासिच्यमाने षु शिरोनैवप्रकंपयेत्॥ नकुप्येन्नप्रभाषेत्तन छिंद्येन्नहसेत्तथा॥
॥३८॥ एतैर्हि विहितैः स्नेहोनैवातः संप्रपद्यते॥ ततःकासप्रतिश्यायशिरोक्षीगदसंभवः॥३९॥
शृंगाटकमभिप्लाव्यस्थापयेन्नगिलेद्द्रवं॥ पंचसप्तदशोवस्युर्मात्रानस्यस्यधारणे॥४०॥
उपविश्याथनिष्ठीवेन्नासावक्त्रगतंद्रवं॥ वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्सन्मुखंनहि॥४१॥
वीतनस्यमनस्तापरजःक्रोधंचसंत्यजेत्॥ शयीतनिद्रांस्यक्त्वाच प्रोत्तानोवाकुरातंनरः॥४२॥
तथावैरेचनस्यांते धूमोवाकवलोहितः॥ नस्येत्रीण्युपदिष्टानि लक्षणानि प्रयोगतः॥४३॥ १०६
शुद्धिहीनातियोगानि विशेषाच्छास्त्रचिंतकैः॥ लाघवंमनसःशुद्धिःश्रोतसांव्याधिसंक्षयः॥४४॥

चित्तेंद्रियप्रसादश्च शिरसः शुद्धलक्षणं॥ कंडूपदेहौ गुरुता स्रोतसां कफसंस्रवः॥४५॥
मूर्ध्नि हीनविशुद्धे तु लक्षणं परिकीर्तितं॥ मस्तुलुंगागमो वातवृद्धिरिंद्रियविभ्रमः॥४६॥
शून्यता शिरसश्चापि मूर्ध्नि गाढं विरेचिते॥ हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्॥४७॥
सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं निषेचयेत्॥ कफप्रसेकः शिरसो गुरुत्वेंद्रियविभ्रमः॥४८॥
लक्षणं नस्ति स्निग्धे तत्र रूक्षं प्रदापयेत्॥ भोजयेच्चानुभिष्यंदि नस्याचारिकमादिशेत्॥४९॥
वमनं रेचनं नस्यं निरूहश्चानुवासनं॥ एतानि पंचकर्माणि कथितानि मुनीश्वरैः॥५०॥
॥ ॥इति श्रीशा॰ उ॰ चिकित्सास्थाने नस्यविधिरध्यायः॥ ॥अथ धूमपानविधिः॥ ॥
धूमस्तु षड्विधः प्रोक्तः शमनं बृंहणस्तथा॥ रेचनः कासहा चैव वमनो व्रणधूपनः॥५१॥
शमनस्य तु पर्यायो मध्यः प्रायोगिकस्तथा॥ बृंहणस्यापि पर्यायः स्नेहनो मृदुरेव च॥५२॥
रेचनस्यापि पर्यायो शोधनस्तीक्ष्ण एव च॥ अधूमार्हाश्च खल्वेते श्रांतो भीतश्च दुःखितः॥
॥५३॥ दत्तबस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा॥ पिपासितश्च दाहार्तस्तालुशोषी तथोदरी॥
॥५४॥ शिरोभितापी तिमिरी छर्द्याध्मानप्रपीडितः॥ क्षतोरस्कः प्रमेहार्तः पांडुरोगी च गर्भि

णी॥५५॥रूक्षः क्षीणोऽभ्यवहृतः क्षीरक्षौद्रघृतासवः॥भुक्त्वान्नं दधिमत्स्यांश्च बालो वृद्धः
कृशस्तथा॥५६॥अकाले चातिपीतश्च धूमः कुर्यादुपद्रवं॥तत्रेष्टं सर्पिषः पानं नावनंजन
तर्पणं॥५७॥सर्पिरिक्षुरसद्राक्षापयो वा शर्करांबु वा॥मधुराम्लौ रसौ वापि वमनाय प्रदा
पयेत्॥५८॥धूमश्च द्वादशावर्षान्न ग्राह्यो नाशिनिकाभ्रच॥कासश्वासप्रतिश्यायामन्याहनु
शिरोरुजः॥५९॥वातश्लेष्मविकारांश्च हन्याद्धूमः सुयोजितः॥धूमोपयोगात्पुरुषः प्रसन्ने
न्द्रियवाङ्मनाः॥६०॥दृढकेशद्विजः श्मश्रुः सुगंधी वदनो भवेत्॥धूमनाडी भवेत्तत्र त्रिखंडा
च त्रिपर्विका॥६१॥कनिष्ठिकापरीणाहा राजमाषागमांतरे॥धूमनाडी भवेद्दीर्घा शमने रो
गिणांगुलैः॥६२॥चत्वारिंशन्मितान्हृन्नुह्या त्रिंशद्भिर्मदोमता॥तीक्ष्णे चतुर्विंशतिभिः कास
घ्ने षोडशोन्मितैः॥६३॥दशांगुले वमनीये तथास्याद्व्रणनाडिका॥कलायमंडलस्थूला कु
लत्थागमरंध्रका॥६४॥अथैषिकां प्रलिपेच्च सुश्लक्ष्णां द्वादशांगुलां॥धूमद्रव्यस्य कल्के
न लेपश्चाष्टांगुलसंमतः॥६५॥कल्कं कर्षमितं लिप्त्वा छायाशुष्कं च कारयेत्॥ईषिकामपनी
याथ स्नेहाक्तां वर्तिमाहरात्॥६६॥अंगारे दीपितां कृत्वा धृत्वा नेत्रस्य रंध्रके॥वदनेन पिबेद्धू

मं वद‌ने नैव सं सजेत् ॥६७॥ नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः ॥ शरावसंपुटे क्षिप्त्वा कल्कमंगारदीपितं ॥६८॥ छिद्रे नेत्रं निवेश्याथ व्रणं नेत्रेण धूपयेत् ॥ एलादिकल्कं रोमने स्निग्धं सर्जरसं मृदौ ॥६९॥ रेचने तीक्ष्णकल्कं च कासघ्नं शुद्धिकोषणं ॥ वमने स्नायुचर्माद्यं दद्याद्धूमस्य पानकं ॥७०॥ व्रणे निंबवचाद्यं च धूपनं संप्रशस्यते ॥ अन्येपि धूपा गेहेषु कर्तव्या रोगशांतये ॥७१॥ ॥तद्यथा॥ ॥मयूरपिच्छं निंबस्य पत्राणि बृहतीफलं ॥ मरिचं हिंगु मांसी च बीजं कार्पाससंभवं ॥७२॥ छागरोमाहिनिर्मोकं विष्टा बैडालिकी तथा ॥ गजदंतश्च तच्चूर्णं किंचिद्घृतविमिश्रितं ॥७३॥ गेहेषु धूपनं दत्तं सर्वान्बालग्रहान्जयेत् ॥ पिशाचान् राक्षसान्जित्वा सर्वज्वरहरो भवेत् ॥७४॥ ॥अपराजितो धूपः॥ ॥परिहारस्तु धूमेषु कार्यो वैरेचनस्य वत् ॥ नेत्राणि धातुजान्याहुर्नलवंशादिजान्यपि ॥७५॥ ॥इति श्रीदा॰ शा॰ चिकित्सास्थाने धूमपानविधिरध्यायः॥ ॥अथ गंडूषकवलप्रतिसारणविधिः॥ ॥चतुर्विधस्याद्गंडूषः स्नैहिकः शमनस्तथा ॥ शोधनो रोपणश्चैव कवलश्चापि तद्विधः ॥७६॥ स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः ॥

१०८

कषायतिक्तमधुरैः कटूष्णो रोपणे व्रणे ॥
पित्ते कट्वम्ललवणैरुष्णैः संशोधनैः कफे ॥७७॥
असंचारी मुखे पूर्णो गंडूषः कवलोऽपरः ॥ न
चतुःप्रकारो गंडूषः कवलश्चापि कीर्तितः ॥७८॥ दद्याद्द्रवैरम्बु चूर्णैश्च गंडूषे काल मात्रकं ॥ कर्ष
त्रद्द्रवेण गंडूषः कल्केन कवलः स्मृतः ॥७९॥ धार्यते पंचमाद्वर्षाद्गंडूषे कवलादयः ॥ गंडूषा
प्रमाणः कल्कैश्च कवले दीपने बुधैः ॥८०॥ मनुष्यस्त्रीन्तथा पंचसप्तवा दोषनाशनात् ॥
सुस्थितः कुर्यात्स्विन्नभालगलादिकः ॥८१॥ नेत्रघ्राणश्रुतिर्यावन्नाव गंडूषधारणं ॥
कफपूर्णस्य तावत्स्याद्दोषस्य वा भवेत् ॥८२॥ तीलं नीलोत्पलं सर्पिः श
॥८३॥ ॥ न घया ॥ ॥ तिलकल्कोदकं क्षीरं स्नेहा स्नेहिके हितः ॥ दंतहर्षे शीतं
क्षीरमेव च ॥८४॥ सद्योद्दाह नुवक्रास्या गंडूषो दाहनाशनः ॥ विशदं जनयत्यास्यं
संदधाति मुखव्रणान् ॥८५॥ दाहतृष्णाप्रशमनं मधुगंडूषधारणं ॥ विषक्षाराग्निदाह
च सर्पिर्धार्यं पयोऽथवा ॥८६॥ तैलसैंधव गंडूषो दंते चाले प्रशस्यते ॥ शोषं मुखस्य वैरस्यं
गंडूषात्कांजिकं जयेत् ॥८७॥ सिंधु त्रिकटु राजीभिरार्द्रकेन कफे हितः ॥ त्रिफला मधु गंडू
षः केफरक्तपित्तनाशनः ॥८८॥ दार्वी गुडूची त्रिफला द्राक्षा बीजाश्च पल्लवः ॥ यवासश्चेति

१०८

तत्क्काथः षष्ठांशः क्षौद्रसंयुतः ॥८९॥ शीतो मुखे धृतं हन्यात् मुखपाकं च त्रिदोषजं ॥ य
स्यौषधस्य गंडूषस्तस्यैव प्रतिसारणं ॥९०॥ कवलश्चापि तस्यैव ज्ञेयोत्र कुशलैर्नरैः ॥
॥९१॥ ॥कवलो यथा॥ ॥केसरं मातुलिंगस्य सैंधवोषणसंयुतं ॥ हन्यात्कवलतो
जाता मरीचं कफवातजां ॥ कल्को वलेहश्चूर्णं च त्रिविधं प्रतिसारणं ॥ अंगुल्यग्रप्र
णीतं च यथास्वं प्रतिरोगिणं ॥९२॥ ॥प्रतिसारणचूर्णं यथा॥ ॥कुष्टदार्वीसमंगा
च पाठा तिक्ता च पीतिका ॥ तेजनी मुस्त लोध्रं च चूर्णं स्यात्प्रतिसारणं ॥९४॥ रक्तस्रुती
दंतपीडां शोथं दाहं च नाशयेत् ॥ हीनयोगात्कफोत्क्लेशो शिरसा भारुचीनथा ॥९५॥ अति
योगान्मुखपाकः शोषस्तृष्णा क्लमो भवेत् ॥ व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवं ॥९६॥
इंद्रियाणां प्रसादश्च गंडूषे शुद्धलक्षणं ॥९७॥ ॥इति श्रीशा॰ङ्गां चिकित्सास्थाने गंडूषा
दिविधिरध्यायः ॥ ॥अथ लेपमूर्धतैलपूर्णपूरणविधिः ॥ ॥आलेपकस्य नामानि
निलिप्तिर्लेपश्चलेपनं ॥ दोषघ्नो विषहा वर्ण्यो मुखालेपस्त्रिधा मतः ॥९८॥ त्रिप्रमा
णं च तु भागार्धं भागार्धांगुलोन्नतः ॥ अर्द्रो व्याधिहरः सस्यात् शुष्को दोषयति छवीं ॥९९॥

१०९

॥ शोषघ्नो लेपनो यथा ॥ ॥ पुनर्नवादारुशुंठीसिद्धार्थशिग्रुमेव च ॥ पिष्टैश्चैवारनालेन
प्रलेपः सर्वशोथजित् ॥ १० ॥ बिभीतफलमज्जस्तु लेपो दाहार्तिनाशनः ॥ शिरीषं मधुयष्टी
कं तगरं रक्तचंदनं ॥ १ ॥ एलामांसीनिशायुग्मं कुष्टवालकमेव च ॥ इति संचूर्ण्य लेपोयं
पंचमांशघृतप्लुतः ॥ २ ॥ जलेनक्षीपतेसूतेद्दिशंगदशिसंज्ञतः ॥ विसर्पांत्विषविस्फोटान्
शोथदुष्टव्रणाञ्जयेत् ॥ ३ ॥ ॥ विषहा लेपो यथा ॥ ॥ अजादुग्धतिलैर्लेपो नवनीतेन संसं
पुतः ॥ शोथमारुष्करार्थं तिलेपो वा कृष्णामृत्तिलैः ॥ ४ ॥ लांगल्यति विषालांबुजालिनीमू
लबीजकैः ॥ लेपो धान्यांबुसंपिष्टः कीटविस्फोटनाशनः ॥ ५ ॥ ॥ वर्ण्यो लेपो यथा ॥ ॥
रक्तचंदनमंजिष्ठालोध्रकुष्टप्रियंगवः ॥ वटांकुरा मसूराश्च व्यंगघ्ना मुखकांतिदाः ॥ ६ ॥ मा
तुलुं गजटासर्पिः शिलागोशकृतोरसः ॥ मुखकांतिकरो लेपः पीडकाव्यंगकीलजित्
॥ ७ ॥ लोध्रधान्यवचालेपस्तारुण्यपीडकापहः ॥ तद्वद्गोरोचनायुक्तं मरीचं मुखलेपनात्
॥ ८ ॥ सिद्धार्थकवचालोध्रसैंधवैश्च प्रलेपनं ॥ व्यंगेषु चार्जुनत्वग्वा मंजिष्ठा वा समाक्षि
का ॥ ९ ॥ लेपः सनवनीतो वाश्वत्थाम्बखुरजा मषी ॥ अर्कक्षीरहरिद्राभ्यां मर्दयित्वा बिलेपना

१०९

नू ॥१०॥ मुखकार्ष्ण्यं समं यांति चिरकालोद्भवं ध्रुवं ॥ वटस्यापांडुपत्राणि मालतीर
क्तचंदनं ॥११॥ कुष्टं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ॥ तारुण्यपीडकाव्यंगनी
लिकादिविनाशनं ॥१२॥ पुराणमथ पिण्याकं पुरीषं कुक्कुटस्य च ॥ मूत्रपिष्टं प्रलेपोयं
शीघ्रं हन्याद्दरूषिकां ॥१३॥ खदिरारिष्टजंबूनां त्वग्भिर्वा मूत्रसंयुतैः ॥ कुटजत्वक् सैंधवं
वा लेपो हन्याद्दरूषिकां ॥१४॥ प्रियालबीजमधुकं कुष्टमाषैः ससैंधवैः ॥ कार्यो दारुण
के मूर्ध्नि प्रलेपो मधुसंयुतः ॥१५॥ दुग्धेन खाकसं लेपो दारुणं त्वजयेध्रुवं ॥ आम्रबी
जस्य चूर्णं च शिवाचूर्णं समं द्वयं ॥१६॥ दुग्धपिष्टं प्रलेपोयं दारुणं हंति दारुणं ॥ रसासि
कपटोलस्य पत्राणां नहि लेपनात् ॥१७॥ इंद्रलुप्तं शमं यांति त्रिभिरेव दिनैर्ध्रुवं ॥ इंद्रलु
प्तघ्नहा लेपो मधुना बृहतीरसः ॥१८॥ गुंजामूलं फलं चापि भल्लातकरसो पि वा ॥ क्षा
क्षुरस्तिलपुष्पाणि गुल्यं च मधुसर्पिषि ॥१९॥ शिरः प्रलेपनं तेन केशसंवर्धनं प
रं ॥ हस्तिदंतमषीं कृत्वा छागदुग्धे रसांजनं ॥२०॥ रोमाण्यनेन जायंते लेपात्पाणितले
ऽपि ॥ षष्टीद्रवरमहिका तैलं जं क्षीरलेपनैः ॥२१॥ इंद्रलुप्तः शमं याति केशास्युः

नादृढाः॥ चतुः पहानां त्वकुलोम्न खमृंगास्थिभस्मभिः॥२२॥ तैले न सह लेपोयं लो
मसंजननः परः॥ अपोरजो भृंगराज त्रिफला कृष्णमृत्तिका॥२३॥ स्थितमिक्षुरसे मासं
लेपनात्पलितं जयेत्॥ धात्रीफलद्वयं पथ्ये द्वे तथैकं बिभीतकं॥२४॥ पंचाम्रमज्जा लोह
स्य कर्षैकं च प्रदीयते॥ पिष्ट्वा लोहमये भांडे स्थापयेद्दूषितं निशि॥२५॥ लेपोयं हंति नै
श्चिरादूकालपलितं महत्॥ त्रिफला निलिकापत्र लोहभृंगरसः समं॥२६॥ अविमू
त्रेण संपिष्टं लेपात्कृष्णीकरः स्मृतं॥ त्रिफला लोहचूर्णं च दाडिमत्वक् बिसं तथा॥२७॥
प्रत्येकं पंचपलिकं चूर्णं कृत्वा विचक्षणः॥ भृंगराजरसस्यापि प्रस्थ षट्कं प्रदापयेत्॥
॥२८॥ क्षिप्त्वा लोहमये पात्रे भूमिमध्ये निधापयेत्॥ मासमेकं ततः कुर्यात् छागदुग्धेन
लेपनं॥२९॥ कूर्चौ सिरसि रात्रौ च संवेष्टोरंडपत्रकैः॥ स्वप्यात्प्रातः स्नातः कुपलितानं ते
न च जायते॥३०॥ पलितस्य विनाशश्च त्रिभिर्लेपैर्न संशयः॥ शंखचूर्णस्य भागो द्वौ ताल
कं चैकभागिकं॥३१॥ मनःशिला चार्धभागा स्वर्जिका चैव भागिका॥ लेपायं वारि पिष्टस्तु
केशानुत्सादयदीयते॥३२॥ अनया लेपयुक्त्या च सप्तवेलं प्रयुक्तया॥ निर्मूलिं केशस्थानं

११०

नालकं शाणयुग्मं च षट्शाणं शंख-चूर्णकं ॥ द्विशाण
स्या (स्य)यं नस्यशिरोयथा ॥३३॥ नालकं शाणयुग्मं च षट्शाणं शंख-चूर्णकं ॥ द्विशाण
कंपलाशस्य क्षारं दत्वा च मर्दयेत् ॥३४॥ कदलीदंडतोयेन रविपत्रैस्तु नवा ॥ अस्यापि
सप्तभिर्लेपै रोम्णां शातनमुत्तमं ॥३५॥ सुवर्णपुष्पिका सीसं विडंगानि मनःशिला ॥ रोच
नां सैंधवं चैव लेपनात् श्वित्रनाशनं ॥३६॥ वायस्पंडगजाकुष्टकृष्णा मेकत्र नाकृता ॥ बस्त
मूत्रेण संपिष्टा प्रलेपा श्वित्रनाशिनी ॥३७॥ नालकः शाणमात्रस्या च्चतुः शाणाश्च बाकुची ॥
गोमूत्रपिष्टं तच्चूर्णं लेपनात् श्वित्रनाशनं ॥३८॥ बाकुचीवेतसो लाक्षा काकोदुंबरिका कणा ॥ र
सांजनं अयश्चूर्णं तिलाः कृष्णाः स्नेहकृतः ॥३९॥ चूर्णयित्वा गवां मूत्रैः पिष्ट्वा च गुटिका कृता ॥
अस्या नस्त्रलेपात् श्वित्राणि प्रणस्यंतानि वेगतः ॥४०॥ धात्री सर्जरसश्चैव यवक्षारश्च चूर्णितः ॥
सौवीरेण प्रलेपोयं प्रयोज्यः सिध्मनाशनः ॥४१॥ दार्वीमूलकबीजानि नालकं सुरदारु च ॥
तांबूलपत्रं सर्वाणी कार्षिकानि पृथक्पृथक् ॥४२॥ शंख-चूर्णं शाणमात्रं सर्वमेकत्र कारयेत्
॥ लेपोयं वारिणा पिष्टः सिध्मानां नाशनः परः ॥४३॥ हरीतकी सैंधवं च गैरिकं च रसांजनं ॥
बिडालको जलापिष्टः सर्वनेत्रामयापहः ॥४४॥ रसांजनं व्योषपुनं संपीष्य वटकं कृतं ॥

१११

कंडूपाकान्वितांहंती लेपादंजननामिकां ॥४५॥ प्रपुन्नाटस्य बीजानि बाकुचीशकरास्थि
ता: ॥ कुष्टं निशाद्वयं मुस्तं पिष्टं तक्रेण चैकत: ॥४६॥ प्रलेपादस्य नश्यंती कंडुदद्रुविचर्चिका:
॥ हेमक्षीरी विडंगानि दूरदं गंधकस्तथा ॥४७॥ दद्रुघ्न: कुष्ठसिंदूरसर्वाण्येकत्र मर्दयेत् ॥
धत्तूरनिंबतांबूलपत्राणां स्वरसै: पृथक् ॥४८॥ अस्य प्रलेपमात्रेण पामादद्रुविचर्चिका
॥ कंडूश्वरकसा चैव प्रशामं यांति वेगत: ॥४९॥ दूर्वाभयासैंधवं च चक्रमर्द: कुठेरक: ॥ ए
भिस्तक्रयुतो लेप: कंडूदद्रुश्च नाशन: ॥५०॥ दूर्वानिशायुतो लेप: कंडूपामाविनाशन: ॥ कृ
मिदद्रुहरश्चैव शीतपित्तापह: स्मृत: ॥५१॥ सिद्धार्थरजनीकुष्टै: प्रपुन्नाटतिलै: सह ॥ क
टुतैलेन संमिश्रं लेपनं कंडुदद्रुनुत् ॥५२॥ रास्नानीलोत्पलं दारु चंदनं मधुकं बला ॥ घृत
क्षीरयुतो लेपो विसर्पानिलशांतन: ॥५३॥ मृणालं चंदनं लोध्रमुशीरं कमलोत्पलं ॥ सारि
वामलकी पथ्या लेप: पित्तविसर्पनुत् ॥५४॥ त्रिफलापद्मकोशीरसमंगाकरवीरकं ॥ ने
लमूलमनंता च लेप: श्लेष्मविसर्पहा ॥५५॥ मांसी सर्जरसो लोध्रं मधुकं सहरेणु च ॥ मू
र्वानीलोत्पलपद्मं शिरीषकुसुमै: सह ॥५६॥ प्रलेप: पित्तवातास्रशांतधौतघृत: पुन: ॥

१११

आमलकं घृतभ्रष्टं तु पिष्टं कांजिकवारिणा ॥५७॥ जयेत् मूर्ध्नि प्रलेपेन रक्तनासिकया श्रुतं
॥ कुष्ठमेरंडतैलेन लेपात् कांजिकपेषिते ॥५८॥ शिरोर्तिं वातजां हन्यात् पुष्पं वा मुचकुंदजं ॥
देवदारु नतं कुष्ठं नलदं विश्वभेषजं ॥५९॥ सकांजिकस्नेहयुक्तो लेपो वातशिरोर्तिनुत् ॥ चं
दनोशीरयष्ट्याह्व बलाव्याघ्रनखैस्समैः ॥६०॥ क्षीरपिष्टैः प्रलेपस्स्याद्रक्तपित्तशिरोर्तिजित् ॥ धा
त्रीकसेरु सह्वीवेरपद्मपद्मकचंदनैः ॥६१॥ दूर्वोशीरनलानां च मूलैः कुर्यात् प्रलेपनं ॥ शिरो
र्तिं पित्तजां हन्याद्रक्तपित्तरुजं तथा ॥६२॥ हरेणुनतशैलेयमुस्तैलागुरुदारुभिः ॥ मांसी
रास्नोरुबुकैश्च कोष्णो लेपः कफार्तिनुत् ॥६३॥ सारिवाकुष्ठमधुकवचाकृष्णोत्पलैस्तथा ॥
लेपः सुकांजिकः स्नेहः सूर्यावर्तार्धभेदकैः ॥६४॥ सुंठीकुष्ठप्रपुन्नाटदेवकाष्ठैः सरोहिषैः ॥
मूत्रपिष्टैः सुखोष्णश्च लेपः श्लेष्मशिरोर्तिनुत् ॥६५॥ वरीनीलोत्पलं दूर्वा तिलाः कृष्णा पुन
र्नवा ॥ शंखकं नतवातं च लेपः सर्वशिरोर्तिनुत् ॥६६॥ ॥अथालेपविधिः॥ आन्यः प्रोच्यते स्तन
संमिताः ॥ छोनस्य कथितो भेदो प्रलेपाख्यः प्रदेहकौ ॥६७॥ चर्मार्द्रमाहिषं यद्वत् प्रमाणं समिति
स्तयोः ॥ शीतस्तनुर्विशोषाच्च प्रलेपः परिकीर्तितः ॥६८॥ आर्द्रो घनः स्याथोष्णास्याप्रदेह श्ले

११२

ष्मवातहा॥ रोमाभिमुखमादेयो प्रलेपाख्यं प्रदेहको॥६९॥ वीर्यसम्यग्विशा सा सुरोमकूपैः शिरामुखैः॥ न रात्रौ लेपनं कुर्याद्दत्तं च पलितं तथा॥७०॥ न च पर्युषितं चापि शुष्यमाने न धारयेत्॥ शुष्यमानमुपेक्षेत प्रदेहं पीडनं प्रति॥७१॥ न म सापि हितोष्मा रोमकूपैः मुखौ स्थितः॥ विनालेपेन निर्याति रात्रौ नालेपयेद्गतः॥७२॥ रात्रावपि प्रलेपादिविधिः कार्यो विचक्षणैः॥ अपाकिशोथे गंभीरे रक्तश्लेष्मसमुद्भवैः॥७३॥ आदौ शोथहरो लेपो द्वितीयो रक्तसेचनः॥ तृतीयः शोपनाहः स्या चतुर्थः पाटनः क्रमः॥७४॥ पंचमः शोधनो भूयः षष्ठो रोपण इष्यते॥ सप्तमो वर्णकरणो व्रणस्येति क्रमो मतः॥७५॥ ॥सप था॥ ॥बीजपूरजटाहिंस्रादेवदारुमहौषधं॥ रास्नाग्निमंथलेपोयं वातशोथविनाशनः॥७६॥ मधुकं चंदनं दूर्वा नलमूलं च पद्मकं॥ उशीरं वालकं पद्मं पित्तशोथप्रलेपनं॥७७॥ कृष्णा पुराणपिण्याकं शिग्रुत्वक् सिकता शिवा॥ मूत्रपिष्टः सुखोष्णोयं प्रदेह श्लेष्मशोथहा॥७८॥ द्विनिशा चंदनं दूर्वा शिवा दूर्वा पुनर्नवा॥ उशीरं पद्मकं लोध्रं गैरिकं च रसांजनं॥७९॥ आगंतुके रक्तजे च शोथे कुर्यात् लेपनं॥ शतमूलकशिग्रूणां फलानि

११२

तिलसर्षपाः॥८०॥शाकवः किण्वमतसीप्ररोहः पाचनस्मृतः॥दंती चित्रकमूलत्वक्

स्नुह्यर्कपयसी गुडैः॥८१॥भल्लातकास्थि कासीससैंधवैः दारुणः स्मृतः॥चिरबिल्वोग्नि

कोदंती चित्रको हयमारकः॥८२॥कपोतकंकगृध्राणां मलं लेपेन दारुणं॥सर्जिकायवक्ष्

काद्याः क्षाराः लेपेन दारुणाः॥८३॥हेमक्षीर्यस्त्यथा लेपो व्रणपरमदारुणः॥तिलसैंधवपथ्या

हृ निंबपत्र निशायुगैः॥८४॥त्रिवृतुघ्नमपुतैः पिष्टैः प्रलेपो व्रणशोधनः॥निंबपत्रघृ

तेसोद्र्व्दावीमधुकसंयुतः॥८५॥तिलैश्च सहसंयुक्तो लेपं शोधनरोपणः॥करंजारिष्ट

निर्गुंडीलेपो हन्याद्व्रणः कृमीन्॥८६॥लसुनेस्यो थवालेपो हिंगुनीबभयापवा॥निंबप

त्रतिला दंतीत्रिवृत्सैंधवमाक्षिकं॥८७॥दुष्टव्रणप्रशमनो लेपः शोधनके सरी॥मस्तस्य

फलं तिक्ता पिष्ट्वा कांजिकवारिणा॥८८॥कोष्णं कुर्यान्नाभिलेपं भूलशांतिर्भवेन्नतः॥त्रि

गुसोफालके रंउयवगोधूममुद्गकैः॥८९॥सुरवोष्णा वहलो लेपः प्रयोज्यो वातविद्रधौ॥

पैत्तिके सर्पिषा लाजामधुकैः शर्करान्वितैः॥९०॥प्रलिंपेत्क्षीरपिष्टैर्वा पयस्योशीरचंदनैः॥

इष्टिकासिकता लोह किट्टं गोसकृतासह॥९१॥सुखोष्णाश्च प्ररेहा पंमूत्रैस्यात्श्लेष्म

विद्रधौ॥ रक्तचंदनमंजिष्ठानिशामधुकगैरिकैः॥९२॥ क्षीरेण विद्रधौ लेपो रक्ता
गंतु निमित्तजे॥ निचूलशिग्रुबीजानि दशमूलमथापि वा॥९३॥ प्रदेहो वातगंडेतु सुखो
ष्णः संप्रदीयते॥ देवदालीविशालेतु कफगंडे प्रदेहकः॥९४॥ सर्षपारिष्टपत्राणि द
ग्ध्वा भल्लातकैः सह॥ छागमूत्रेण संपिष्टमपचिघ्नं प्रलेपनं॥९५॥ सर्षपान् शिग्रु
बीजानि शानबीजान्तसीयवान्॥ मूलकस्य च बीजानि तक्रेनाम्लेन पेषयेत्॥९६॥ गंड
मालार्बुदं गंडं लेपेनानेन शाम्यति॥ प्रस्रपि वा क्षुरे नागं केवलानि। लपीठितं॥९७॥
नत्र प्र दहेदग्धा च पिष्टगुंजाफलैः कृतं॥ नेनाववाहुजापीडा विश्वाचीगृध्रसीतथा॥९८॥
अन्यापि वातजा पीडा प्रशमं याति वेगतः॥ धत्तूरैरंडनिर्गुंडीवषभूशिग्रुसर्षपैः॥९९॥
प्रलेपः श्लीपदं हंति चिरोत्थमपि दारुणं॥ अजाजी हपुषा कुष्ठमेरंडबदरान्वितं॥१००॥
काञ्जिकेन च संपिष्टं कुरु घ्नं प्रलेपनं॥ करवीरस्य मूलेन परिपिष्टेन वारिणा॥१॥ अ
साध्यापि व्रजत्यस्तं लिंगोत्था रुक्प्रलेपनात्॥ दहेत्कटाहे त्रिफलां तन्मषीं मधुसंयु
तां॥२॥ उपदंशे प्रलेपोयं सद्यो रोपयति व्रणं॥ रसांजनं शिरीषेण पथ्यया च समान्वितं॥

॥३॥ सक्षौद्रं लेपनं योज्यमुपदंशगदापहं ॥ चिंचिणीत्वक्मषीचूर्णं उपदंशगदापहं ॥ ४॥ अग्नि
दग्धे तु गोक्षीरीप्लक्षचंदनगैरिकैः ॥ साम्रतैः सर्पिषा स्निग्धै रालेपं कारयेद्भिषक् ॥ ५॥ तिंदु
कीत्वक्कषाये वा घृतमिश्रैः प्रलेपयेत् ॥ यवा दग्ध्वा मसी कार्या तैलेन पुनया तथा ॥ ६॥ दग्धात्ते
वाग्नि दग्धे तु प्रलेपं व्रणरोपणं ॥ पलाशोदुंबरफलैस्तिलतैलसमन्वितैः ॥ ७॥ मधुना योनि
मालिप्य गाढीकरणमुत्तमं ॥ माकंदमूलसंयुक्तमधुकर्पूरलेपनात् ॥ ८॥ गतेपि यौवने स्त्री
णां योनिर्गाढा निजायते ॥ मरिचं सैंधवं कृष्णा तगरं बृहतीफलं ॥ ९॥ अपामार्गः स्तिलाः
कुष्ठं यवा माषाश्च सर्षपाः ॥ अश्वगंधा च तच्चूर्णं मधुना सह योजयेत् ॥ १०॥ अस्य संततलेपेन
मर्दनाच्च प्रजायते ॥ लिंगवृद्धिः स्तनोत्सेधः सेहनिभुजिकर्णयोः ॥ ११॥ सिताश्वगंधासिंधूत्थ
छागक्षीरैर्घृतं पचेत् ॥ तल्लेपान्मर्दनाल्लिंगवृद्धिः संजायते पुरा ॥ १२॥ इंद्रवारुणिकापत्ररसैः सू
तं विमर्दयेत् ॥ रक्तस्य करवीरस्य काष्ठेन च मुहुर्मुहुः ॥ १३॥ तल्लिप्तलिंगसंयोगात्योनिद्रावः
प्रजायते ॥ तांबूलपत्रकृष्णानुचूर्णकुष्ठशिवाभवं ॥ १४॥ वारिणालेपनं कुर्याद्गात्रदौर्गंध्य
नाशनं ॥ कुलत्थो शंखवःकुष्ठ मांसी चंदनजं रजः ॥ १५॥ शंखवस्त्रनकस्यैव वल्कचैवैकत्र

११४

कारयेत् ॥ स्वेददौर्गंध्यनाशाश्च जायते स्याद्वधूपनात् ॥ १६ ॥ वचा सौवर्चलं कुष्ठं रजन्यो मरि
चानि च ॥ एतत्प्रभावेन वशीकरणमुत्तमं ॥ १७ ॥ ॥ अथ मूर्धतैलं ॥ ॥ अभ्यंगपरिसेक
श्चापिचुर्बस्ति रिति क्रमात् ॥ मूर्धतैलं च चतुर्धा स्यात् बलवच्च यथोत्तरं ॥ १८ ॥ त्रयोभ्यंगादयः पूर्वे
प्रसिद्धाः सर्वतः स्मृताः ॥ शिरोबस्ति विधिश्चात्र प्रोच्यते स्तु त्र संमतः ॥ १९ ॥ शिरो बस्ति श्चर्मण
स्याद्द्विमुखो द्वादशांगुलः ॥ शिरः प्रमाणस्तं बध्वा मस्तके माषपिष्टके ॥ २० ॥ संविरोधं विधायाथ
मुस्नेहैः कोष्णैः प्रपूरयेत् ॥ तावद्धार्यस्तु यावत्स्यान्नासानेत्रमुखस्रुतिः ॥ २१ ॥ वेदनोपशमो वा
पि मात्राणां वा सहस्रकं ॥ विना भोजनमेवात्र शिरोबस्तिः प्रशस्यते ॥ २२ ॥ प्रयोज्यस्तु शिरोब
स्तिः पंचसप्ताहमेव च ॥ दिमान्यं शिरसो बस्तिं ग्रहीयाच्च समं मतः ॥ २३ ॥ उर्ध्वकायस्ततः को
ष्णनीरैः स्नानं च कारयेत् ॥ अनेन दुर्जया रोगा वातजा यांति संक्षयं ॥ २४ ॥ शिरः कंपादयस्तेन
सर्वकालेषु युज्यते ॥ २५ ॥ ॥ अथ कर्णपूरणं ॥ ॥ स्वेदयेत्कर्णदेशं तु किंचित्तु पार्श्वशा
यिनः ॥ मूत्रैः स्नेहैः रसैः कोष्णैः स्तनस्रोत्रं प्रपूरयेत् ॥ २६ ॥ कर्णं च पूरितं रक्षेच्छतं पंचशतानि
किं च ॥ सहस्रं वापि मात्राणां श्रोत्र कंठ शिरोगदे ॥ २७ ॥ स्वजानुनः करावर्तं कुर्याच्छोटिकं

११४

मधुतं ॥ एष मात्रा भवेदिका सर्वत्रैष विनिश्चयः ॥ २८ ॥ रसाद्यैः पूरणं कर्णे भोजनात्प्राक्प्र
शस्यते ॥ तैलाद्यपूरणं कर्णे भास्करेस्तमुपागते ॥ २९ ॥ ॥ तद्यथा ॥ ॥ पीतार्कपत्रमाज्येन लि
प्तं वह्नौ प्रतापयेत् ॥ तद्रसः श्रवणे क्षिप्तः कर्णशूलहरः परः ॥ ३० ॥ कर्णशूलातुरे कोष्णं बस्त
मूत्रं ससैंधवं ॥ निक्षिपेत्तेन शाम्यंती शूलपाकादिका रुजाः ॥ ३१ ॥ शृंगवेरं च मधुकं सैंधवं
मधु चाम्लकं ॥ तिलपर्णीरसे तैलं टं कुणं निंबुकद्रवं ॥ ३२ ॥ कदुष्णं कर्णयोर्देयमेतद्वा वेद
नापहं ॥ कपित्थमातुलुंगाम्लशृंगवेररसैः शुभैः ॥ ३३ ॥ सुखोष्णैः पूरयेत्कर्णं कर्णशू
लोपशांतये ॥ अर्कांकुरान् अम्लपिष्टान् तैलाक्तान् लवणान्वितान् ॥ ३४ ॥ संविदग्ध्यास्नुहीकां
डे कारितेन छद्रावृतौ ॥ पुटपाकक्रमं कृत्वा रसेस्तस्य प्रपूरयेत् ॥ ३५ ॥ सुखोष्णेस्तेन शाम्यंति
कर्णपीडा सुदारुणाः ॥ महतः पंचमूलस्य कांडान्यष्टांगुलानि तु ॥ ३६ ॥ क्षोमेनावेष्ट्य सं
सिच्य तैलेनादीपयेत्ततः ॥ यत्तैलं पच्यते तेभ्यः सुखोष्णं तेन पूरयेत् ॥ ३७ ॥ ज्ञेयं तद्दीपि
का तैलं सद्योगृह्णा निवेदनां ॥ एवं स्याद्दीपिका तैलं कुष्ठे देवतरोस्तथा ॥ ३८ ॥ तैलं स्योनाक
मूलेन मंदेऽग्नौ परिपाचितं ॥ हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात् ॥ ३९ ॥ कल्कक्वथि

११५

नयस्याद्गूकंकोलामाषधान्यकैः॥शूकरस्यवसापक्वाकर्णनादाश्रुवाशिनी॥४०॥स्वर्जिका
मूलकंशुंठी हिंगुकृष्णासमन्वितं॥शतपुष्पांचतैस्तैलंपक्वंसूक्तचतुर्गुणं॥४१॥प्रणादशू
लबाधिर्यश्रावकर्णस्यनाशयेत्॥अपामार्गक्षारजलेनक्षारेकल्कितंजयेत्॥४२॥तेनप
क्वंजयेत्तैलंबाधिर्यकर्णनादकं॥शंबूकस्यतुमांसेनपचेत्तैलंचसर्षपं॥४३॥तस्यपूरण
मात्रेणकर्णनाडीप्रणश्यति॥चूर्णंपंचकषायाणांकपित्थरसमेववा॥४४॥कर्णस्रावे
प्रशंसंतिपूरणंमधुनासह॥तिंदुकान्यभयालोध्रंसमंगाचामलकंपि॥४५॥ज्ञेयाःपं
चकषायास्तुकर्मण्यस्मिन्भिषग्वरैः॥स्वर्जिकाःस्वर्णसंयुक्तंबीजपूररसंक्षिपेत्॥४६॥क
र्णस्रावरुजोदाहःप्रणश्यतिनसंशयः॥आम्रजंबूप्रवालानिमधुकस्यवटस्यच॥४७॥ए
भिःसंसाधितंतैलंपूतिकर्णप्रशांतिकृत्॥पूरणेहरितालेनगवांमूत्रयुतेनच॥४८॥अथ
वासार्षपंतैलंकर्णकीटहरंपरं॥स्वरसेशिग्रुमूलस्यसूर्यावर्तरसस्तथा॥४९॥त्र्यूषणं
चूर्णितंचैवकपिकच्छजटारसं॥कृत्वेकत्रक्षिपेत्कर्णेकर्णकीटहरंपरं॥५०॥सद्योहिंगु
निहंत्याशुकर्णकीटंसुदारुणं॥५१॥ ॥इतिश्रीहा॰शा॰चिकित्सास्थानेलेपादिविधिरध्या ११५

233

प:॥ ॥अथ शोणितस्रावविधिः॥ ॥शोणितं स्रावयेज्जंतोरामयप्रसमीक्ष्य च॥ प्र
स्थं प्रस्थार्धकं वापि प्रस्थार्धार्धमथापि वा॥५२॥शरत्काले स्वभावेपि कुर्याद्रक्तस्रुतिं न
रः॥त्वग्दोषग्रंथिशोथाद्या न स्यू रक्तस्रुतेर्यतः॥५३॥मधुरं च वर्णतो रक्तमशीतोष्णं तथा गु
रु॥शोणितं स्निग्धविस्रं स्याद्विदाहश्चास्य पित्तवत्॥५४॥विस्रत्वाद्रवता रागः स्पंदनं विल
यस्तथा॥भूम्यादिपंचभूतानामेते रक्ते गुणाः स्मृताः॥५५॥रक्ते दुष्टे वेदनास्यात्पाको दाहश्च
जायते॥रक्ते मंडलता कंडूः शोफश्च पिडकोद्गमः॥५६॥वृद्धे नेत्रांगरक्तत्वं शिराणां पूर्णता
तथा॥गात्राणां गौरवं निद्रा मदो दाहश्च जायते॥५७॥क्षीणेम्लमधुराकांक्षा मूर्छा च त्वचि
रूक्षता॥शैथिल्यं च शिराणां तु वातानामार्गगामिता॥५८॥अरुणं फेनिलं रूक्षं परुषं तनु शी
घ्रगं॥प्रस्कंदि सूचिभिस्तोदि रक्तं स्याद्वातदूषितं॥५९॥पित्तेन पीतं हरितं नीलं श्यामं च वि
स्रकं॥असृक्षं घुष्णमक्षिकाणां पिपीलीनामनिष्टकं॥६०॥शीतलं बहुलं स्निग्धं गैरिकोदर
संनिभं॥मांसपेशीप्रभं रक्तं शीमं दृगं कफदूषितं॥६१॥द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगंध
कं॥सर्वलक्षणसंयुक्तं कांजिकाभं च जायते॥६२॥विषदुष्टं भवेच्छ्यावं नासिकोन्मार्ग

११६

गं तथा ॥ विस्रं कांजिकसंकाशं सर्वकुष्ठकरं तथा ॥६३॥ दद्रुगुल्मप्रभृतेयं प्रकृतिस्थ
मसंहनं ॥ शोथे दाहेंगपाके च रक्तवर्णरुजः श्रुतो ॥६४॥ वातरक्ते तथा कुष्ठे सर्पी उद्दुर्ज
पेनिले ॥ पाणिरोगे श्लीपदे च विषदुष्टे च शोणिते ॥६५॥ ग्रंथ्यर्बुदापचीक्षुद्ररोगरक्ताधि
मंथिषु ॥ विदारी स्तनरोगेषु गात्राणां सादगौरवे ॥६६॥ रक्ताभिष्यंदतंद्रायां पूतिघ्राणा
स्यदेहिके ॥ यकृत्प्लीहविसर्पेषु विद्रधौ पीडकोद्गमे ॥६७॥ कर्णौष्ठघ्राणवक्त्राणां पाके दा
हे शिरोरुजि ॥ उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते ॥६८॥ लघुरोगेषु शृंगैर्वा जलौकालां
बुकैरपि ॥ अथवापि शिरामोक्षैः कुर्याद्रक्तस्रुतिं नरः ॥६९॥ न कुर्वीत शिरामोक्षं कृशस्या
तिस्रवायिनः ॥ क्लीबस्य भीरोर्गर्भिण्याः सूतिकापांडुरोगिणां ॥७०॥ पंचकर्मविशुद्धस्य पी
तस्नेहस्य देहिनः ॥ सर्वांगशोथयुक्तानां उदरे श्वासकासिनां ॥७१॥ छर्द्यतीसारयुक्तानां अ
तिस्विन्नतनोरपि ॥ ऊनषोडशवर्षस्य गतसप्ततिकस्य च ॥७२॥ आद्यं नष्टुनरकस्य शि
रामोक्षो न दृश्यते ॥ एषां चासंनिके रोगे जलौकाभिस्तु निर्हरेत् ॥७३॥ गाम्भे गेन जलौका ११६
भिरलांबुभिरपि त्रिधा ॥ तथा च विषयुष्टानां शिरामोक्षोपि दृश्यते ॥७४॥ वातपित्तकफैर्दु

ष्टं शोणितं स्रावयेद्बुधः॥ द्विदोषाभ्यां तु संपुष्टं त्रिदोषैरपि दूषितं॥ ७५॥ शोणितं स्रावयेद्वैद्यु
क्त्या शिरामोक्षैः पदैस्तथा॥ गूढं तु शोणितं शृंगं दशांगुलमितं बलात्॥ ७६॥ जलौका हस्तमा
त्रं तु तु बं तु ह्वा दशांगुलं॥ पदमंगुलमात्रं स्यात् शिरा सर्वांगशोधिनी॥ ७७॥ शीतेनिरुद्धे मूर्छा
ते निरुद्धे भीतिमदश्रमैः॥ पुतानां न स्रवेद्रक्तं तथा विण्मूत्रसंज्ञितां॥ ७८॥ अग्रवर्तिनिरक्ते च
कुष्टत्रिकटुसैंधवैः॥ मर्दयेद्व्रणवक्त्रं च तेन सम्यक् प्रवर्तते॥ ७९॥ न स्नातस्रीतेना सुष्णे
नास्विन्ने नातिनापिते॥ पीतायवागूं न प्रस्य स्रावयेच्छोणितं बुधः॥ ८०॥ अतिस्विन्ने स्योष्ण
कालेन तथैवातिशिराव्यधात्॥ अतिप्रवर्तते रक्तं तत्र कुर्यादिति क्रियां॥ ८१॥ अतिप्रवृत्ते रक्ते
च लोध्रसर्जरसांजनैः॥ यवगोधूमचूर्णैर्वा धवधन्वयगैरिकैः॥ ८२॥ सर्पनिर्मोकचूर्णं वा
भस्मना क्षौमवस्त्रयोः॥ मुखं व्रणस्य रुंध्याच्च शीतैश्चोपचरेद्व्रणं॥ ८३॥ विध्येदूर्ध्वं शिरां तावा
दहेत्क्षीरेण वाग्निना॥ व्रणकषायः संधत्ते रक्तं स्कंदयते हिमं॥ ८४॥ व्रणास्ये पाचयत्यसी
रोदाहः संकोचयच्छिरां॥ ८५॥ ॥दाहोयथा॥ ॥वामांगशोथे दक्षस्य करस्यांगुष्ठमूल
जां॥ दहेच्छिरां व्यत्यये तु वामांगुष्ठशिरां दहेत्॥ ८६॥ शिरादाहप्रभावेण मुष्कशोथः प्रण
श्यति॥ विसूच्यां पार्ष्णिदाहेन जायतेग्निः प्रदीपनं॥ ८७॥ संकुचेदिपत्रस्तेन रसश्लेष्मवहाः

११७

शिराः ॥ यदा वृद्धिर्यकृत्प्लीहोः शिशोः संजायते स्रुतः ॥ ८८ ॥ न दातव्या ते देहे न संकुचं च सरुजः
शिराः ॥ रक्ते दुष्टे च शिष्टेऽपि व्याधिर्नैव प्रकुप्यति ॥ ८९ ॥ अतः श्राव्यं सावशेषं रक्तेनातिक्रमो हि
तः ॥ आध्मानमपेक्षकं तृष्णां तिमिरं शिरसो रुजं ॥ ९० ॥ पक्षाघातं श्वासकासौ हिक्कां दाहं च पांडु
तां ॥ कुरुते निःश्रुतं रक्तं मरणं वा करोति च ॥ ९१ ॥ देहस्योत्तनिरस्रजा देहस्तेनैव धार्यते ॥ विना
तेन व्रजेज्जीवो रक्षेद्रक्तमतो बुधः ॥ ९२ ॥ शीतोपचारैः कुपिते श्रुतरक्ते स्य मारुते ॥ कोष्णे
न सर्पिषा शोथं सव्यथं परिषेचयेत् ॥ ९३ ॥ क्षीणस्यैव शरीरस्य हरिणच्छागमांसजः ॥ रसः स
मुचितः पाने क्षीरं वा षष्टिका हितो ॥ ९४ ॥ पीतान्नं निर्लघु तच्चे व्याधेरुद्रेकसंक्षयः ॥ मनः
स्वास्थ्यं भवेच्चिह्नं सम्यग्विस्राविते रुजि ॥ ९५ ॥ व्यायाममैथुनक्रोधशीतस्नानप्रवातका
न् ॥ एकाशनं दिवानिद्रां क्षाराम्लकटुभोजनं ॥ ९६ ॥ शोकं वादमजीर्णं च सजेदाबलदर्शनात्
॥ ९७ ॥ ॥ इति श्री शा० ग्रा० चिकित्सास्थाने रक्तश्रुतिरध्यायः ॥ ॥ अथ नेत्रप्रसादनक
र्माणि ॥ ॥ सेक आश्च्योतनं पिंडी बिडालस्तर्पणं तथा ॥ पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रि
मुपाचरेत् ॥ ९८ ॥ ॥ अथ सेकः ॥ ॥ सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः ॥ मीलि
ताक्षस्य नरस्य प्रदेयश्चतुरंगुलान् ॥ ९९ ॥ स चापि स्नेहनो वाते रक्ते पित्ते च रोपणः ॥

११७

लेखनश्च कफे कार्यस्तस्य मात्राधुनोच्यते॥१००॥ षड्वाक् तैले स्नेहने षु चतुर्भिश्चैव रोपणे ॥वाक्शतैश्च त्रिभिः कार्यः सेको लेखनकर्मणि॥१॥ कार्यस्तु दिवसे सेको रात्रौ चात्ययिके
गदे॥२॥ ॥सयथा॥ ॥एरंडत्वक्पत्रमूत्रैः शृतमाज्यं पयो हितं॥ सुखोष्णं सेचनं नेत्रे
वाताभिष्यंदनाशनं॥३॥ ॥वाताभिष्यंदे॥ ॥परिषेके हितं नेत्रे पयः कोष्णं ससैंधवं॥
रजनीदारुसिद्धं वा सैंधवेन समन्वितं॥४॥ वाताभिष्यंदशमनं मारुतं पर्यये — ॥शु
ष्काक्षिपाके चाहितं दृङ्सेचनकं सदा॥५॥ वाताभिष्यंदे वातपर्यये शुष्काक्षिपाके च॥६॥
सांबरं मधुकं तुल्यं घृतभ्रष्टं सुचूर्णितं॥७॥ छागक्षीरे श्रितं सेकात्सिन्न रक्ताभिघातकृत्
॥८॥ ॥नेत्राभिघाते॥ ॥त्रिफलालोध्रयष्टीभिः शर्करा भद्रमुस्तकैः॥ पिष्टैः शीतांबु
नासेको रक्ताभिष्यंदनाशनः॥९॥ ॥रक्ताभिष्यंदे॥ ॥लाक्षामधुकमंजिष्ठालोध्रकौ
जानुसारिवा॥ पुंडरीकपुनः सेको रक्ताभिष्यंदनाशनः॥१०॥ ॥रक्ताभिष्यंदे॥ ॥श्वेत
लोध्रं घृतभ्रष्टं चूर्णितं पटविस्तृतं॥ उष्णांबुना विमर्दितं सेकाच्छूलघ्नमंबके॥११॥ ॥
नेत्रशूले॥ ॥आश्च्योतनं॥ ॥अथाश्च्योतनकं कार्यं निशायां न कथंचन॥ उन्मीलिते

११८

क्षिरं मध्ये विंदुभिर्हिंगुलादि [illegible] ॥१२॥ बिंदवोष्टौ लेखने षु स्नेहने द्वाबिंदवः॥ रोपणे द्वा
दश प्रोक्ता स्ते शीते कोष्णरूपिणः॥१३॥ उष्णं च शीतरूपास्युः सर्वत्रैष विनिश्चयः॥ वातेति
क्ते तथास्निग्धं पित्ते मधुर शीतलं॥१४॥ तिक्तोष्णरूपं च कफे क्रमाद्दश्च्योतनं हितं॥ आ
श्च्योतनानां सर्वेषां मात्रास्याद्वादशानं हितं॥१५॥ निमेषोन्मेषणं पुंसां मंगुल्योः छोटि
कां तथा॥ गुर्वक्षरोच्चरणं वा वाकुमात्रेयं स्मृता बुधैः॥१६॥ ॥ तथा॥ ॥ बिल्वादि
पंचमूले बृहसैरंड शिग्रुभिः॥ क्वाथं आश्च्योतने कोष्णो वाताभिष्यंदनाशनः॥१७॥ ॥
पंचमूले बृहत्सैरंडश्च शिग्रुभिः॥ क्वाथंआश्च्योतने कोष्णो वाताभिष्यंदनाशनः॥१७॥ ॥
वाताभिष्यंदे॥ ॥ अंबुपिष्टैर्निंबपत्रैस्त्वचं लोध्रस्य लेपयेत्॥ त्रतोप्यवह्निनापिष्टात
वाताभिष्यंदे॥ ॥ अंबुपिष्टैर्निंबपत्रैस्त्वचं लोध्रस्य लेपयेत्॥ त्रतोप्यवह्निनापिष्टात
द्रसो नेत्रपूरणात्॥१८॥ वातात्सरक्तपित्तोत्थं अभिष्यंदं विनाशयेत्॥१९॥ वातरक्ते पित्तभि
ष्यंदे॥ ॥ त्रिफलाश्च्योतनं नेत्रे सर्वाभिष्यंदनाशनं॥२०॥ ॥ सर्वाभिष्यंदे॥ ॥ स्त्रीस्तन्या
श्च्योतनं नेत्रे रक्तपित्तानिलार्त्तिजित्॥ अभिष्यंदशूले॥२१॥ ॥ क्षीरसर्पिर्घृतं वापि वानर
क्षं रुजं जयेत्॥ अभिष्यंदशूले॥२१॥ ॥ अथ पिंडिका॥ ॥ पिंडी कवलिका प्रोक्ता ब
ध्यते वस्त्रपट्टकैः॥ नेत्राभिष्यंदयोग्या सा व्रणेष्वपि निबध्यते॥२२॥ अभिष्यंदे धिमंथे

११८

चसजाते श्लेष्मसंभवे ॥ स्निग्धास्विन्नोत्तमागस्य शिरस्तीक्ष्णै विरेचयेत् ॥ २३ ॥ अधिमं
थेषु सर्वेषु ललाटे वेधयेच्छिरां ॥ अशांते सर्वथा मंथे भ्रुवोरुपरि दाहयेत् ॥ २४ ॥ अभिष्यं
देषु सर्वेषु बध्नीयात् पिंडिकां बुधः ॥ वाताभिष्यंद शांत्यर्थं स्निग्धोष्णा पिंडिका तथा ॥ २५ ॥
एरंडमूलपत्रत्वक् निर्मिता वातनाशिनी ॥ पित्ताभिष्यंदनाशाय धात्री पिंडी सुखावहा ॥ २६ ॥
महानिंबफलोद्भूता पिंडिका पित्तनाशिनी ॥ शिग्रुपत्रकृता पिंडी श्लेष्माभिष्यंदहारिणी ॥ २७ ॥
निंबपत्रकृता पिंडी श्लेष्मपित्तहरा भवेत् ॥ त्रिफला पिंडिका प्रोक्ता नाशयेत् श्लेष्मपित्तयोः ॥
॥ २८ ॥ पिष्ट्वा कांजिकतोयेन घृतभ्रष्टा च पिंडिका ॥ लोध्रस्य हरति क्षिप्रम् अभिष्यंदमसृग्भ
वं ॥ २९ ॥ शुंठी निंबदलै पिंडी सुखोष्णा स्वल्पसैंधवा ॥ धार्या चक्षुषि संयोगाच्छोथकंडूव्यथा
पहः ॥ ३० ॥ ॥ अथ बिडालकः ॥ ॥ बिडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते ॥ तस्य मा
त्रा परिज्ञेया मुखालेपविधानवत् ॥ ३१ ॥ ॥ स यथा ॥ ॥ यष्टी गैरिक सिंधूत्थदार्वीतार्क्ष्यैः
समांशकैः ॥ जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ॥ ३२ ॥ रसांजनेन च वा लेपः पथ्याविश्वादलैरपि ॥ कुमारिकाग्निपत्रैर्वा दाडिमीपल्लवैरपि ॥ ३३ ॥ वचाहरिद्राविश्वैर्वा तथाना

११९

गरगैरिकैः॥ द्राक्षासैंधवं लोध्रं मधूच्छिष्टयुते घृते॥ ३४॥ पिंडमंजनलेपाभ्यांस
द्योनेत्ररुजापहः॥ लोहस्यपात्रे संघृष्टो रसो निंबूफलोद्भवः॥ ३५॥ किंचित्घनो बहिर्लेपो नेत्र
त्रवाधांव्यपोहति॥ संचूर्ण्य मरिचं कसरजस्वरसे मर्दनात्॥ ३६॥ लेपनादंजनाश्चाशुंकुरो
त्रवाधांव्यपोहति॥ संचूर्ण्य मरिचं कसरजस्वरसेमर्दनात्॥ शिलेलांन सिंधूत्थैः
सेषप्रयोगराट्॥ स्विन्नां भितावि निष्पीडाभिन्नामंजननामिकां॥ ३७॥ शिलेलांन सिंधूत्थैः
सक्षौद्रैः प्रतिसारयेत्॥ ३८॥ ॥ नेत्रांजन्यं॥ ॥ अथ तर्पणं॥ ॥ अथ तर्पणकं वाच्मि नेत्रत
सक्षौद्रैः प्रतिसारयेत्॥ ३८॥ ॥ नेत्रांजन्यं॥ ॥ अथ तर्पणं॥ ॥ अथ तर्पणकं वाच्मि नेत्रत
प्तिकरं परं॥ यद्रूक्षपरिशुष्कं च नेत्रं कठिलमाविलं॥ ३९॥ शीर्णपक्ष्मशिरोत्पातकृच्छ्रोन्मी
लन संयुतं॥ तिमिरार्जुनशुक्राद्यैरभिष्यंदाधिमंथकैः॥ ४०॥ शुष्काक्षिपाकशोथाभ्यां युतं वा
तविपर्यये॥ तन्नेत्रं तर्पणे योज्यं नेत्ररोगविशारदैः॥ ४१॥ दुर्दिनात्युष्णशीतेषु चिंतायास
भ्रमेषु च॥ अशांतोपद्रवे चाक्षिन्तर्पणं न प्रशस्यते॥ ४२॥ क्षतानतपरज्ञोहीनेदशो चोनान
शापिनः॥ आधारो माषचूर्णेन क्लिन्नेन परिमंडले॥ ४३॥ मसोद्दृढ वसंरोधोक र्तव्यो नेत्र
कैशयोः॥ पूरयेत्घनभांडेन विलीनेन सुखोष्णकैः॥ ४४॥ अथवा शतधौतेन सर्पिषाक्षी
ज्जेन वा॥ नेमग्नान्यक्षिपक्ष्माणि यावत्स्युस्तावदेव हि॥ ४५॥ पूरयेन्मीलिते नेत्रे ततउन्मील

११९

241

पेछनैः॥ धारयेद्वर्त्मरोगेषु वाऽम्रात्राणांशनं बुधः॥४६॥ स्वस्थे कफे संधिरोगे मात्रा पं
चशतं हितं॥ कफे च षट्शतं कृष्णरोगे सप्तशतं मतं॥४७॥ दृष्टिरोगेष्वष्टशतं अधिमंथे सह
स्त्रकं॥ सहस्त्रं वातरोगेषु धार्यमेवं हि तर्पणं॥४८॥ स्विन्नेन यवपिष्टेन स्नेहवीर्येरितं
ततः॥ यथास्वं धूमपानेन कफमस्य विरेचयेत्॥४९॥ एकाहं वा त्र्यहं वापि पंचाहं वेष्यते
चापरं॥ तर्पणे तृप्तिलिंगानि नेत्रस्य मानि भावयेत्॥५०॥ स्वस्वेस्वप्नाववोधत्वं वैशद्यं वर्णपा
टवं॥ निर्वृत्तिर्व्याधिनाशानि क्रियालाघवमेव च॥५१॥ अथ सास्त्रु गुरु स्निग्धं नेत्रस्याति
तितर्पणं॥ रूक्षमस्त्राविलं रुग्णं नेत्रं स्याद्धीनतर्पितं॥५२॥ रुक्षस्निग्धोपचाराभ्यामेतयो
स्यात्प्रतिक्रिया॥५३॥ ॥अथ पुटपाकः॥ ॥अनंतरं प्रवक्ष्यामि पुटपाकस्य साधनं॥
द्वौ बिल्वमात्रौ मांसस्य पिंडौ स्निग्धो मुषोषितौ॥५४॥ द्रव्याणां बिल्वमात्रं तु द्रवाणां कुडवो
मतः॥ तदैकध्यं समालोड्य पत्रैः सुपरिवेष्टितं॥५५॥ पुटपाकेन तप्तं स्यात्ततः स्यात्तद्रसं
बुधः॥ तर्पणोक्तविधानेन यथावदवचारयेत्॥५६॥ दृष्टिमध्ये निषेच्यः स्यान्नित्यमुत्ता
नशायिनः॥ स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा॥५७॥ हितः स्निग्धो ऽतिरूक्षस्य स्नि

१२०

ग्धास्यापि हि लेखनः॥ दृष्टेर्बलार्थमितरः पित्तास्रग्व्रणवाननुत्॥५८॥ सर्पिर्मांसव
सामज्जामेदःस्वाद्वौषधैः कृतः॥ स्नेहनः पुटपाकश्च धार्यस्याद्द्विशतेर्दृशः॥५९॥ जांगलानां
यकृन्मांसैर्लेखनद्रव्यसंयुतैः॥ कृष्णलोहरजस्ताम्रशंखविद्रुमसिंधुजैः॥६०॥ समुद्रफे
नकासीसस्रोतोंजनदधिमस्तुभिः॥ लेखनो वाक्शतानं धार्यस्तस्यैनावद्विधारणे॥६१॥ स्त
न्यजांगलमध्वाज्यतिक्तकद्रव्यपाचितः॥ लेखनात्त्रिगुणो धार्यः पुटपाकस्तु रोपणः॥६२॥ वि
गरत्तर्पणोक्तानां क्रियां व्यापत्तिदर्शने॥६३॥ ॥अथांजनं॥ ॥अथ संपक्वदोषस्य
प्राप्तमंजनमाचरेत्॥ हेमंते शिशिरे चैव मध्याह्नेंजनमिष्यते॥६४॥ पूर्वाह्णे वापराह्णे
च ग्रीष्मे शरदि चेष्यते॥ वर्षास्वनभ्रे नात्युष्णे वसंते च सदैव हि॥६५॥ लेखनं रोपणं
चैव तथा स्यात्स्नेहनांजनं॥ लेखनं क्षीरतीक्ष्णाम्लरसैरंजनमुच्यते॥६६॥ कषायतिक्तर
सयुक्तसस्नेहरोपणं मतं॥ मधुरं स्नेहसंपन्नमंजनं तु प्रसादनं॥६७॥ गुटिकारसचू
र्णानि त्रिविधान्यंजनानि च॥ कुर्याच्छलाकयांगुल्या हीनानि च यथोत्तरं॥६८॥ श्रांते पु
रुदिते भीते पीतमद्ये नवज्वरे॥ अजीर्णे वेगघाते च नांजनं संप्रशस्यते॥६९॥ ह

१२०

243

रेणुमात्रां कुर्वीत वर्त्तिं तीक्ष्णांजने भिषक् ॥ प्रमाणं मध्यमे ध्यर्धं द्विगुणं तु मृदौ भवेत् ॥
॥७०॥ रसक्रियां तु न मासा त्रिविडंगक मिता हिता ॥ मध्यमा द्विविडंगा स्याद्धीना त्वेक विडं
गका ॥ वैरेचनिक चूर्णं तु द्विशलाकं विधीयते ॥ मृदौ तु त्रिशलाकं स्याच्चेन स्त्रस्नैहिके
जने ॥ मुखयोः कुंठितात्म्ल क्ष्णाश्लाकाष्टांगुलोन्मिता ॥ अश्मजा धातुजा वा स्यात्कलाय
परिमंडला ॥७३॥ ताम्रलोहाश्मसंजाता शलाका लेखने मता ॥ सुवर्णरजतोद्भूता श
लाका स्नेहने स्मृता ॥७४॥ अंगुलीचमृदुत्वेन कथिता रोपणे बुधैः ॥ सायंप्रात र्वजिनं
स्यात्तत्सदा नैव कारयेत् ॥७५॥ नातिशीतोष्णवाताभ्र वेलायां संप्रशस्यते ॥ कृष्णभा
गादधः कुर्याद्दृपांगं यावदंजनं ॥७६॥ ॥अथ वर्तिः॥ ॥शंखनाभिर्विभीतस्य मज्जा
पथ्या मनःशिला ॥ पिप्पली मरिचं कुष्ठं वचा चेति समांशकं ॥७७॥ छागक्षीरेण संपि
ष्य वर्तिं कुर्याद्यवोन्मितां ॥ हरेणुमात्रां संघृष्य जलैः कुर्याद्दृशांजनं ॥७८॥ तिमिरं मांस
वृद्धिं च काचं पटलमर्बुदं ॥ रात्र्यंध्यं वार्षिकं पुष्पं च ॥ नैशं द्रोहस्यार्येजेत् ॥७९॥ ॥
इति लेखनी चंद्रोदयावर्तिः ॥ ॥पलाशपुष्पस्वरसैर्बहुशः परिभावितः ॥ करंजबी

१२१

जवर्तिस्तु दृष्टेपुष्पविनाशयेत् ॥ ८० ॥ इति लेखनवर्तिः ॥ ॥ समुद्रफेन सिंधूत्थशंखहंसांचैव त्वलैः ॥ शिग्रुबीजयुतैर्वर्तिः शुक्रादीनुशाकवल्लिखेत् ॥ ८१ ॥ ॥ इति लेखनी वर्तिः ॥ ॥ दंते दंतेवराहोष्ट्र गोहस्ताजखरोद्भवैः ॥ शंखमुक्तांभोधिफेनपुतैः सर्वैर्विचूर्णितैः ॥ ८२ ॥ दंतवर्तिः कृताश्लक्ष्णा शुक्राणां नाशिनीपरा ॥ ८३ ॥ ॥ इति लेखनीदंतवर्तिः ॥ ॥ नीलोत्पलं शिग्रुबीजं नागकेसरकं तथा ॥ एतत्कल्केकृतावर्तिरतिनिद्रांनिवारयेत् ॥ ८४ ॥ इति लेखनी वर्तिः ॥ ॥ अथ रोपणीवर्तिः ॥ ॥ तिलपुष्पाण्यशीतिस्युः षष्टिः संख्याकणाकणाः ॥ जातीकुसुमपंचाशन्मरिचानिचषोडश ॥ ८५ ॥ सूक्ष्मपिष्टैर्जलैर्वर्तिः कृताकुसुमिताभिधा ॥ तिमिरार्जुनशुक्राणां नाशिनीमांसवृद्धिहृत् ॥ ८६ ॥ एतस्याश्चांजनेमात्राप्रो[illegible]क्तासाधहिरेणुका ॥ ८७ ॥ ॥ इति रोपणीकुसुमिकावर्तिः ॥ ॥ रसांजनंहरिद्रेद्वे मालतीनिंबपल्लवाः ॥ गोशकृद्रससंयुक्ता वर्तिर्नक्तांध्यनाशिनी ॥ ८८ ॥ ॥ इति रोपणीनक्तांध्यहारिवर्तिः ॥ ॥ अथ स्नेहनीवर्तिः ॥ ॥ धात्र्यक्षपथ्याबीजानि ह्येकद्वित्रिगुणानितु ॥ पिष्ट्वावर्तिर्जलैः कुर्यादंजनं द्विहरेणुकं ॥ ८९ ॥ १२१

245

नेत्रस्त्रावं हरसामुवानरक्करुजं तथा ॥ १० ॥ ॥ इति स्नेहनवर्तिः ॥ ॥ अथ रसक्रिया ॥
॥ वटक्षीरेण संयुक्तो मुख्य कर्पूरजः कणः ॥ क्षिप्रमंजनतो हंति कुसुमं च द्विमासिकं ॥
॥ ११ ॥ ॥ इति लेखनीरसक्रिया ॥ ॥ क्षौद्रासलाला संघृष्टे मरिचे निसमंजयेत् ॥ अ
तिनिद्रासमं याति तमः सूर्योदयेन तथा ॥ १२ ॥ ॥ इति लेखनीरसक्रिया ॥ ॥ जातीपुष्पं प्र
वालं च मरिचं कटुकावचा ॥ सैंधवं बस्तमूत्रेण पिष्टं तंद्राघ्नमंजनं ॥ ॥ इति लेखनीरस
क्रिया ॥ ॥ सिरीषबीजगोमूत्रकृष्णामरिचसैंधवैः ॥ अंजनं स्यात्प्रबोधाय सरसोन
शिलावचैः ॥ १४ ॥ ॥ इति लेखनीरसक्रिया ॥ ॥ अथ रोपणीरसक्रिया ॥ ॥ दार्वीपटो
लमधुकं सनिंबपद्मकोत्पलं ॥ प्रपौंडरीकं चैतानि पचेत्तोये चतुर्गुणे ॥ १५ ॥ विपाच्यपा
दशेषं च भ्रष्टं नीत्वा पुनः पचेत् ॥ शीते चास्मिन्मधु सीतां दद्यात्पादांशिकां नरः ॥ १६ ॥ र
सक्रियैषा दाहस्युरक्तरागारुजोहरी ॥ १७ ॥ ॥ इति रोपणीरसक्रिया ॥ ॥ समुद्रफेनेन न
वकुक्कुटांड मनःशिलाशंखनरः कपालै ॥ मधुप्रयुक्तं कनकस्य बीजमाजन्मजातं कुसु
मं निहंति ॥ १८ ॥ रसांजनं सर्जरसो जातीपुष्पं मनःशिला ॥ समुद्रफेनो लवणं गैरिकं म

रिचानि च ॥ ९९ ॥ एतत्समांशं मधुनापिष्टाग्रक्लिन्नवर्त्मनि ॥ अंजनं क्लेदकंडुघ्नं पक्ष्म
णां च प्ररोहणं ॥ १०० ॥ इति रोपणी रसक्रिया ॥ ॥ गुडूचीस्वरसः कर्षः क्षौद्रं स्यान्मा
षकोन्मितं ॥ सैंधवं क्षौद्रतुल्यं स्यात्सर्वमेकत्र मर्दयेत् ॥ १ ॥ अंजयेन्नयने नेनापल्ला
र्मतिमिरं जयेत् ॥ काचकंडुलिंगनाशं शुष्ककृष्णागतान् गदान् ॥ २ ॥ ॥ इति रोपणी र
सक्रिया ॥ ॥ दुग्धेन कंडू क्षौद्रेण नेत्रस्रावं च सर्पिषा ॥ पुष्पं तैलेन तिमिरं कांजिके
न निशांध्यतां ॥ ३ ॥ पुनर्नवा जयेदाशु भास्करस्तिमिरं यथा ॥ ४ ॥ इति रोपणी रसक्रि
या ॥ ॥ वब्बूलदलनिः क्वाथो लेहीभूतस्तदंजनात् ॥ नेत्रस्रावो व्रजत्यस्तं मधुयुक्ता
न्नसंतापः ॥ ५ ॥ ॥ इति श्रीदा· त्रा· रसक्रिया ॥ ॥ हिज्जलस्य फलं घृष्टा पानीये नित्य
मंजनात् ॥ चक्षुःस्रावोपशांत्यर्थं कार्यमेतन्महौषधं ॥ ६ ॥ ॥ अथ स्नेहनी रसक्रि
या ॥ ॥ केतकस्य फलं घृष्टा मधुना नेत्रमंजयेत् ॥ ईषत्कर्पूरसहितं हितं नेत्रप्रसा
दनं ॥ ७ ॥ इति नेत्रप्रसादनी रसक्रिया ॥ ॥ सर्पिः क्षौद्रं चांजनं स्यात् शिरोसानस्य भे
षजं ॥ ८ ॥ इति स्नेहनी रसक्रिया ॥ ॥ अथ चूर्णांजनं ॥ ॥ दृक्षाउत्कुशिला काचशां

१२२

खचंदनसैंधवैः॥ द्रव्यैरंजनयोगोयंपुष्पामर्द्धवलेखनः॥९॥ ॥लेखनंचूर्णांजनं
॥ ॥कृष्णांछागवकृन्मध्येपक्कानेत्रेप्रयोजिता॥अचिराद्धंतिनक्तांध्यंतद्वत्तत्क्षौद्रमू
षणं॥१०॥ ॥लेखनंचूर्णांजनं॥ ॥शाणार्धमरिचंद्वौचपिप्पल्यर्णवफेनयोः॥शाणा
र्धसैंधवंशाणानवसौवीरकांजनात्॥११॥पिष्टंसूक्ष्मंचचित्रायां — — चूर्णांजनमिदं
॥कंडूकाचकफार्तानांमलानांचविशोधनं॥१२॥ ॥लेखनंचूर्णांजनं॥ ॥शिलायां
रसकंपिष्ट्वासम्यगाप्लाव्यवारिणा॥गृह्णीयात्तज्जलंसर्वंसजेच्चूर्णमधोगतं॥१३॥
शुष्कंचतज्जलंसर्वंपर्पटीसन्निभंभवेत्॥विचूर्ण्यभावयेत्सम्यक्त्रिवेलंत्रिफलारसैः
॥१४॥कर्पूरस्यरजस्तत्रदशमांशेननिक्षिपेत्॥अंजयेन्नयनंतेनसर्वदोषहरंहितं॥
॥१५॥सर्वदोषहरंचूर्णंचक्षुषोःसुखकारिच॥१६॥ ॥मृदुचूर्णांजनं॥ ॥अग्नित
प्तंचसौवीरंनिषिंचेत्त्रिफलारसैः॥सप्तवारांस्तथास्तन्यैःस्त्रीणांसिक्तंविचूर्णितं॥
॥१७॥अंजयेत्तेननयनेप्रसहंचक्षुषोर्हितं॥सर्वाण्यक्षिविकारांस्तुहन्यादेतन्नसं
संशयः॥१८॥ ॥प्रसादनंचूर्णांजनं॥ ॥त्रिफलाभृंगशुंठीनांरसैस्तद्वच्चसर्पि

१२३

षा॥ गोमूत्रमध्वाज्यक्षीरैः सिक्तो नागः प्रतापितः॥१९॥ तच्छलाका हरत्येव च सर्वनेत्रभवान् गदान्॥२०॥ ॥शलाका दृष्टिप्रसादनी॥ ॥गतदोषमये नाशु संपश्यन् सम्यगंभसि॥ प्रक्षाल्याक्षि यथादोषं कार्यं प्रत्यंजनं ततः॥ नवानि वा तद्दोषेक्षिणा धावनं संप्रयोजयेत्॥ प्रत्यंजनं तीक्ष्णतप्ते नेत्रे चूर्णः प्रसादनः॥२२॥ ॥सयथा॥ ॥शुद्धे नागेंदुनेशुद्धं तुल्यं सूतं विनिक्षिपेत्॥ कृष्णांजनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत्॥२३॥ दशांशं तेन कर्पूरं तस्मिंश्चूर्णे प्रदापयेत्॥ एतत्प्रत्यंजनं नेत्रे गदजिन्नयनामृतं॥२४॥ ॥नयनामृतं प्रत्यंजनं चूर्णांजनं॥ ॥जयपालस्य मज्जानं भावयेन्निंबुकाद्रवैः॥ एकविंशतिवेलं तु ततो वर्तिः प्रकल्पयेत्॥२५॥ मनुष्यलालया घृष्टः सतो नेत्रे तयांजयेत्॥ सर्पदष्टविषं हित्वा संजीवयति मानवं॥२६॥ ॥विषहारिवर्तिः॥ ॥ आयुर्वेदसमुद्रस्य गृहार्थमणिसंचयः॥ ज्ञानैः कैश्चिन्न बुधैस्तैस्तु कृपा विविधसंहिता॥२७॥ किंचिद्दर्शितनो नीता कृतेयं संहिता मया॥ कृपाकटाक्षविक्षेपमस्या कुर्वंतु साधवः॥२८॥ विविधगदार्तिदरिद्रनाशनं याहरिरमणीव करोति योगरत्नैः

१२३

॥ विलसितु शार्ङ्गधरस्य संहितासा कविहृद्देषु सरोजनिर्मलेषु ॥ २९ ॥ ॥ ॥
॥ ॥ इति श्रीशार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने नेत्रांजनविधि
र्नाम द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ ॥ शाके १७४६ तारणनामाब्दे दक्षिणायने श्राव
णशुक्ले द्वितीयायां सौम्यवासरे मिरजग्रामे पोटेरुपनामक नारायणात्मज विठ्ठले
न लिखितं ॥ ॥ अदृश्यभावान्मतिविभ्रमाद्वा यदर्थहीनं लिखितं मयात्र ॥ तत्स
र्वमार्यैः परिशोधनीयं कोपन्न कुर्युः खलु लेखकस्य ॥ ५ ॥ ॥ यादृशं पुस्तकं दृष्ट्वा
तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ ५ ॥ ॥ ॥
॥ श्रीसांबार्पणमस्तु ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

[OrderDescription]
,CREATED=06.10.20 17:46
,TRANSFERRED=2020/10/07 at 11:03:33
,PAGES=250
,TYPE=STD
,NAME=S0003926
,Book Name=M-1925-SHANDGARDHAR SANHITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,